...हित्यसम्मेलनाङ्कः

॥ श्रीशः शरणम् ॥

मधुरवाणी.

६ वर्षस्य] १८६२ शके [२-३-४ अङ्काः




सम्पादकः
गलगली रामाचार्यः
संस्कृतसाहित्यरत्नम्

सहसम्पादकः
तुलीं श्रीनिवासाचार्यः
संस्कृतसाहित्यभूषणम्

अनुक्रमणिका

CamScanner



बेळगांवनगरे प्रवृत्तप्रथमसंस्कृतसाहित्यसम्मेलनकार्यकारिमण्डलसदस्याः



कर्णाटककुलपुरोहितः कर्णाटकगतवैभवाद्यनेकग्रंथनिर्माण
सुप्रसिद्धकीर्तिः गीर्वाणवाणीप्रणयी धारवाडप्रान्तीय
सन्मान्यप्रतिनिधिः

श्रीमान् आलूरवेंकटरावमहाभागः, धारवाड.

श्रीशः शरणम् ।

मधुरवाणी.

सुधानिष्यन्दिन्या मधुरमधुरालापकलया
चिरावज्ञामूर्छाभरमपहरन्ती सुरगिरः ।
मनोज्ञालङ्कारा रसिकजनचेतांसि सहसा
वशीकुर्वाणेयं भुवि मधुरवाणी विजयते ॥

६ वर्षे] १८६२ शाके मार्गशीर्षमासस्य [२-३ सञ्चिका

राधाधरमधुस्यन्दमिलिन्दाय मधुद्विषे ।
कृष्णापटकुविन्दाय गोविन्दाय नमोऽस्तु नः ॥

मङ्गलम् ।

कविः—वेंकटरमणाचार्यः मलगी (बागलकोट)

जीवव्यूहसमुद्धृतिप्रणयसुव्यग्रान्तरात्माऽनिशं ।
यःसृष्ट्वाजगदद्भुतं करुणया पाति प्रभुः स्वेच्छया ॥
यः संशांतहृदा सुरासुरगणैरभ्यर्च्यते सादरं
श्रीकृष्णं शरणं व्रजामि तमहं व्यामोहविच्छित्तये ॥१॥
प्रत्यग्रोद्गच्छदुच्चद्रविणभरमदाटोपनिष्पादितान्ध्यान् ।
स्तावं स्तावं मृषार्थैः सुललितपदविन्यासभाग्भिर्वचोभिः ॥
भूयः पापौघबीजे मयि निजचरणाभ्यर्णमुत्कीर्णतापं
दैवात्प्राप्ते विपन्ने कलयतु करुणां श्रीनिवासो दयालुः॥२॥

श्रीः

वेणुग्रामे प्रथमसंस्कृतसाहित्यसम्मेलनस्य अध्यक्षभाषणम्

अयि भोः प्रेष्ठाः पण्डितश्रेष्ठाः !

तत्र भवतां श्रीमतां पुरस्तात् भाषितुमसमर्थापि भवतामेव परमाभिमानेन, स्थानमहत्त्वं प्राप्य मनोगतं किञ्चिद् व्याख्यातुं करिष्यामि साहसम्। इदं तावत् प्रथमतो, मया विज्ञापनीयं यदहं नास्मि बहुश्रुता । नच क्वापि शास्त्रे विदुषी । नच भवद्भिः अश्रुतपूर्वाणाम् अर्थानां प्रपञ्चने कुशला। तथापि चर्वितपूर्वोऽपि यथा रसः स्वमाधुर्यादेव पुनरास्वादनमर्हेत् तथा श्रीमद्भिः अनेकशः श्रुतपूर्वा अपि विषयाः निजगौरवादेव पुनः श्रवणाय योग्याः कल्पेरन्निति विश्वस्य निर्विशङ्का प्रवर्तिष्ये ।

सनातनमतावलम्बिभिः वेदानाम् अनादिकालसिद्धत्वम् अङ्गीक्रियते खलु । एतावतैव वेदभाषायाः संस्कृतवाण्या अपि चिरन्तनत्त्वं स्वतः सिद्धमेव । पाश्चात्या अपि विद्वांसः ऋग्वेदस्य सर्वप्राचीनतमत्वम् अभ्युपगच्छन्ति, परंतु यादृशं संस्कृतस्य रूपम् ऋग्वेदे दृश्यते, ततः किञ्चिद्भिन्नमेव तन्मन्त्राणां व्याख्यानरूपेषु ब्राह्मणेषु तत्प्रत्यक्षीभवति । ततोऽपि भिद्यते रचना सर्वासु उपनिषत्सु । ततोऽपि स्मृतीनां शैली मनाग्विलक्षणा। केषाञ्चित् पुराणेतिहासानां वाग्धोरणी विचित्रानिरङ्कुशा । श्रीमद्रामायणमहाभारतादीनां पुनः महान् अस्ति वाग्विशेषः॥ तदुपजीवकानाम् इतरकाव्यानां भवत्यन्यादृशी गिरां वैचित्री । एवं कालभेदेन रूपान्तराणि प्रतिपद्यमानेव दृष्टापि, गीर्वाणवाणी न कदापि स्वस्वरूपं विजहौ ॥

यथा एकैव नटी, भूमिकाभेदेन, स्वयं भिन्नभिन्नेव दृश्यते, तथैवेयं, सनातनी वाणी, वेदशास्त्रपुराणकाव्यप्रभृतिषु धर्मैकसारापि, नानारूपा प्रकाशते। सर्वविद्याप्रकाशिका च विजयते।

सर्वविद्यानां, मूलभूताः सर्वेऽपि ग्रन्थाः, संस्कृतसाहित्ये, अन्तर्भवन्ति। सर्वविद्याभिः सहितानां कवीनां कर्मैव, साहित्यमिति व्यपदिश्यते॥ श्रीवाल्मीकि-प्रभृतिभिः महाकविभिः, प्रणीतानां समस्तविद्यासम्बद्धविषयप्रतिदकत्वात् काव्यमेव, साहित्यमित्यपि वचनं सङ्गच्छते। तथाहि कवेः कर्मणो गौरवं निरूपितम् —

न स शब्दो, न स न्यायो, न सा विद्या न साकला।
जायते यन्न काव्याङ्गम् अहो भारो महान् कवेः॥ इति॥

विद्यानां च पुरुषार्थसाधकत्वात् पुरुषार्थप्रतिपादनवर्जितास्तु प्रबन्धाः शब्दतो रमणीया अपि, साहित्यक्षेत्रे, न प्रवेशमर्हन्ति। सत्काव्यपरिशीलनं, काव्यानां गुणदोषविचारः नूतनप्रबन्धरचना, वाग्वैशारद्यलिप्सा च, साहित्य-सम्मेलनस्य मुख्यमुद्देश्यमिति मन्ये। एतद्द्वारा संस्कृतभाषायाश्च प्रचारणा, तदानुषाङ्गिकं फलं प्रतिभाति। यद्यपि सुश्लाध्यमेवैतदुद्देश्यं तथापि प्रायेण विदुषामेवात्र प्रवेशयोग्यत्वात् न लोकसामान्यस्य भविष्यत्युपकारः। परंतु संस्कृतभाषायाः संरक्षणं, सुदृढीभविष्यति। सरस्वत्याः विलासक्षेत्रं परिबृंहितं सम्पत्स्यते। बहूनां विदुषामेकत्र सम्मेलनेन, दृढपरिचय, सौमनस्य, सहका-रादिसाङ्घिकगुणानां समृद्धिर्जायते। ईदृशाश्च सुपरिणामाः संस्कृतवाण्याः समुज्जीवनमिच्छाद्भिः, परं स्पृहणीया एव। तस्मात् साहित्यपरिषाद्भिः, क्रियमा-णोऽयं प्रयत्नः प्रशंसनीयः।

संस्कृतं, व्यावहारिकी भाषा यद्यभविष्यत्, तदा सर्वलोकानां साहित्यपरिषाद्भिः, संसर्गः सुलभोऽभविष्यत। परं, स कालो व्यतीतः। व्यतीतश्च पुनरागमनायेति यद्यपि मे विश्वासः, तथापि पण्डिताः संस्कृतस्य साम्प्रतिकीं दुरवस्थामित्थमनुशोचन्ति यथा —

अहो तदेवेदम् अशेषधरणिमण्डलमण्डनायमानं भारतवर्षं, यत्र किल तत्तादृशाः शारदसुधाकरसमुज्ज्वलेन, यशःपटलेन, समुद्भासित-

निखिलदिङ्मुखा, भारतमान्धातृनहुषप्रमुखाः, प्रादुर्बभूवुर्महीपालाः। येष खलु, क्षितितलाखण्डलानां सुधर्माभ्यधिकवैभवासु सभासु समधिकं विजहार भगवती गैर्वाणी वाणी। येषामेव च कृपाकटाक्षनिक्षेपः, शिशिरकिरणकर सम्पर्क इव सलिलनिधिं, वैदुष्यमुद्वेलयामास। क्वेदानीं, सरससरसानामपि नितान्तमनवद्यानां, दुरितगिरिनिर्दलनवज्रायमाणपठनानां श्रीमद्रामायणमहाभारतादीनां रचयितारः व्यासवाल्मीकिचरणादयः महामुनिप्रवराः, यानेव किल उपपन्नान् अवलम्ब्य सुखं प्ररूढा पल्लविता विस्तृता, पुष्पिता, फलितप्राया च शाखाशतसहस्रैः अशेषमपि भारतवर्षं व्याप्तवती भगवती, देववाणीकल्पलता चिरायैव खलु। अयमतीतः कालः। स्मरणमपि यस्य समुदञ्चयति रोमाञ्चमङ्गेषु स्वदेशभक्तानां, पातयत्यश्रूणि रुणद्धि च क्षणं कण्ठम्। हा धिक् क्वेदानीं, तत्तादृशवैभवं गीर्वाणभाषाया इति।

सुदूरं तावत्तिष्ठत्वयं समयः। ततः अर्वाचीनेऽपि काले, कियन्तो वा नोदपद्यन्त पण्डिताः, कियन्तो वा न प्रादुरभूवन् दार्शनिकाः, कति वा नोदभूवन् साहित्यशास्त्रमर्मज्ञाः, कियन्तश्च नालमकार्षुः संस्कृतभाषायामेकान्तानुरागिणः, पुण्यपुञ्जा इव आर्यवंशस्य, मूर्ता इवोत्साहाः परःकोट्यः क्षितिपालाः। यैः किल संरक्षिताः संस्कृतभाषायाः प्राणाः, परिवर्धिता कान्तिः, उज्जृम्भिताः गुणनिकराः, समुज्ज्वलिता अलङ्काराः, सुदूरमुत्सारिताः दोषनिकुरम्बाः, हृदयङ्गमत्वमनुगमितानि रीतिजालानि, मनोहरत्वमुपनीता वृत्तयः, माधुर्यमनुप्रापिताश्च ध्वनयः। येषामेव च, प्रसादभाजनतामुपगता मनोज्ञपदविन्यासा निखिलरसविलासविशेषकमनीया, विमलतरगुणजालहृदयहारिणी, नैकविधरुचिरालङ्कारसमधिकसमुज्ज्वला, प्रकृतिरमणीया नवविलासिनीव केषां वा हृदयानि न वशीकृतवती भगवती गैर्वाणी वाणी। कश्च वा रसिकः सोत्कण्ठमेव नास्वादितवान् रसमेतस्याः; हन्त भोः कियद्वा वक्तव्यं तदानीन्तनं सौभाग्यं गीर्वाणभाषायाः। नूनमवसरे तस्मिन् आबालस्त्रीवृद्धं सर्वेषामपि भारतवर्षीयाणां वदनानि विहारभवनानीव समवर्तन्तैतस्याः। तदेतद्वचनम असहमानास्तु बहवः प्रत्यवतिष्ठन्ते, यदेषा लोकसामान्यस्य व्यवहारसाधनी-

भूता न कदाप्यासीदिति । उदाहरन्ति च तत्समर्थनाय गौतमबुद्धस्याचरितम् । स खलु लोकानां संस्कृतानभिज्ञताम् अनुसंधाय, तदात्वे सुप्रचारां पालीसमाख्यां भाषां धर्मोपदेशसाधनतया स्वीचकार । स च समयः सार्धद्विसहस्रवत्सरेभ्यः प्राचीनः । तदानीमेव, लोकव्यवहाराद्बहिष्कृता गीर्वाणवाणी, कथङ्कार-मर्वाचीनकालेषु, व्यावहारिकभाषा स्यादिति ? । इदं किल निर्विचाररमणीयम्, पाली नाम भाषा हि, संस्कृतस्यैव अपभ्रंशः । उभयोश्च अत्यन्तनिकटः सम्बन्धो वर्तते । अनधीतपालीवाङ्मयेनापि संस्कृतज्ञेन सा वाणी सरहस्यम् अवबोध्दुं शक्यते । देववाणी पूर्वमाविद्वत्पामरं व्यवहारसिद्धा बभूव । सैव स्वभावजन्यैः कारणैः आगतप्रतिबन्धा पामरेषु म्लानिं गताऽभूत् । अत एव, तदपभ्रंशरूपेण, समुदियाय पाल्याख्या भारती । एकस्या एव आङ्ग्लभाषाया अपि, रूपान्तरेण परिणताः सुप्रचरिता वाग्विशेषाः पाश्चात्यजनपदेषु अनेकेषु दरीदृश्यन्ते । अभिज्ञानां मुखान्निस्सरन्ती वाणी जानपदानामन्यतरेव प्रतिभायात् । अतस्तदुपदेशप्रसङ्गे तज्जनपदनिरूढया अपभ्रष्टया गिरा व्यवहाराः तेषामवबोधसौकर्यमुत्पादयन्तीति, तथा प्रवृत्तिः युक्तरूपैव । अत एव गौतम-बुद्धेनापि सा सरणिः समाश्रिताऽभूत् । तस्मात् **तात्कालिकपालीभाषा-वृत्तान्तावलम्बनेन** संस्कृतस्य लोकव्यवहारबाह्यतां साधयितुं नोपपद्यते । सूक्ष्मार्थसंशोधनपटवः पाश्चात्या अपि विद्वांसः सामान्यलोकैरपि अनयैव देववाण्या, प्राग् व्यवह्रियमाणत्वम् अभ्युपगच्छन्ति । क्रिस्तशकस्य चतुर्थसप्तम शताब्द्योरन्तराले, भरतखण्डस्य विद्याभ्युदयेन समाकृष्टः चीनदेशान्निस्सृत्य **दुरवगाहकान्तारपथान**प्यतिक्रम्य भरतखण्डं प्रविष्टाः प्राज्ञयात्रिकाः राष्ट्रमेत-दखिलं पर्यट्य सारभूतानि बहूनि संङ्गृह्य स्वदेशं प्रतिनिवृत्ताःकिल । त एवामी सुस्पष्टं च सविस्मयं च समुद्घोषयन्ति स्वप्रणीतदेशभ्रमणवृतान्तेषु यत् संस्कृतमेव सर्वत्र व्यवहार भाषा आसीदिति । इतरैश्च बहुभिः प्रमाणै संसिद्धत्येव संस्कृतभाषायाः व्यवहारसाधनत्वं लोकानाम् ।

एवं प्राचीन भूपालादिभिः प्रदत्तावलम्बना परमाभ्युदयकोटिमारुढा तदानीमात्मनो वैभवातिशयेन उपहसन्तीव, स्खलत्प्रायपदन्यासाः पवनाम-

याभिभूता इव, निस्सारा इव च, इतरा भाषाः इदानीमतिमात्रं कष्टांदशामनु-
भवति सर्वांगसुन्दर्यपि गैर्वाणीवाणी । न चैतदस्या दूषणं नाम **भारतवर्षीय-
रसिकजनाधीन जीविताया:** विपरिवृत्तभागधेयायाः । दुरपनेयं वज्रलेप-
निर्विशेषं च पुनरेतद्दूषणम् आर्यवंशीयानाम्, यत्पश्यतां जीवतामेव, वा एतेषां
मृतप्रायतामुपागता संस्कृतवाणीति । अहो निरपत्रपत्वमार्याणां, यदेते सुललिता-
मपि भगवती संस्कृतभाषां मृतभाषेतिवदन्तो नांशतोऽपि लज्जन्ते । अयि भो
भारतवर्षीयाः आर्यवंश्याः किल यूयम् । संस्कृतभाषा, चेयमधिदैवतं **भवत्पि-
तृपितामह प्रभृतीनाम्** । तन्नोचितमिदानीम् औदासीन्यं भवताम् ।
तावदेव किलोदासीन भावः शोभेत यावन्नानु प्राप्तोविपदं सुहृद्वा, बन्धुर्वा
सम्बन्धी मनुजस्य । उपस्थितायान्तु, विपदि प्राणानप्यविगणय्य परिरक्ष-
णीया एवैते । अन्यथा क इव वा पशुभ्यो विशेष एतस्मिन् । आर्याः किमि-
त्यद्यापि समासेव्यते औदासीन्यम् । अद्यापि खलु विद्यते अवसरः परित्राणस्यै
तस्याः । अद्यापि किल नेयं सर्वांशतः नामशेषतामनुप्राप्ता । अद्यापि खलु
परिस्पन्दते श्रीमतां धमनी । अद्यापि खलु निस्सरन्त्येव वदनकुहरतो निःश्वासाः ।
अद्यापि प्रसरति श्रीमतां वचनविषयिणी शक्तिः । किमधिकम् अद्यापि ननु
विद्यते श्रीमतां चेतना नाम । तदार्याः किमित्यद्यापि प्रतिरुद्धकण्ठैरिव समा-
सेव्यते मौनमेव श्रीमद्भिः किमिति वा नानाविधेषु नात्यावश्यकेष्वपि कर्मसु
आयस्यद्भिः क्षणमपि न प्रयत्यते अस्या अभ्युददयाय । अहो तदेतदति
महीयः खलु दुर्भाग्यं संस्कृतभाषायाः यदियमार्यवंशीयेभ्योऽपि श्रीमद्भ्यः
अवहेलनामाप्नोति ।

संस्कृताभिमानिभिः श्रीमद्भिः साहाय्यदाने पुनरुज्जीविता भविष्यत्येव
रसिकविद्वज्जनायत्तजीविता, संस्कृतभाषा । एवं विधेऽपि सुविषमे अवसरे
केचिन्महान्तः प्रयतन्त एव यावत्सामर्थ्यमेनामुन्नतिमारोपयितुम् । सम्प्रत्यपि
हि प्रादुर्भवन्ति **सहृदयहृदयाह्लादकानि** काव्यरत्नानि । अधुनापि कृतार्थ-
यन्ति श्रवण कुहरं पण्डितानामुपन्यासाः । किन्तु नैते यथापूर्वमाविर्भवन्तीति,
नूनमत्र साहाय्याभाव एव निदानम् ।

तासां तासां च भाषाणाम्, ऐकान्तिकेऽभ्युदये, विशेषतश्च विलीनप्रायप्रचाराणां, पुनः प्रचारोपक्रमे, तत्तद्भाषामयानि संवादपत्राणि, मासिकपत्रिकाश्च भूयसीं हेतुतामधिगच्छन्तीति विदितमेवेदं विदुषाम् । यत्र किल प्रमदवन इव विहाररसमनुबभूव संस्कृतवाणी, तस्मिन्नेव भारते वर्षे, का कथा **दैनिकसाप्ताहिकादिपत्राणां** मासिकपत्राण्यपि सुविरलान्येव विद्यन्त इति यत्सत्यमतिमात्रमिदं लज्जाकरमार्यवंशानाम् । अनेक कोटिप्रजानां मध्ये संस्कृतपत्राणि दश द्वादश वा प्रचरन्तीति, अवगच्छतः कस्य वा सचेतसश्चेतो न दूयेत । अस्मिन्नप्यवसरे संस्कृतसंसारस्य एकमात्रा साप्ताहिकी पत्रिका, या 'संस्कृताख्या' विद्यते, सा खलु दशभिर्वर्षैः पुष्टिमाचिन्वती, स्वस्याः सरलसुबोधया वाण्या सहृदयानां हृदयमावर्जयतीति नितान्तमेतदभिनन्दनीयम् । संस्कृतस्य राष्ट्रभाषात्वसाधनमेव तस्याः परमं ध्येयम् । तदर्थमेव सा प्रौढतरां शैलीं दूरीकृत्य, व्यवहारयोग्यामेव सरणिमूरीचकार । तदर्थमेव च पण्डितानपि बहून् सहयोगिनः सञ्जग्राह । सुप्रभात, मञ्जूषा, ज्योतिष्मती, श्री प्रभृतयः मासिक–त्रैमासिक–पत्रिकाः, किञ्चिदर्वागुदयमधिगता अपि नितान्तविशुद्धसंस्कृतवाण्या समुल्लसिताः सहृदयानां हृदयमुल्लासयन्ति । एताः सर्वा अपि उत्तरदेशेषु लब्धजन्मानः दक्षिणापथे विरलप्रचारा दृश्यन्ते । नायमासां दोषः, परं संस्कृतवाण्यां भूयसां लोकानाम् अनभिमान एव तद्वैरल्ये हेतुः । न खल्वेष स्थाणोरपराधः यदेनमन्धो न पश्यतीति । श्रीमधुरवाणी तावदेकैव दक्षिणापथे प्रधानभूता, मोहमयीप्रान्तस्य **गीर्वाणवाणीप्रचारसर्वस्वायते** । सा चेदानीं, षष्ठे वर्षे पदमर्पयित्वा बहूनां पण्डितानां संस्कृताभिमानिनामितरसज्जनानां च अमोघाभिराशीर्भिः सौमनस्यमधिगम्य, शोभनप्रगत्युन्मुखी वर्तते । संस्कृतस्य समुज्जीवनाय क्रियमाणः, पत्रसम्पादकमहोदयानाम् अगाधः प्रयत्नः परं प्रशंसनीयः । साहित्यपरिषद्भिरपि संस्कृतोज्जीवनबद्धदीक्षाभिः नवप्रबन्धमयीनां लोकवृत्तनिवेदिकानां च मासिकपत्रिकाणां सम्पादनं लोकशिक्षणाय बहूपकुर्यात् । सर्ववृत्तपत्राणां विषयेऽपि

विशेषतो विज्ञापनीयः किञ्चिदंशो विद्यते । साम्प्रतिकी हि लोकस्य प्रगतिः नितान्ताक्षिप्रतरा विविधपरिवर्तनभूयिष्ठा च परिदृश्यते । तदनुरोधेन नवनवाः शिल्पयन्त्र कृषि-वाणिज्य-सङ्ग्राम-भौतिकशास्त्र, सम्बन्धिनः राज्य-शासनाविधानसम्बद्धाश्च शब्दाः लोकानां मुखेषु प्रचारमधिगताः । वृत्तान्तवर्णनेषु यत्रैषां संस्कृतपर्याया नोपलभ्येरन् तत्र नूतना एव संस्कृत-शब्दाः सुबोधनिर्वचनाः कथञ्चित्परिकल्प्य प्रयोक्तव्याः । अन्यथा शोभन अपि निबन्धाः क्वचिद्वाचकानां वैरस्यमुत्पादयेयुः । शुद्धसंस्कृतमध्ये **विजातीयसम्मिश्रणेन** क्वचिदुपहासास्पदीभूय लाघवमापद्येरन् । न खलु संस्कृतभाषायाम् इतरभाषास्विव, शब्ददारिद्र्यं विद्यते । तत्तादृशी शब्द-सम्पत्तिः कुत्र वा अन्यत्र भाषायाम उपलभ्येत ? । शब्दशास्त्रानुसारेण शक्यते खलु नवनवान् शब्दान् यथायोगं परिकल्पयितुम् । अत एव विज्ञाप्यते यद् गत्यन्तरसद्भावे विदेशीयवाचामनुप्रवेशः स्वानिबन्धेषु सर्वथा वर्जनीय इति । संस्कृतभाषायाः राष्ट्रभाषात्वसाधनाय क्रियमाणः पण्डितानां परिश्रमो यद्यपि श्लाघनीयः, तथापि वृत्तपत्राणां प्रचारणमात्रेण सन्मनोरथस्य संसिद्धिः चिरेणापि नैव **सम्भाविनीति,** शङ्कते हृदयम् । महती खल्वेषा प्रत्याशा सर्वतोमुखीनान् प्रयत्नविशेषानपेक्षते । तादृशप्रयत्नानां प्राथमिक-त्वेन गणनीयः स्त्रीविद्याभ्यासः । स्त्रियः खलु संसारस्य मूलम् । यदि प्रतिगेहं स्त्रियः संस्कृतज्ञा भवेयुः, तदा तदर्भकाणामपि स्वत एव संस्कृते अभि-रुचिः समुदेति । तथाच विद्याप्राचुर्येण गृहे गृहे गीर्वाणवाणी समुल्लसन्ती क्रमेण व्यवहारसंसिद्धा परिणमेत् । तस्मादियं देववाणी स्त्रीणां शिक्षणोपक्र-मेण सर्वासामपि मातॄणां भाषा विधातव्या। ततः किल राष्ट्रभाषात्वमस्याःस्वयमे-सिध्येत् । ततः किल संस्कृतं मातृभाषेति यज्जेगीयते तदर्थवैशिष्ट्यं प्राप्य नितर शोभेत । अनेक भाषाणां जननीत्वमात्रेण गैर्वाण्याः किमिवहि वैशिष्ट्यम् । अ एव संस्कृतोज्जीवनमिच्छुभिः तस्य प्राचीनोत्कर्षेच पुनः कामयमानैः स्त्रीण संस्कृतविद्याशिक्षणे प्रयतितव्यम् । अन्ये च प्रयत्नाः संस्कृतोज्जीवनाय सह का रिणो भवन्ति । तत्र प्रथमः संस्कृताध्ययने लोकानामुत्साहसंवर्धनम् । अ

केचिद्धनार्जनमात्रपराः समकण्ठमाहुः किन्नाम प्रयोजनमुद्दिश्य संस्कृतमध्येतव्यम्। न तेन जीविकालाभो नच लौकिकी प्रतिष्ठा वा। विना प्रयोजनं कः खलु प्रयतेदिति। एते पुरुषाः पुरुषार्थचतुष्टयस्य स्वरूप बोधनेन संस्कृतस्याप्यर्थसाधकत्वं ग्राहयित्वा तत्र प्रवर्तयितव्याः। अथान्ये पुनराचक्षीरन् आङ्ग्लवाणी प्रभृतीनाम् अनूदितसर्व संस्कृतग्रन्थानाम् इतरभाषाणाम् अभ्यसनेनापि संस्कृतसाहित्यसारस्य ग्रहणं सुशकमेव। कुतो वा कठिनगैर्वाणीपरिशीलन प्रयास इति। एतेच सर्वभाषाणां गीर्वाणवाण्या एव मातृभूतत्वं संस्कृतग्रन्थानां भाषान्तरीकरणेन सम्भवन्तीं रहस्यार्थहानिं संस्कृतविद्यायाः निरुपमं माधुर्यगाम्भीर्यलालित्यादिगुणगरिमाणंच बोधयित्वा स्वपक्षमानेतव्याः। इत्थं देशकालव्यत्ययनुसारं जनान् प्रोत्साह्य संस्कृतविद्यायामभिरुचिमुत्पादयेत् तदुज्जीवनाय प्रवृत्तः पण्डित इति महान् भारोयं पण्डितानामेवोपरि वर्तते।

एवं लोकानामाभिमुख्यं सम्पाद्य संस्कृतपण्डितैः प्रत्येकशः छात्राणां सङ्ग्रहः कार्यः! अधीतानां विद्यानाम् अन्यत्र सत्पात्रेषु प्रतिपादनं विना न खलु विद्याः प्रसीदन्ति। नच लोकानामुपकारः स्यात्। स्वाङ्गमात्रजीर्णाभिः किमिवहि प्रयोजनं विद्याभिः। अतएव सूक्तिरुद् घोषयति यथा।

अवीर्यः पुरुषोनस्यात्
अनपत्या न चाङ्गना।
अविद्यो मनुजो न स्यात्
अशिष्यो नैव पंडितः॥ इति।

तस्माद्विद्या महिम्ना मनुजेषु गणनां प्राप्य विद्वाद्भिः सुशिष्याश्च, सङ्ग्रहणीयाः। अनया पुरुषसम्पदा संस्कृतस्य सर्वतः प्रचारः सुकरो भविष्यति। संस्कृतसाहित्ये गद्य प्रबन्धा, विरलाः। तत्रापि दैनन्दिनव्यवहारोपयुक्त सरलसुबोधवचनगुम्फितास्तु सुतरां विरलाः। इदमेव वैकल्यं संस्कृत साहित्यस्य। आङ्ग्ल भाषादिषु परस्सहस्राणि वचनकाव्यानि विद्यन्ते। सामान्योऽपि जनस्तेषां रसमास्वादयन् प्रमुदितान्तरङ्गो जायते। हर्षचरितकादम्बर्यादिग्रन्थाः केवलं, व्युत्पन्नमतीनामेव, परिशीलनाय योग्याभवन्ति। यद्यपि,

संवादरूपो, वचन पुराण नाटकादिभ्यः समुच्चेतुं शक्यते तथापि लोकाना
अल्पायासेन बहुसज्जिघृक्षणां, तत्र अनादर एव स्वतः सिद्धः । तस्मा
साहित्यपरिषद्भिः सरससरसानां गद्यप्रबन्धानां विरचनेन, प्रकाशनेनच ले
कोपकृतिर्विधेया। तादृशप्रबन्धैः संस्कृतस्य वैकल्यमपनीतं भविष्यति। तस्य
राष्ट्रभाषात्व सिद्धये सुगमश्च पन्थाः शीघ्रमेव सम्पत्स्यते। अयमपि भारः पुरुष
पुङ्गवैरेव बोढव्यः। पुरुषपुङ्गवाश्च पण्डिता एवेति मे मतिः। स्वदेशे पूज्यं
राजा, विद्वान् सर्वत्र पूज्यते' इत्युक्तन्यायेन पण्डितः किल, नरश्रेष्ठेषु
परिगणना मर्हन्ति। अत एवाभियुक्तः कश्चिदाह—

"गीर्वाणवाणी कलिसर्पदंशाद्विमूर्छिता सीदति नः समक्षम्। सञ्जीवने
स्या न परो नरेन्द्रादिह प्रभुः स्यादिति मे प्रतीतिः इति अत्र नरेन्द्रत्वं पण्डित
नामेव सङ्गच्छते। तैरेव शक्यते।"

गीर्वाणीवाणीं पुनः प्रकृति मापादयितुम्। अस्याः समुज्जीवने बद्ध
दराः साहित्य परिषदः सर्वैर् प्यार्थवंशीयैः सर्वथा प्रशंसनीयाः।

यद्यपि संस्कृतमार्यभाषेति, परमादरास्पदं, तथापि भारतवर्षीयाण
संस्कृतिं पाश्चात्यानांच संस्कृतिं तुलनात्मकदृष्टया सम्परीक्ष्य गुणदो
विचारपुरस्सरं गुणग्रहणमपि कार्यम् भौतिक शास्त्राद्यनेकशास्त्रेषु लोक
भ्युदयसाधकं, संस्कृतग्रन्थवेदिभिः अदृष्टश्रुतपूर्वं अर्थजातं बहुविधं
यद्यप्यार्याणां संस्कृतिः अति महीयसी तथाप्यनेक विद्या प्रतिपादकग्रन्थान
विविष्टत्वात् काल महिम्ना तत्संस्कृतेः परिहीयमाणत्वाच्च, प्रायेण, भारत
वर्षादेव अन्यत्र संक्रान्ता सा पुनः प्रत्याहरणीया। इदं आङ्गलविद्याक्षेत्रे
विश्रुतानांम् उभय विद्या कुशलानां विपश्चितां, सहकार मन्तरेण न शक्ये
साधयितुम् अतः साहित्यमण्डलीषु तेषामपिं संङ्ग्रहणेन, क्षिप्रतरमेव, चरि
तार्थ्यं भविष्यती ति न सन्देहः।

अनेन वाग्विस्तरेण श्रीमतामत्यायासो, माभूत्। व्याख्यातविषयेषु
यद्यदुपादेयं, तावन्मात्रं परिगृह्य, दोषान्परिवर्जयन्तु भवन्तः। अस्यां महापरि
षदि, मम साभापत्य गौरवम् अनुज्ञाय, इयच्चिरं, सावधानं म वचनानि श्रुतवत
पुज्यसदस्यानां, कृतज्ञतां वहन्ती तद्वन्दनं विधायः, भाषणाद्विरतास्मि॥ इतिः—



बेळगांवनगरे प्रवर्तिते प्रथमसंस्कृतसाहित्यसम्मेलने


अध्यक्षपदमलङ्कृतवती पण्डिता संस्कृतसाहित्यचन्द्रिका

सौ. क्षमादेवी राव

(मुम्बई)



बेळगांवनगरे प्रवर्तिताया गीर्वाणवाग्वर्धिनीसभायाः
पाञ्चवार्षिकमहोत्सवावसरे अध्यक्षपदमलङ्कुर्वाणः
गद्वालसंस्थानवरिष्ठन्यायाधीश्वरः वाचस्पतिः
श्रीमान् हरकारेगुण्डेरावमहाभागः
गद्वाल.



बेळगांवनगरे प्रवर्तिते गीर्वाणवाग्वर्धिनीसभायाः
तथा मधुरवाणीपत्रिकायाश्च पाञ्चवार्षिकमहोत्सवावसरे
स्वागताध्यक्षपदमलङ्कुर्वाणः मधुरवाणी सम्पादकः
संस्कृतसाहित्यरत्नम्
पं. गलगलीरामाचार्यः

वेणुग्राम(बेळगांव)स्थ गीर्वाणवाग्वर्धिनी-सभायाः

पञ्चमवर्षीयमहोत्सवावसरे अध्यक्ष भाषणम् ।

योऽन्तः प्रविश्य मम वाचमिमां प्रसुप्तां संजीवयत्यखिलशक्तिधरः स्वधाम्ना ।
अन्यांश्च हस्तचरणश्रवणत्वगादीन् प्राणान्नमो भगवते पुरुषाय तुभ्यम् ॥

स्वागतमण्डलाध्यक्षमहाशयाः गीर्वाणवाणीप्रणयिन्यो विदुष्यः ! माननीया विद्वद्वराः !

धन्योऽहं यत् श्रीमतामुपासितशारदानां समुपार्जितदिव्ययशसां मान्यवराणां परिषदि संप्रविश्य अत्रभवतामनन्यलभ्यदर्शनवाग्विलासमहानन्दमनुभवामि । प्रथमं यदा मम सुहृद्वराः श्रीमन्तो मधुरवाणीसम्पादकाः श्रीसाहित्यरत्नं गळगलीरामाचार्याः तथा श्रीसाहित्यभूषणं बुर्लीश्रीनिवासाचार्याः अस्या गीर्वाणवाग्वर्धिनीसभाया अस्मिन् वार्षिकोत्सवप्रसङ्गे भवानध्यक्षस्थानं स्वीकुर्यादिति तदीयसदस्यैर्निर्णीतामित्यावेदयन्, तदा व्यजिज्ञपं सर्वथाऽनर्होऽस्मीमां पदवीमिति । पुनश्च तैः सानुग्रहं प्रोत्साहितः श्रीमतामाज्ञा शिरसि धार्या, इति मन्वानः प्रयते किंचिद्विज्ञापयितुम् । नाहं कस्मिन्नपि शास्त्रे अधीती नाप्यधिकरोमि वाणीं गीर्वाणीम् । नापि शक्यमूहितुं काचिदपि शक्तिरीदृग्जनस्य, येनाबाल्यं क्षपितं लौकिकव्यवहृतावेव वयः। माननीयैर्महाराष्ट्रसाहित्यसाम्राज्यधौरंधर्यं वहद्भिरस्या अध्यक्षपदवीमलंकृतचरैर्लेवनापि न तुलयामि । तथापि श्रीमतां पूज्यपादानां वात्सल्यमेव मां व्यापारयति किंचिन्निवेदयितुम् । तत्प्रार्थये क्षम्यतां मदीयोऽपराधः ।

प्रथमतो गीर्वाणवाग्वर्धिनीसभासंस्थापकानां संस्कृतवाङ्मयप्रसारणपरायणानां सन्ततजेगीयमानविपुलयशसां गाढतमसो जनान् स्वकर्तव्यविमुखानुद्दिधीर्षूणां पुण्यपत्तनस्थ सर-परशुराम-भाऊकालेज संस्कृतप्राध्यापकानां श्रीमतां के. ना. वाटवे पूज्यपादानां दिव्यं नाम गृणन्नेव प्रारभे । येषां प्रेरणयैव सभेयं मूर्तिमती संवृत्ता । एते बद्धशिरोंजलिमाननीयाः । आशासे तेषां दिव्याः आशिषः । अन्ये च ये पूज्याः सभास्ताराः परमविदुषः रसनिष्यन्दि

सुगन्धप्रवचनकुसुमैर्निजकरगुम्फितदिव्यमौक्तिकसरैश्चाविरतं सुरभारतीमुपासते ते प्रज्ञावतां पूजिताः अस्यां सभायां बद्धादराः वाङ्मयं विवर्द्धिष्णवः परम पूज्यप्रातःस्मरणीयश्रीगलगलीमहर्षिनृसिंहाचार्यतनुजाः गीर्वाणसाहित्यरत्न श्रीरामाचार्याः मधुरवाणीसंपादकाः, संस्कृतसाहित्यभूषणं मधुरवाणीसह सम्पादकाः बुर्लीश्रीनिवासाचार्याः गीर्वाणवाणीप्रणयिनो विद्यार्थिदशायामेव "अभिनवबाण" इत्युपाध्यायैरपि प्रशंसिताः एम्. पी. वाली एम्. ए. महाभागाः संस्कृतसाहित्यविद्वांसः भिषग्भूषणं डॉ. सवणूरकरमहाभागाः, संस्कृतविषये अन्यान् प्रोत्साहयन्तः सोत्साहं स्वयं च यतमानाः डॉ. बाम्रे महाभागाः, धर्माधिकारिशास्त्रिणः, वैद्यरत्न इत्यन्वर्थपदवीसमलङ्कृता वाटवे महाभागाः साधलेशास्त्रिणश्च महतीमर्हन्ति प्रशंसाम् । अन्ये च सभिभासदि-षवः सभाजनीयाः । एतैरविश्रान्तं प्रयतमानैः क्षीणशक्तिरपि संस्कृतवाणी शुश्रूषाविशेषैरद्य कानिचिदारोग्यचिन्हानि दर्शयति । एवं सेव्यमाना पेपीयमाना च रसायनं सा अचिरणैव कालेन प्रतिलब्धपूर्णशक्तिः समवाप्त-पूर्वलावण्यविशेषा स्वविलक्षणवाग्विलासैः सवासनानां सर्वेषां चेतांस्याकृष्या-नंदयिष्यतीति निश्चप्रचम् ।

तस्मादनुकरणीया एव एते सर्वैरपीतरप्रान्तवास्तव्यैः संस्कृतप्रणयिभिः। इदं च नः सर्वेषामतीवानन्दवर्धनं यत् संस्कृतवाणी महोन्नतमात्मीयं पदं पुनर्मुहुरारुरुक्षुरद्य काममप्युच्चसोपानपङ्क्तिमारूढेव, तस्या व्याप्तिवलयश्चाल्पीयसा प्रमाणेनापि विकासं प्राप्त इव दृश्यते ।

संस्कृतभाषाविषये बद्धादरा अपि बहवः इतरैरनेकवारं "किमनया मृतभाषया कार्यम्" "इयं तु पूर्वस्मिन् काले ऋते सुखासीनब्रम्होद्यकथा-याः कदापि सर्वसमाजव्यवहारविषयिणी नैवासी" दित्यादिभिराक्षेपैर्भ मताडिता अनुत्साहिताश्चाभवन् । दिष्टया सुकृतिनो वयं अद्य नैते ईदृशैर्वाक्प्रहारैर्भाययितुं प्रभवन्ति ।

गीर्वाणमार्तण्डगोलः अद्यावधि नभश्छन्न एवासीत् । दिष्टया एतद्दिने न तद्दुर्दिनम् । यूरोपीयपण्डितेभ्यो गीर्वाणवाङ्मयसंशोधनबद्धादरेभ्यः

सर्वथा वयमधमर्णाः। प्राचीनसंशोधने त एवास्माकं मार्गदर्शिनः। तैस्तु वयमेव "नभश्छन्नदृष्टय," इति ज्ञापिताः गाढनिद्रायाः प्रबोधिताश्च। मोहेंजदारो हरप्पादीनि अत्याश्चर्यजनकानि बहुरत्नागर्भसंशोधनानि अतर्किता-मपूर्वामेव सरणिं दर्शयन्ति ऐतिह्यसंशोधनपरायार्यसंस्कृतेः सनातनत्वस्येयत्ता-परिकल्पने। अत्रापि प्राचीनकाले इदानींतने प्रतीच्यदेशेष्विव सर्वास्वपि विद्याशाखासु अत्युच्छ्रिता प्रगतिरासीदिति कासुचिच्चैतेभ्योऽप्यधिकतर-उत्कर्षातिशय आसीदिति सुस्पष्टं ज्ञायते। अयं देशः सुप्रसिद्धचर इति न केवलमिदं तज्ज्ञापलिङ्गानां संग्राहकं प्रदर्शनस्थानं, किन्तु अद्याप्यत्र परमार्थ-तच्चिच्छाक्तिर्जागरूकतया वरीवर्ति। अद्यतनेऽपि काले शिक्षासंपदां परां कोटिं प्राप्तवतीमपि यूरोपादि संस्कृतिं किंचित् स्वोपज्ञमपूर्वमध्यापयितुं अस्ति सामर्थ्यं भरतवर्षस्य। इदमपि ऋजुस्वभावैस्तैरेव पाश्चात्यपण्डितैराघोषितम्। इयं भाषा न केवलं भारतमेव वर्षमाभिव्याप्य स्थिता, किन्त्वन्येष्वपि देशेषूद्-जृंभतेति ज्ञायते। अत्र विषये वयं डच्विदुषामतीवाधमर्णाः मलय-सुमात्र बलि-प्रभृतीनां सुवर्णद्वीपमिति गणव्यपदेशः। तानि च द्वीपानि अश्वमेधादियज्ञभूमय आसन्निति ज्ञायते। संस्कृतभाषायामुट्टङ्किताः शिलालेखाः काली-शिव-विष्णु-देवताप्रतिमाः भूमेरुत्खायाचिरादेव प्रदर्शनाय स्थापिताः। तदितिहास-संशोधनपराश्च तत्रत्याः शैलेंद्रवंश्या राजानः काञ्चीमण्डलाधिपैश्चोलैः सह युध्यन्ते स्मेत्यभिप्रयन्ति। अस्य भारतस्य वाणिज्यविस्तृतिरपि उदीच्यदेशे आचीर्णं पश्चिमेऽप्यपश्चिमा आग्रीसरोमबर्बरमासीदिति निश्चीयते। अमेरिकायामपि आर्यसंस्कृतिः सुप्रतिष्ठितचरेत्यचिरादेवैतिह्यतस्सिद्धो विषयः। तस्मात् कृत्स्नं भूमण्डलमियं सुरभारती व्यानशे, इति वक्तुं सुशकम्। ईदृशी महता प्रमाणेनाभिवृद्धिं गमिता भाषा सर्वसमाजव्यवहारविषयिणी नैवासीदिति आक्षेपस्यैव नास्त्यवकाशः। तस्मात् संस्कृतभाषा न मृतरूपा, किंत्वमृतस्वरूपैवेति अत्र न काप्यनुपपत्तिः।

अयमप्यस्माकमनल्पोऽन्यो मोदहेतुर्यदद्यास्मद्यूनां समाजोऽपि संस्कृतविषयेऽ

युवान एव भविष्यद्भारतप्रासादस्य मूलाधाराः स्तम्भाः।
धिकबद्धादरो दृश्यते । यद्यपि पूर्वस्मिन् काल इव संप्रदायानुसारिणी पाठप्रवचनपद्धतिर्न सर्वत्र दृश्यते।
तथापि यूरोपीयपण्डिता इव भारतीया अप्यांग्लगीर्वाणविविधसमयविचिकित्सापटवः
पूर्वापरपर्यालोचनया वाङ्मयैतिह्यादिसंशोधनकार्यं प्राक्रमिषुः । अस्मत्प्राचीन-
वैभवं यद्यावधि अनुमितिमात्रगोचरमासीत् तदधुना अंशतः प्रत्यक्षीक्रियते प्रति-
दिनम्। नैतावन्मात्रेणास्माभिः कृतकृत्यैर्भवितव्यम् । वयं तथापेक्षामहि यथेदं भारतं
सकलसंस्कृतप्राकृतसंस्कृतीनां केंद्रस्थानं भवतु अन्येषां चेतांस्याकर्षेच्च वरीवृतीति
एतदर्थमेवायं कर्णाटकव्यपदेशेन गीर्वाणवाक्प्रकर्षाय प्रयत्नः । कर्णाटकगतवैभ-
वादीन् ग्रन्थान् दर्शंदर्शं विज्ञानेश्वर–विद्यारण्य--जयतीर्थादिमहाविभूतीः स्मारं
स्मारं आशासे इयं गीर्वाणवाग्वर्धिनी सभाऽचिरणैव कालेन परामभिवृद्धिं
यास्यन्ती नालंदेव, विक्रमशिलेव, अत्रत्य विद्यानगरीव (विजयनगरी) च
स्वकीयानुपमवाग्विलासैरानन्दयन्ती जगन्ति सर्वातिशायिसौभाग्यसमुज्ज्वला विजेज-
यीतुतमाम् । उक्षविद्यापीठप्रवर्तकानामद्यापि प्राचीनसंस्कृतिष्वेव श्रद्दधतां कुण्ठित-
व्यवहारायां ल्याटिन् भाषायामेव मानपत्र समर्पणं श्रीठक्कुरकुलावतंसेन प्राच्यर-
विणा रवींद्रेण महाकविना संस्कृतभाषायामेव तेषां सभाजनं च द्रढयति शिथिली-
भूतान् प्राचीनसंम्बधान्, वर्धयते उत्साहं, प्रेरयति च नः प्राचीनसंस्कृतौ । तस्मा-
दस्माभिर्मनोवाक्कायकर्मभिः संसेव्या सुरभारती ।

संस्कृतवाङ्मयस्य विस्तर इयान् इति न शक्यते परिमातुम्। " अनन्ता
वै वेदाः " इति प्राचीनोक्तिर्नातिशयोक्तिमूला । सुप्रसिद्धस्य ग्रीसदेशस्य
संस्कृतेः कृत्स्नमपि सार्वशाखिकं वाङमयं, तथा सर्वातिशायि रोमनसंस्कृतेः
सकलं वाङमयमेतदुभयमपि मिलितं सत् केवलेनास्मद्वैदिक-वाङमयग्रन्थभार-
मात्रेण तुल्यं जगद्विख्यातः ग्रीककविर्होमरः तथा व्हर्जिल नामक रोमकमहाकविः
उभावपि यानि यानि काव्यान्युपनिबबन्धतुः तानि सर्वाण्यपि चेदेकत्र संगृहीतानि
स्युः तदा या तस्या ग्रन्थविस्तृतिर्जायते सा आहत्य सर्वाप्यस्मन्महाभारत-
ग्रन्थस्य केवलेन सप्तमांशभागेनैव समा । संस्कृतवाङ्मयस्य शाखाः कत्यभवन्

प्रतिशाखं कियन्ति वा ग्रन्थरत्नानि कालमहासमुद्रतलमेव स्वीयं धामेति प्रपेदिरे इति नैव शक्यं गणयितुम् । अस्य गीर्वाणसारस्वतमहासागरस्य लोकोत्तरगम्भीरस्य अनियान्त्रितव्यापारस्य सर्वमपि शोभायै संपद्यते । महातरङ्गा इव वाङ्मयस्यावान्तरविभिन्नशाखाः परस्परमभिघ्नन्तीव दृश्यन्ते । वैदिकी, अवैदिकी शास्त्रीया, पौराणिकी, इत्यादयो बह्व्यः शाखाः । तासामेकवाक्यतासम्पादनं न सुलभम् । आदौ तासां यथावद्वस्तुज्ञानसम्पादने एव आस्थास्वास्थ्ये सम्पाद्य महान् प्रयत्न आस्थेयः । इदं तामसं पुराणं इदमवैदिकं दर्शनम् इति, पुस्तकं विनैव हस्तस्पर्शं न त्याज्यम् । प्रगल्भोदात्तविचारैर्विशालदृष्टिभिर्भाव्यमस्माभिः ।

वाङ्मयस्यासाधारणं रूपं प्रतिपादयता महाकविना दण्डिना

"आदिराजयशोबिम्बमादर्शं प्राप्य वाङ्मयम् ।
तेषामसन्निधानेऽपि न स्वयं पश्य नश्यति॥"

इत्यत्र आदर्शत्वेन यो रूपकविन्यासः कृतः तत्रापि न केवलमादिराजानां वैयक्तिकदानविक्रमादिजन्ययशोमात्रप्रतिकृतिरेवाभिप्रेता, अपि तु तत्तन्महाराजकालीनसद्यशःप्रयोजकीभूता या या धर्म—समाजादि निबन्धनाः परिस्थितय आसन् ताः सर्वा अपि कवितात्पर्यविषयीभूताः । तासां सर्वासामपि प्रतिकृतिर्वाङ्मयादर्शे दृश्यते । इदं तु बोध्यम् । अद्य यद्यत्प्रतिबिम्बत्वेन वाङ्मयादर्शे दृश्यते, तस्य तादृग्रूपमेव मूलभूतं बिम्बं पूर्वस्मिन्काले परमार्थत आसीदिति निश्चेतुं न शक्यते । यच्च बिम्बत्वेन ग्राहितमादर्शे तदेव सम्यग् गोपायितं दृश्यते । यच्च वास्तविकं प्रवृत्तं तदेव ग्राहितं वाङ्मयादर्शे इत्यत्र न प्रामाण्यं वाङ्मयस्य । तदानींतनां परिस्थितिं याथार्थ्येन विज्ञातुमितिहाससंशोधनमेवापेक्षितम् । दृश्यमान उपक्रमादि विरोधपरिहारपूर्वकवाक्यार्थविचारमात्रेण न निर्वाहः । तस्मात् सुरभारतीपरिचर्या विच्छित्तिविशेषशालिन्या नवीनयैव सरण्या कल्पनीया ।

प्रस्तुते संस्कृतस्याध्यनं द्विविधं दृश्यते । संस्कृतस्य संस्कृतत्वेनाध्ययनमेकम् । इतरभाषावच्छेदेनाध्ययनमपरम् । यूरोपदेशेषु अप्राधान्येन प्रीक-

ल्याटिनमभ्यसन्त इवात्रापि कलाशालासु संस्कृतमधीयानाः प्रायशोऽन्यभाषा
कला-शिक्षणेष्वेवात्यन्तमभिनिविष्टाः " संस्कृतमपि ज्ञायत, इत्येव संतुष्यन्
न्तरङ्गाः बहवः सन्ति। एते द्वितीयां कक्ष्यामधिशेरते। एते प्रायशो विस्मरणा
येव प्रारभन्ते संस्कृतम्। ईदृशं नाममात्रेणैवाध्ययनं संस्कृतस्य नापेक्षितम्।
अत्रापि ये संस्कृतमेव प्राधान्येनाधीयते तेष्वपि स्फूर्तिमन्तः संशोधनपरास्तत्त्व
विदो विमर्शकाः संघटनात्मकसंस्कृतवाङ्मयप्रासादनिर्माणचातुरीचुम्बिधिष
णाशालिनो विरला एव। प्रथमपक्षमाश्रिताश्च यद्यपि श्रद्धया वा आचार इति
वा भूषणमिति वा केचन अधीयते। तथापि प्रस्तुतपरिस्थितीः पर्यालोच्य
ईदृगध्ययनमनत्युपयोगीति प्रतिभाति । आमूलाग्रं विस्तृतस्यापि ग्रन्थजातस्य
कण्ठतः पठनम् । अनपेक्षितार्थविचारमाम्नानमात्रेणापूर्वसिद्धिरित्यसदाग्रहः।
सर्वाङ्गीणं पाण्डित्यमनवाप्यैव सार्वभौमा इति मिथ्याभिकत्थनं नातिशोभाग्रहम-
स्मिन्नवे युगे प्रत्यहमधिकेनैव प्रमाणेन इतरदेशैः सन्निकृष्यमाणसम्बन्धे
भारते। रप्रत्याहारः कथं सिध्येत् इति असकृदतिगम्भीरभाष्याब्धिनिमज्जनो-
न्मज्जनसाहसं, सत्यन्तदलस्य पुनर्वैयर्थ्यं कथं कल्प्यमित्यनल्पकल्पनातरङ्गः,
मिथ्यात्वनिरूपणे अपच्छेदन्यायस्य वैषम्यं तद्भङ्गः तत्परिहारश्चेति अश्रान्त-
चिन्तासन्तापः, विशिष्टविधौ मत्वर्थलक्षणायाः स्वीकारेऽपि तस्या अयुक्तत्ववाद-
कुतूहलः, अङ्गीकृत्यापि ध्वनिं कुत्रचित्पुनस्तस्यान्तर्भावने भावनातिशयः
एतेऽन्ये चाकिंचित्प्रयोजका व्यापारविशेषा मेधापाटवं वृथा जरयन्ति। एतेन
संस्कृतस्याध्ययने सुलभोऽपि भागः कठिनायते । अहमपि संस्कृतमधीयीयेति;
कर्तव्यताबुध्द्या प्रेरितोऽप्युन्मनायते । काव्यशास्त्रपारदृश्वाऽपि को जानाति
परिश्रमान् ममेति निर्विण्णो जायते। तस्मान्नायमपि पन्थाः श्रेयान्। तस्मात्
"पुराणमित्येव न साधु सर्वम्' इति न्यायमनुसृत्योभयोः पथोर्माध्यस्थ्यमवलम्ब्य
प्राचीनसंप्रदायमनपहाय प्रस्तुतपरिस्थितेरनुकूला परैरपि सकौतुकमनुसरणीया
काचिदभिनवा अनादीनवाध्ययनसरणिरङ्गीकार्या। Horrwity नामा कश्चन
पाश्चात्यपण्डितस्तथ्यमेवाह" संप्रत्यार्याणां विचारसरणिर्नाम निराधारःस्तम्भः

नरिसं फलं' शब्दाडम्बरमात्रम्, केवलो युद्धोन्मत्तोऽट्टहासः कृत्रिमं रत्नम्," इति, अस्मिन्नवे युगे अपरिहार्यत्वेन समुपस्थितानां प्रमेयाणां व्यवस्था नव्यसंस्कारमण्डितयैव विचारप्रणाल्या कल्पनीया । एतेन प्राचीनसंप्रदायः सर्वथा त्याज्य, एवेति मा शंकिध्वम् । स एव प्राचीनः सम्प्रदायः प्रतिक्षणमभिनवमतर्कितं रूपं प्रतिपनीपद्यमानस्य जगद्व्यापारस्य आनुकूल्येन परिणिणंसिषितः ।

शास्त्राणामध्ययनेऽपि वयं संकुचितदृष्टय एवाभवाम । अवैदिकानि बौद्धजैनादीनि मोहशास्त्राणीति, वैदिकैकदेशानि गौतमीयपातञ्जलादीनि खण्डितानीति जैमिनीयं वैदिकमपि जडैकप्रतिपादकं बन्धहेत्विति न श्रद्दध्मः । मोक्षैकहेतुवैयासकं यद्यप्यादरेण पापठ्यंते बहवः । तथापि शास्त्रकृतां तात्पर्ये निर्णीयमाने विप्रवदमाना एव सर्वे । वस्तुतस्तु प्रभाचन्द्रविरचितप्रमेयकमलमार्तण्डः शब्दतोऽर्थतश्च कथमिव साहाय्यमुपजनयाति श्रीजयतीर्थविरचितन्यायसुधापिपाठिषोरिति न पुनः प्रतिपिपादयिषितम् । आश्रीयेते गौतमीयं पातञ्जलं च परमतनिरासे स्वधर्मानुष्ठाने च प्रत्यहम् । तथापि प्रकटीक्रियत एव महानादरस्तयोः । एतेन तत्त्वजिज्ञासामूलकशास्त्राध्यनप्रवृत्तिर्व्याहन्यते संकुचितास्वार्थबुद्धिरेव दृढा भवति । समाजव्यवस्थाप्याकुलीभवति । वस्तुतः पूर्वापरपर्यालोचनया एतेन योगः प्रत्युक्तः, इति सूत्रयता व्यासेन पतञ्जल्युपज्ञमेव योगशास्त्रं निराकर्तुं प्रावर्तीत्यत्रापि अस्ति महती विप्रतिपत्तिः । वैदिकस्यापि मीमांसाशास्त्रस्याध्ययनं त्वितोप्यधिकतमां हीनां स्थितिमगमत् । नास्तिकं दर्शनं तदिति कर्मप्रतिपादकं जडशास्त्रं तदिति नैवाद्रियते " मीमांसयेव भगवत्यमृतांशुमौलौ,, 11-64 इति श्रीहर्षस्यापि स्मर्यते । परं शबरभाष्यादीनि यदि सूक्ष्मदृष्ट्या पर्यालोचितानि स्युस्तदा नेदं शास्त्रं लोकायतसब्रह्मचारि न वा जड (कर्म) प्रतिपादकमिति शक्यमूहितुम् । इदं तु सत्यम् उपवषादिभिर्यान्युदाहरणवाक्यान्युपनिबद्धानि तानि सर्वाण्यपि कर्मकाण्डादेवोद्धृतानि । तदानीन्तने काले प्रतिगृहं वितानधूमस्तोमदर्शनात्

सर्वजनीनत्वाच्च कर्मप्रतिपादकवेदभागस्य तान्येव वाक्यानि सुलभवेदनीयानीति उपबृंहितानि। अधुना तु न तादृशी परिस्थितिः कर्मणोऽपि स्यात्। अत एव दुरूहता तादृशवाक्यगर्भितस्य। शास्त्रान्तरसिद्धान्तप्रतिपादनेषु मीमांसाया विनियोगः क्रियते। पूर्वमीमांसाया उत्तरमीमांसाङ्गत्वमिति प्रतिपाद्यते। उभयोरेकशास्त्र्यमित्यपि प्रपञ्च्यते, तथाप्यस्याध्ययनं लुप्तप्रायमेव। तस्माद् व्यवहारोपयोगितया इदं शास्त्रं नूतनयैव सरण्या अध्येयम्। उपयोक्तव्यानि चैतच्छास्त्रतत्त्वानि दैनंदिनव्यवहारेषु। मीमांसाशास्त्रविषये उदासीना वयं सामान्यतः व्यवहारविमुखा एव संवृत्ताः। परमार्थतस्तद्व्यवहारायात्यन्तमुपयोगिशास्त्रम्। तस्मिन् दुरूहं लोकविद्विष्टम् रूपं अस्माभिरेवाध्यारोपितम्।

प्रस्तुते कालानुगुण्येन सौलभ्येन शास्त्रावगतये लौकिकवाक्यान्यपि शक्ययोजनानि। दृश्यते चास्योपयोगोऽन्यत्र कर्मकलापात् केवललौकिके धर्मशास्त्रे। निबन्धनकारैः स्मृत्यादिव्याख्यानेषु या सूक्ष्मतमा विचारसरणिः समवालम्ब्यत, तामनवगम्य अन्यथैव प्रतिपद्यमानान् प्राड्विवाकपरिष्कारान् दर्शं दर्शं विस्मयं प्राप्नोति चेतः। माननीयैः के. टी. जयस्वालमहाशयैः "ये संग्रामः समितयः तेषु चारु वदेम ते" इत्याद्याथर्वणादिमन्त्राणां गूढार्थविचारणया विशिष्टस्मृतिपुराणादिवाक्यार्थपरिशीलनेन चाणक्यादिनीतिमनुसृत्य चास्मद्धर्मशास्त्ररहस्यानुसन्धानपूर्वकमस्मृतपूर्वा प्राड्विवाकपद्धतिः सप्रमाणं प्रत्यस्थापि, तेन वेदकाले राज्यपरिपालनक्रमः प्रजाव्यवहारक्रमश्च कथमासीदित्यूह्यते। अत्र विषये धर्मशास्त्रसंशोधनं बहुकर्तव्यमस्ति। L. L. B. प्रभृतिषु प्राड्विवाकपरीक्षासु भारतेतरदेशेषु प्रचलितविभिन्नधर्मशास्त्रसंप्रदायाः व्यवहारन्यायरहस्यानि (Jurisprudence) च यथा पाठ्यन्ते तथैव ते संस्कृतप्रणयिभिरपि पठनीयाः। तेन व्यवहारज्ञानं विपुलं संपद्यते॥ किंच मीमांसायाः सक्रमाध्ययनेन बहूनां बहुमूल्यानां प्रमेयाणां विशेषावगतिर्भवति। त्रैवर्णिकव्यवहारः सुलभः सम्पद्यते। स्त्रियोऽपि वेदेष्वधिक्रियन्ते। अन्ये च

प्रस्तुतोपयोगिनो विषयाः गोचरीभवन्ति। तस्मान्मीमांसाशास्त्रं व्यवहारोपयोगायाध्येयम्।

अध्यापनक्रमेऽप्यस्ति विशेषःसाम्प्रदायिकानाम्। ऐदम्प्राथम्येन प्रथमायामेव कक्ष्यायां प्रविष्टाय विद्यार्थिनेऽविपक्वबुद्धयेऽपि उद्ग्रन्थस्थान् दुरूहविषयान् बलात् बोधयितुं प्रक्रमन्तेऽस्मदुपाध्यायाः अस्मिन् साहसेऽध्येतॄणां योग्यताभिवृद्धेराशा तु दूरतोऽपास्ता। छात्रसंसदि आचार्येण लब्धप्रतिष्ठेनैव भवितव्यम् इति स्वार्थबुद्धेरेवोत्कर्षः प्रायशः सर्वत्र। इयं मध्यकालीनाध्यापनपद्धतिः सर्वथा परित्याज्या। मन्ये संस्कृतह्रासकारणेषु इदमप्यन्यतमत्। अत्रैव कस्यांचिद्वार्तापत्रिकायामचिरादेव श्रुतो विषयो निवेद्यते चेत् मन्ये न भवेदप्रस्तुतम्। यूरोपखंडे तद्देशभाषासु अधिगतनैपुण्यो विद्यार्थी केवलं त्रिष्वेव वर्षेषु सकलसंस्कृतवाङ्मयाध्ययनं दाप्यते। अल्पीयसैव कालेन सुदुरूहेष्वपि काव्यशास्त्रादिविषयेषु सः विमर्शनाय कल्पते। यतोऽध्ययनं न कृत्स्नायाः ग्रन्थानुपूर्व्या बुद्धौ समावेशनम्, अपि तु पठ्यमानग्रन्थरसस्यास्वादनं, तादृशकल्पनासाजात्योत्पादनशक्तेः संस्कारस्य वा लाभः। तस्मादत्रापि गीर्वाणभाषाया अध्ययनेऽध्यापने च यावच्छक्ति सुलभोपायाश्चिन्त्याः। B. T. इयत्तायामिव बालानां प्रौढानां च विद्यार्थिनां नैसर्गिकीमभिरुचिं, योग्यतां, पाठ्यमानशास्त्रवैशिष्ट्यं चानुसृत्य मानसशास्त्रसिद्धान्तानुरोधेन विषयप्रवेशसौलभ्योत्पादिकाः पठनपाठनपद्धतयः अत्रापि स्थापनीयाः। अपिच ग्रीकरोमकचीणादिविविधविख्यातदेशेषु परंपराप्राप्तानध्ययनाध्यापनसंप्रदायविशेषान् तुलनात्मकदृष्ट्या सम्यक्परिशील्य तेभ्योऽप्युक्तांशाः संग्राह्याः। अन्नामलै (चिदंबरं) विद्यापीठप्रवर्तकेभ्यः परःशता धन्यवादाः, यैः प्राच्यविद्यापरीक्षाक्रमेऽपि L. T. पदवी नियोजिता।

पुराणग्रन्थानामध्ययनं त्वितोऽपि क्षोदिष्टां स्थितिमवाप। गहनविषयाणि शास्त्राणि सामान्यजनतया अनाकलनीयानि। तेषूपयोक्तृकृतो दोषः बाह्य एव। पुराणेषु तु प्रक्षेपणकृतो दोषः आन्तरङ्गिकोऽपि। वस्तुतः पुराणानि प्राचीनसंस्कृतेर्विभिन्नधर्मरहस्यानां च सुलभद्योतनाय सामान्यजनानामुपकाराय विरचि-

तानि । अत एव " इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् " इति पुराणानां विनियोजकं वाक्यं संगच्छते । तथापि पुराणग्रन्थानामतिविस्तरात् उपक्रमादिलिङ्गैर्मुख्यं तात्पर्यं साधारणैर्निर्णेतुमशक्यम् । तेषु प्रक्षिप्तांशबाहुल्याच्च सर्वेषां तेषु विषये पुराणं तु परित्यजेत्, इत्यभिप्रायः स्वभावसिद्धः । अहं तु सविनयं प्रार्थये–अकृत्वैव पूर्वापरपर्यालोचनामीदृशेऽभिप्राये दुराग्रहो न कार्यः । आपाततः स्वविरुद्धार्थप्रतिपादकानि बहूनि पुराणवाक्यानि समुपलभ्येरन्, तथापि मन्येऽत्र विरुद्धधर्माणां समवायो न दोषाय । यतः तानि विभिन्नदेशकालपरिस्थितीर्ज्ञापयन्ति । पुराणानां कालकृतपौर्वापर्यनिर्णयमूलामेकवाक्यतां सम्पादयितुं विशेषो यत्न आस्थेयः। पुराणविमर्शनस्याप्यस्ति क्रमविशेषः, सप्रयत्नैरेवान्वेष्टव्यः। ' पुराणानि कृत्स्नस्य वाङ्मयशरीरस्य रोगस्थानानी,त्यपि कश्चित् । तत्तु न श्रद्धेयम् ।

न केवलमित्थं प्राचीनसंस्कृतेः जीर्णोद्धारपद्धतिरेवाङ्गीकार्या, अपि तु यद्यदन्यत्राऽपि चारुतयोपयोगार्हं दृष्टं तदपि स्वीकृत्य तेनालंकार्या सुरभारती । प्रतिदेशं विभिन्नरूपेण परंपराप्राप्तस्य कविसंप्रदायस्यापि तुलनात्मकतया अभ्यास आवश्यकः । अन्यराष्ट्रीयाणां महाकवीनां सूक्तयः रसभावसमन्विताः केवलमस्मत्कविसमयविरुद्धा इति न त्याज्याः । निसर्गसुन्दरे स्वभावरमणीये रसपरिप्लुते परकाव्ये निमज्य अलौकिकतादात्म्यानन्दमनुभवितुं द्रवीभूय प्रवहमानामयस्कान्तेनेव समाकृष्यमाणां सहृदयस्य सादरप्रवृत्तिं को निवारयेत्। तस्मात्पाश्चात्यमहाकवीनां काव्यान्यपि संस्कृतभाषायां परिवर्तनीयानि।

संस्कृतभाषायां लेखनव्यवसायः अद्यापि स्तनन्धयावस्थां न मुञ्चति । स तु महता परिमाणेन विवर्धनीयः । कृतविद्यैरनवद्यैर्गद्यपद्यात्मकनिबन्धनिर्माणोद्यमः विस्तृतिं नेयः। 'गद्यं कवीनां निकषं वदन्ती'ति विशेषतः रसविशेषान् पुष्णन्तः सरलसरला अनतिविस्तृता उपदेशपरा लेखा आल्हाददायिन्यः देवगुरुराजभक्तिविवर्धिन्यः कथाश्च संग्रथ्य प्रकाशनीयाः । अतिगंभीरा विविधप्राचीनाध्यात्मिकादिशास्त्रीयविषया अत्यन्तोपयोगिनः पदे पदे कौतुकमादधाना व्यवहारजीवातवः अभिनवभौतिकशास्त्रविषयाश्च मधुरां मनोहरां च

रीतिमाश्रित्य साधारणजनानां सुलभज्ञानाय लघुपुस्तकमालिकादिद्वारा बोधनीयाः । अनया सरण्या सुलभतापादनीया । तेन जनाः परां निर्वृतिमापन्नाः "प्रथमालीढमधवः पिबंति कटुभेषज" मिति न्यायेनाभिमुखीभवन्ति । सर्वतोमुखं च व्यवसायप्रेरकं तादृशं वातावरणमुत्पाद्यम् । नियतकालिकानि मासिक-साप्ताहिक-दैनंदिनानि उच्चतमानि पत्राणि संमुद्र्य प्रथनीयानि । जनांश्चैकीकृत्य तेषु गीर्वाणभाषायाः कार्यकर्तृत्वशक्तेर्विकासाय एते अन्ये च यत्ना विधेयाः । श्रीगलगलीरामाचार्याः तथा श्रीबुर्लीश्रीनिबासाचार्याश्च अस्मिन् विषये विशेषतः प्रशंसार्हाः । येषामश्रान्तपरिश्रमाणां परिणतिरूपा एकैव मधुरवाणी सुमधुरैर्मनोहरैरालापैः सकलानाल्हादयन्ती अत्र कर्णाटदेशे कर्णकर्णमटति । हन्त ! सहृदयास्तु माधुर्यास्वादमात्रदत्तादरा ! दृश्यंते । मधुरवाणी निसर्गमधुरा क्षुत्क्षामकण्ठाऽपि मधुरालापान् न मुञ्चति । तस्मात्प्रार्थये संस्कृतप्रणयिभिरादौ मधुरवाण्या एव संवर्धने संगोपने प्रयर्तितव्यम् ।

अन्ते च सर्वान्तर्यामिणं सर्वनियामकं भगवन्तं प्रणम्य प्रार्थये यत् स एव सर्वव्यापी अव्याजकरुणामूर्तिः अव्यानां नः चेतस्सु सुप्तां व्यावृत्तव्यापारां वाचं संजीव्य व्यामोहान् व्यावर्त्य नव्यामिव दिव्यां स्फूर्तिमुत्पाद्य तथा व्यापारयितुं नः सामर्थ्यं प्रयच्छतु, यथा निरन्तरं निरन्तरायं गीर्वाणव्याहारादिव्यासङ्गपरायणाः वयं सुरभारतीसपर्यां विदधीमहि ॥

॥ उपहारसमर्पणम् ॥

ले. पं. कृष्णमूर्तिशास्त्री आर. डी. कालेज मथुरा.

साहित्यामृतवर्षणेन सुहृदां सारस्यमुल्लासय
न्त्यत्यन्तं ददती मुदं च सुधियां शास्त्रार्थचर्चादिना ।
धर्माधर्मविवेचनेन महतां व्यातन्वती कौतुकं
चेतो रञ्जयते न कस्य, मधुरा वाणी यथार्थाभिधा ॥१॥

समिन्धे दुर्वादिद्विरददमने पञ्चवदनः
महामोहध्वान्तप्रसरपरिहारेऽहिमकरः ।
विसारो ज्योत्स्नाया बुधहृदयनीलाब्जदलने
वितन्वन्नानन्दं भुवि मधुरवाण्याः परिचयः ॥२॥

पवित्रतरसंस्कृतव्यवहृतौ विधातुं रतिम्
क्षितौ प्रववृतेतरां मधुरवाण्युदीतत्वरा ।
व्यतीत्य शरदां भृशं विजयिनी स्वयं पञ्चकम्
महोत्सवसुखं बिभर्त्यहनि षष्ठवर्षादिमे ॥३॥

अहमहमिकामातन्वाना विपश्चिदुपाश्रिताः
य इह सुमहे सञ्चेरन्परस्परकौतुकात् ।
प्रविदधतु ते मोदात्स्तोमं फलेग्रहिमाशिषाम्
स्वदुहितृनिभां *पत्रीं दृष्ट्वाप्यरिष्टलवोज्झिताम् ॥४॥

आध्यक्ष्यं क्षमते क्षमाऽत्र विदुषी निर्वोढुमब्दोत्सवे
मूर्ता संस्कृतसाहितीव कवयित्र्येषा सती पण्डिता ।
गद्वाल्न्यायविदीश्वरः सुविदितः प्रेम्णाऽऽर्यगृह्यः- सुधीः
आध्यक्ष्येण परिष्करोति सदसीं गीर्वाणवाग्वर्धिनीम् ॥५॥

गीर्वाणवाग्वर्धिनीयं परिषत्, पत्रिका च नः ।
संपादकाभ्यां साध्यक्षवैदूर्याभ्यां विराजतः ॥६॥

सौभाग्यवत्याः क्षमादेव्या अध्यक्षभाषणम्

अयि भोः पूज्याः प्रियबान्धवाः,

नूनमयं मे सुकृतस्य परिपाको यदनेकेषु वाचस्पतिसदृशेषु स्थितेष्वपि पण्डितप्रवरेषु सभाध्यक्षतायामेषाऽधिक्रिये। अथवाऽयं बहुमानः श्रीमधुरवाण्या एव साजात्यपक्षपातं किल सूचयति। अन्यथा पुरुषपुङ्गवभूयिष्ठेऽस्मिन् सदसि स्त्रीमात्रस्याध्यक्षपदगौरवं कथं वोपनमेत्। इदं तावद्यथा तथा वाप्यस्तु। मया पुनरिदानीमकुशलयापि वाक्कुशलानां पुरस्तात् किमपि जल्पितव्यमापतितम्। 'न खलु कोकिलाः कूजन्तीति काकैर्मूकीभूयते' इमं लौकिकन्यायमनुरुन्धाना स्थानगौरवेणापि प्रेर्यमाणा प्रकृतावतरणं करिष्ये।

२. तथाहि—संस्कृतवाणी व्यावहारिकभाषा पूर्वमासीदिति प्राज्ञा ऐतिहासिकाः प्राहुः। तदेतदसहमानास्तु बहवः प्रत्यवतिष्ठन्ते यदेषा लोकसामान्यस्य व्यवहारसाधनीभूता न कदाप्यासीदिति। उदाहरन्ति च तत्समर्थनाय

संस्कृतं व्यवहारभाषा।

गौतमबुद्धस्याचरितम्। स खलु लोकानां संस्कृतानभिज्ञतामनुसन्धाय तदात्वे सुप्रचारां पालीसमाख्यां भाषां धर्मोपदेशसाधनतया स्वीचकार। स च समयः सार्धद्विसहस्रवत्सरेभ्यः प्राचीनः। तदानीमेव लोकव्यवहाराद्बहिष्कृता गीर्वाणवाणी कथमर्वाचीनकालेषु व्यावहारिकभाषा स्यादिति। इदं किलाविचाररमणीयम्। पाली नाम भाषा संस्कृतस्यैवापभ्रंशः। उभयोश्चात्यन्तनिकटः सम्बन्धो वर्तते। अनधीतपालीवाङ्मयेनापि संस्कृतज्ञेन सा वाणी सरहस्यमवबोद्धुं शक्यते। या देववाणी आविद्वत्पामरं व्यवहारसिद्धा बभूव, सैव स्वभावजन्यैः कारणैरागतप्रतिबन्धा पामरेषु म्लानिं गताभूत्। अत एव तदपभ्रंशरूपेण समुदियाय पाल्याख्या भारती। एकस्या एवाङ्ग्लभाषाया अपि रूपान्तरेण परिणताः सुप्रचरिता वाग्विशेषाः पाश्चात्यजनपदेष्वनेकेषु दरीदृश्यन्ते।

अभिज्ञानां मुखान्निस्सरन्ती वाणी जानपदानामन्यतरेव प्रतिभायात् । अतस्तदुपदेशप्रसङ्गे तज्जनपदनिरूढयाऽभ्रष्टया गिरा व्यवहारस्तेषामवबोधसौकर्यमुत्पादयतीति तथाप्रवृत्तिर्युक्तरूपैव । अत एव गौतमबुद्धेनापि सा सरणिः समाश्रिताभूत् । तस्मात्तात्कालिकपालीभाषावृत्तान्तेन संस्कृतस्य लोकव्यवहारबाधनां साधयितुं नोपपद्यते । सूक्ष्मार्थसंशोधनपटवः पाश्चात्या अपि विद्वांसः सामान्यलोकैरप्यनयैव देववाण्या प्राग् व्यवह्रियमाणस्थितिगतत्वमभ्युपगच्छन्ति । क्रिस्तशकस्य चतुर्थसप्तमशताब्द्योरन्तराले भरतखण्डस्य विद्याभ्युदयेन समाकृष्टाश्चीनदेशान्निस्सृत्य दुरवगाहकान्तारपथानप्यतिक्रम्य भरतखण्डं प्रविष्टाः प्राज्ञयात्रिका राष्ट्रमेतदखिलं पर्यट्य सारभूतानि बहूनि सङ्गृह्य स्वदेशं प्रतिनिवृत्ताः किल । त एतामी समुद्घोषयन्ति सुस्पष्टं सविस्मयं च स्वप्रणीतदेशभ्रमणवृत्तान्तेषु यत् संस्कृतमेव सर्वत्र व्यवहारभाषाऽऽसीदिति । इतरैश्च बहुभिः प्रमाणैः संसिध्यत्येव संस्कृतभाषाया व्यवहारसाधनत्वं लोकानाम् ।

३. तत्तादृशी विश्वजनीना गैर्वाणी परमाभ्युदयकोटिमारूढापि कालक्रमेण बहुभिर्निमित्तैः परिहीयमाणा साम्प्रातिकीं शोचनीयां दशां प्रपन्ना । तत्र प्रथमो हेतुः प्रजानामेव स्वयङ्कृतोऽपराधः । ताः किल विदेशीयानां भारतवर्षमाक्रम्य प्रशासतां वैभवस्य समुज्ज्वलतयान्धीकृतास्तदीयवेषभाषाचारव्यवहारानङ्गीचक्रुः । परराजैरित्थमाक्रान्ते भरतवर्षे स्वधर्मच्युतानामार्यवंश्यानां नियन्तारो नृपाश्च पारवश्यं गताः पदभ्रष्टा बभूवुः ।

तदवनतेः कारणानि

यवनराजानामधिकारसमये आर्यधर्माणां सर्वतो हानिः प्रवृत्ता । निखिलधर्मग्रन्थानां मूलभूता देववाणी सामान्यजनमण्डलात्परिभ्रष्टा व्यक्तिविशेषान् शरणीकृत्य स्वस्या नैसर्गिकादमरत्वादेव कथञ्चिज्जीवितमात्रं धारयामास । समयेऽस्मिन् समुत्थितः कश्चित् प्रातःस्मरणीयः सनातनधर्मोद्धारबद्धकङ्कणः संस्कृतविद्यासमुज्जीवनधुरीणो यवनशोणितपिपासाकुलकृपाणो मकुटमणिर्महाराष्ट्राणां भूषणं भटानां निधिर्नीतीनां कुलभवनं कौशलानां कल्पद्रुमायमाणः पण्डितानां शिव इव धृतावतारः शिववीरः । महावीरेण तेन

प्रतिष्ठापिते महाराष्ट्रसाम्राज्ये किञ्चिदुच्छ्वसितेव देववाणी प्रमोदते स्म । ततश्च कालविपर्ययात्पुनरपि मूर्छां प्रपन्नेव सीदन्ती तन्महिम्नः पौर्वापर्यविदां विदुषां चेतांसि पर्याकुलीकरोति । मूर्छामरणयोर्विशेषमजानन्तस्तु पामरास्तामेनां मृतामेव जल्पन्तीत्यहो विडम्बना ।

४ अत्र कश्चन विद्वानीदृशीं दशामनुशोचन् तत्प्रतिक्रियां नरेन्द्रायत्तां जगाद श्लोकरूपेण । तथाहि—

गीर्वाणवाणी कलिसर्पदंशाद्
विमूर्छिता सीदति नः समक्षम् ।
सञ्जीवनेऽस्या न परो नरेन्द्रा-
दिह प्रभुः स्यादिति मे प्रतीतिः ॥ इति ।

उज्जीवनकर्तारः पण्डिता एव

वयमप्येतदभ्युपगच्छामो यदुज्जीवनं संस्कृतस्य नरेन्द्रायत्तमेवेति । परं 'नरेन्द्रः कोऽयमभिप्रेतः' इति विचार्यमाणे मूर्छाप्रतीकाराधानान्नरेन्द्रो विषवैद्य इत्यर्थो झटिति स्फुरेत् । एतत्तु न सङ्गच्छते, विषवैद्यानां संस्कृतोज्जीवनप्रवृत्तेरेवासम्भवात् । अथ नरेन्द्रो राजाऽत्र भवत्विति चेत् अनादरिणो राजानः कथं वात्र स्वयं प्रवर्तेरन् । प्रेरितास्तु काश्चित्काकिणीः प्रयच्छेयुः । तावता मूर्छापगमरूपं संस्कृतोज्जीवनं न भविष्यतीति नरेन्द्रशब्दस्यात्र तृतीयः कोऽप्यन्य एवार्थोऽभिधातव्यः । स च नरेषु श्रेष्ठत्वान्नरेन्द्र इति व्युत्पत्त्या विद्वांसमेव लक्ष्यीकरोति । अतः पण्डिता एव नरेन्द्राः । तैरेव शक्यते मूर्छितामिमां वाणीं पर्यवस्थापयितुम् । अस्याः समुज्जीवने ये महान्तो बद्धादरास्तेऽपि पण्डितसाहचर्यात्सर्वैर्विद्याभिमानिभिर्वन्दनीयाः ।

५ तदुज्जीवनोपायाश्च बहवो विद्यन्ते । प्रथमस्तावत्संस्कृताध्ययने लोकानामुत्साहवर्धनम् । अत्र केचिद्धनार्जनमात्रपराः समकण्ठमाहुः— किन्नाम प्रयोजनमुद्दिश्य संस्कृतमध्येतव्यम् । न तेन जीविकालाभो, न च लौकिकी प्रतिष्ठा । विना प्रयोजनं कः खलु प्रयस्येदिति । एतं पुरुषार्थचतुष्टयस्य स्वरूपबोधनेन संस्कृतस्याप्यर्थसाधकत्वं ग्राहयित्वा प्रवर्तनीयाः । अथान्ये पुनरा-

भाषाणामभ्यसनेनापि संस्कृतग्रन्थानां सार-
चक्षीरन्—आङ्ग्लवाणीप्रभृतीनामितरभाषाणामभ्यसनेनापि कठिनगैर्वाणीपरिशीलनप्रयास इति । एते च
स्यग्रहणं सुशकमेव । कुतो वा कठिनगैर्वाणीपरिशीलनप्रयास इति ।
सर्वभाषाणां गीर्वाणवाण्या एव मातृभूतत्वं संस्कृतग्रन्थानां भाषान्तरीकरणेन
सम्भवन्तीं रहस्यार्थहानिं संस्कृतविद्याया निरुपमं माधुर्यगा-
उज्जीवनोपायाः म्भीर्यलालित्यादिगुणमाहात्म्यं च बोधयित्वा संवननीयाः । इत्थं
देशकालव्यक्त्यनुसारं जनान्प्रोत्साह्य संस्कृतविद्यायामभिरुचिमुत्पादयेत्तदुज्जीवनाय
प्रवृत्तः पण्डितः ।

अथ द्वितीयः—संस्कृतपण्डितैः प्रत्येकशः शिष्याणां सङ्ग्रहः कार्यः। ते च शिष्याः सुलभया रीत्या विद्यायामभ्यन्तरीकरणीयाः । स्वार्थपरतामल्पीकृत्य परार्थप्रवणैरुत्साहशालिभिश्च यदि पण्डितैः शिक्षणोद्यमः क्रियेत तदा लोकानां बहूपकृतं भविष्यतीति न सन्देहः । इदं मे वैयक्तिकं मतमिति प्रियबान्धवैरन्यथा न ग्रहीतव्यम् । आस्ति किल प्राचामत्र सूक्तिः प्रमाणम्। तथाहि 'अवीर्यः पुरुषो न स्यादनपत्या न चाङ्गना। अविद्यो मनुजो न स्याद् 'अशिष्यो नैव पण्डितः' इति सूक्तिः पण्डितेन शिष्यसङ्ग्रहणस्य परमावश्यकत्वमाख्याति । अन्यथा 'जीर्णमङ्गे सुभाषित'मिति कवेर्वचनमैकान्तिकमेव तिष्ठेत् ।

अथ तृतीयः—यथा पुरुषाणां तथा स्त्रीणामपि संस्कृतविद्या प्रदेया। स्त्रियः किल संसारस्य मूलम् । यदि प्रतिगेहं स्त्रियः संस्कृतज्ञा भवेयुस्तदा तदर्भकाणामपि जन्मत एव संस्कृतेऽभिरुचिः समुदेति । ईदृशविद्याप्राचुर्येण गृहे गृहे संस्कृतवाणी समुल्लसन्ती क्रमेण व्यवहारसंसिद्धा परिणमेत् । तस्मादेववाणी मातॄणां भाषा विधातव्या । ततः किल संस्कृतं मातृभाषेति जेगीयमानमर्थवैशिष्ट्यं प्राप्य नितरां शोभेत । अनेकभाषाणां जननीत्वमात्रेण गैर्वाण्याः किं तावद्वैशिष्ट्यम् ।

अथ चतुर्थः—संस्कृतस्य शिक्षासरणौ किञ्चित्परिवर्तनमावश्यकम्। वस्तुपाठान्बालाः संस्कृतेनैव शिक्षणीयाः । इयमभिनवा पद्धतिः पाश्चात्यदेशेषु नियमेन प्रचलति । नियमश्च देशभाषा वा अन्यभाषा वा तत्तद्भाषयैव शिक्षणीयेति । कृते हि प्रयत्ने तस्य क्लेशास्तन्निस्तरणोपायाश्च शिक्षकस्य स्वयमेव

स्फुरन्ति । छात्रैः सह शिक्षकः संस्कृतेनैव व्यवहरन्नल्पीयसा कालेन तेषु महतीं व्युत्पत्तिमाधास्यति । अयं मे परिचितानां केषाञ्चिद्विदुषामनुभवसिद्धो विषयः । तत्साफल्यापत्तौ न कापि विचिकित्सा वर्तते । शिक्षकेणैव संस्कृत-व्यवहारे सुशिक्षितेन भवितव्यमित्यन्यदेवैतत् ।

अथ पञ्चमः—प्रतिग्रामं संस्कृतमण्डली स्थापनीया । तया च तन्निवासिनां संस्कृताध्ययने रुचिमुत्पाद्य प्ररोचकान्विषयानाश्रित्य कृप्तदिवसेषु व्याख्यानानि प्रवर्तनीयानि ।

अथ षष्ठः—ग्रामे ग्रामे प्रतिष्ठितानां सर्वसभानामध्यक्षतया तत्तत्प्रान्तेषु महासभाः परिकल्पनीयाः । यथा ग्रामसभानां कार्यजातं महासभाया नियमानुरोधेन संस्कृतप्रचारे नितान्तमानुकूल्यमापद्येत ।

अथ सप्तमः—वृत्तपत्राणां मुखेन लोकशिक्षणम् । इदं हि हि साम्प्रतं क्वचित्क्वचित्प्रचलतीति यद्यप्यभिनन्दनीयं, तथाप्यनेककोटि-प्रजानां मध्ये दश द्वादश वा पत्रिकाः प्रचलन्तीति किं वा प्रशंसास्पदम् । सत्यप्येवं बीजभूता इमाश्चिराय निष्प्रतिबन्धं जीव्यासुरित्याशास्महे । तत्र साप्ताहिकं पत्रमखिलभारतेऽप्येकमेव '**संस्कृत**' नामकं विजयते । तच्च दशाधिकवर्षकालेन सरलसुबोधसंस्कृतवाचा विविधवृत्तान्तान्वाचकेभ्यः समर्पयति । संस्कृतस्य राष्ट्रभाषात्वसाधनमेव तस्य परमं ध्येयम् । तदर्थमेव सा पत्रिका प्रौढां शैलीं दूरीकृत्य व्यवहारयोग्यामेव वाक्सरणिमूरीचकार । तदर्थमेव च पण्डितानपि बहून् सहकारिणः सञ्जग्राह । **सुप्रभात-मञ्जूषा-ज्योतिष्मती-श्री** प्रभृतयः किञ्चिदर्वागुदयमधिगता अपि नितान्त-विशुद्धसंस्कृतवाण्या समुल्लसिताः सहृदयानां हृदयमाकर्षन्ति । एते सर्वेऽप्युत्तरदेशेषु लब्धजन्मानो दक्षिणापथे विरलप्रचारा दृश्यन्ते । नायमासां दोषः । परं संस्कृतवाण्यां भूयसां लोकानामनभिमान एव तद्विरलत्वे हेतुः । न खल्वेष स्फुरन्मणेरपराधो यदेनमन्धो न पश्यतीति । श्रीमधुरवाणी तावदेकैव दक्षिणापथे प्रधानभूता मोहमयीप्रान्तस्य गीर्वाणवाणीप्रचारसर्वस्वायते । संस्कृतस्य

समुज्जीवनाय क्रियमाणस्तत्सम्पादकमहोदयानामगाधः प्रयत्नः परं प्रशंसनीयः। वृत्तपत्राणां विषये विशेषतो वक्तव्यमेकं किञ्चिद्विद्यते । आधुनिकी लोकस्य प्रगतिरतिक्षिप्रतरा विविधपरिवर्तनभूयिष्ठा च दृश्यते। तदनुरोधेन नवनवाः शिल्पयन्त्रकृषिवाणिज्यसंग्रामसम्बन्धिनः राज्यशासनविधानसम्बद्धाश्च शब्दा लोकानां मुखेषु प्रचारमधिगताः । नानावृत्तान्तवर्णनेषु तेषां संस्कृतपर्याया यत्र नोपलभ्येरंस्तत्र नूतना एव संस्कृतशब्दाः कथञ्चित्परिकल्प्य प्रयोक्तव्याः। अन्यथा शोभना अपि निबन्धाः कदाचिद्वाचकानां वैरस्यमुत्पादयेयुः। वाचकैः परिहासास्पदीकृतानां वृत्तपत्राणां लाघवं सम्पद्येत। न खलु संस्कृतभाषाया-मितरभाषास्विव शब्ददारिद्र्यं विद्यते । तत्तादृशीशब्दसम्पत्तिः कुत्र वाऽन्यत्र भाषायामुपलभ्येत । श्रीमदाचार्यप्रणीतलक्षणशास्त्रानुसारेण शक्यते खलु नवनवान् शब्दान्परिकल्पयितुम् । तस्मात्पत्रसम्पादकमहोदयैर्गत्यन्तरसद्भावे विदेशीयभाषाप्रवेशः सर्वथा न कार्य इति मे मतिः ।

अथाष्टमः—पण्डितप्रचुरेषु तत्तन्नगरेषु प्रतिनगरं गीर्वाणवाग्वर्धिनी-सभाः संस्थापनीयाः । यत्र संस्कृताभिमानिनां सर्वेषामपि प्रवेशः सुलभः स्यात्। यत्र च शास्त्रीया लौकिकाश्च विषया व्याख्यायेरन्। यत्र च नियमा-नुरोधेन सामाजिकाः परस्परं वादप्रतिवादान्प्रवर्तयेयुः। तथाच प्रतिसभमेका संस्कृतवृत्तपत्रिका निष्कासनीया।

अथ नवमः—न केवलं प्राचीनसम्प्रदायरीत्या समधीतसाहित्य-शास्त्रादय एव पण्डिताः सङ्ग्रहीतव्याः, परमाङ्ग्लविद्याक्षेत्रेषु लब्धकीर्तयः उभयविद्यानिपुणाश्च यत्नेन योजनीयाः। तत्सहकारेण संस्कृतोज्जीवनप्रयत्नः शीघ्रपरिपाकी भविष्यति। तत्तत्प्रान्तस्य सर्वेषां पण्डितानां नामावलिः प्रतिसभं रक्षणीया।

अथ दशमः—कुशलैः पण्डितैः संवादशैलीमालम्ब्य लघु-प्रबन्धाः प्रणेतव्याः, येषु स्वदेश्यानां विदेश्यानामपि चारित्रविशेषा हृदय-ङ्गमरीत्या समुपवर्ण्यमाना लोकानां मनोरञ्जका व्युत्पादकाश्च भवेयुः।

६. इत्थं प्रदर्शिताः कतिपये संस्कृतोज्जीवनाभ्युपायाः । एतानि कार्याणि क्वचिद् द्रव्यसापेक्षाणीति यद्यपि सत्यं तथापि परस्सहस्राः संस्कृताभिमानिनः साहाय्यप्रदातारो वर्तन्ते। स्वप्रयत्नातीते बहुव्ययप्रसङ्गे तदुपसर्पणेन भविष्यत्येव चरितार्थता । नानाविधेषु जनोपकृतिकार्येषु पर्जन्यवर्षं द्रव्याणि व्ययीकुर्वन्तो महान्तः विद्याभ्युदयप्रसङ्गेषु नितरां बद्धमुष्टयो न भवन्ति। बहुभिः सङ्घीभूय सत्कर्मणि प्रवृत्तौ द्रव्याभावनिमित्तः प्रत्यूहः कोऽपि न सम्भवेत् ।

७. एतावान्विस्तर एव प्रायेण प्रियबान्धवानां वः सभासदां हृदयोद्वेजकः स्यात् । अतोऽधिकप्रसङ्गान्मया विरन्तव्यम् । इयं तावन्मधुरवाणी ग्राहकानेव शरणीकृत्य कथञ्चित्पञ्च वर्षाणि रिङ्गन्ती षष्ठे

मधुरवाण्याः शुभाशंसनम्

वत्सरे पदमर्पयितुं प्रवृत्ता । अद्यापि तद्ग्राहकाणां संख्या पञ्चशतीं नातिक्रामतीति विज्ञायते । तथापि तत्सम्पादकमहोदयानां प्रयत्नविशेषेण सुस्पष्टमधुरवर्णैर्मृदुललितपदविन्यासै रसभावस्फूर्तिभिर्वृत्तान्तविशेषैश्च सचेतसां चेतांसि प्रतिमासमाकर्षन्ती विराजते। आशास्यते न चिरादेव तद्वाचकानां सङ्ख्याऽधिकाधिका भविष्यतीति। स्वार्थपरित्यागेन लोकानां श्रेयसे परिश्राम्यतां महनीयचरितानां भगवान्नरायणः सुप्रसन्नः सर्वानन्तरायान्दूरीकृत्य व्यवसितस्य कर्मणो वीर्यवत्तामनुग्रहीष्यत्येव । अतोऽस्या मधुरवाण्या जन्मदिवसस्य मङ्गलोत्सवे वयं ' परमाभ्युदयमेषा प्रपद्य गीर्वाणवाणीसमुज्जीवनजन्यं यशः प्राप्नोतु'-इत्याशीर्भिरनन्ताभिरेनां संवर्धयामहे।

८. अद्य मया प्रस्तुतेषु विषयेषु यद् ग्राह्यं तत्परिगृह्य दोषाः श्रीमद्भिर्वर्जनीयाः। अथवा दोषाणामपि शङ्का मया नैव कार्या। कुतः—

रोहणं सूक्तिरत्नानां वन्दे वृन्दं विपश्चिताम् ।
यन्मध्यपतितो नीचः काचोऽप्युच्चैर्महीयते ॥

इत्युक्तरीत्या भवतां मध्यवर्तिनी वन्दनमात्रेण कृतार्था विरमामि इति शम् ॥

श्रीमत्याः मधुरवाण्याः पत्त्रिकापुत्त्रिकायाः पञ्चमे वार्षिकमहोत्सवे शुभाशंसनम्

मधुमधुरवचोभिः मञ्जुभीरञ्जयन्ती
सरसकविनिबन्धैः सौहितीं व्यञ्जयन्ती ।
सहृदयहृदयानि द्राक् समावर्जयन्ती
निरुपमसुखवार्धौ स्वैरमामज्जयन्ती ॥१॥
श्रुतिसरणिविरुद्धान् दूरतो वर्जयन्ती
कुमतिकलुषितानां कल्पनां तर्जयन्ती ।
स्वभजनरतवक्त्रे वैखरीमर्जयन्ती
मुनिबहुमतधर्मे बुद्धिमासज्जयन्ती ॥२॥
अधिधरणि, मनोज्ञां कीर्तिमेवार्जयन्ती
बहिरिव हृदयेऽपि श्रीधरं भ्राजयन्ती ।
ललितपदनिवेशा पत्रिकावैजयन्ती
नयनरुचिरवेषा षष्ठवर्षे जयन्ती ॥३॥
समुचितविरुदश्री-साहिती, रत्न-भूषा-
विलसितविबुधाभ्यां साधु संपादितैषा ।
उपचितरसवर्षा, प्राप्तदीप्तिप्रकर्षा
स्फुरतु जनितहर्षा, पुत्रिका षष्ठवर्षा ॥४॥
जनिशुभदिनवृध्यै, वर्तमाने महेऽस्मिन्
बुधजनमहनीय-श्रीक्षमाऽऽध्यक्ष्यरम्ये ।
हितविहितशुभाशीराशिभिर्वर्धमाना
समनुभवतु नैकानुत्सवानुत्सुकानाम् ॥५॥
रुचिरमधुरवाणि ! प्रीणितप्राज्ञलोके !
कलितललितलीले ! बालिके ! श्लाघ्यशीले ! ।
उपहृतिरियमास्तां, जन्मवर्षोत्सवे ते
गुणरचितसुगन्धि **मालिनीमालिका** मे ॥६॥

पं. एस्. आय्. रामनाथशास्त्री.
व्याकरणसाहित्यशिरोमणिः लेक्चरर् इन् संस्कृत
अमेरिकन् कॉलेज मदुरा.

सुरसरस्वती विजयताम्

स्वागताध्यक्षभाषणम्.

'मुक्तेर्मार्गनिदर्शिनी श्रुतिशतैः, नीतेश्च सम्बोधिनी
सन्मान्यैः स्मृतिविस्तरैः सुखपथादेष्ट्री पुराणव्रजैः ।
साहित्येन सुधारसं सुमनसां संस्रावयन्ती चिरात्
सेयं संस्कृतभारती विजयते सर्वासु भाषास्वपि ॥

अयि सुरसरस्वतीप्रणयपरिपाकपरिप्लुतमानसाः सभागगनाङ्गणे शारद-सुधाकरायमाणाः सुधीशेखराः सोदराः ! समुज्ज्वलतरतारायमाणाः सभास्ताराः सहोदर्यश्च,

इदानीं प्रवर्तमाने मधुरवाणीपत्रिका-गीर्वाणवाग्वर्धनीसभासम्मिलित-महोत्सवे देशविदेशतः केवलं संस्कृतप्रेम्णा समुपस्थितेभ्यः तत्रभवद्भ्यो भवद्भ्यः स्वागतसत्कारं विधातुं नितरां प्रमोदते मे चेतः । अविरता आनन्द-बाष्पधारा स्वयमेव निस्सरति नयनाभ्याम् । समुदञ्चति रोमाञ्चकञ्चुकमङ्गेषु । वागपि सगद्गदायते । सत्यामप्यनर्हतायां प्राक्तनपुण्यप्रभावेण भवादृशानां मेधाविमूर्धन्यानां स्वागतविधामसन्मानलाभेन मन्ये धन्यतममात्मानम् । सर्वतः संस्कृतभाषाप्रसारैकलक्ष्याय अस्मै महोत्सवाय मार्गश्रममनालोच्य धनव्ययमविगणय्य अनिवार्यकार्यराशिमपि दूरतोऽपसार्य यदत्र समुपस्थितं श्रीमद्भिः तन्निस्संशयं गीर्वाणवाण्यां श्रीमतामनितरसाधारणं प्रेमाणमाविष्करोति। सर्वतः प्रसरत्यपि निराशान्धकारे श्रीमद्भिः विकासितः संस्कृतवाणीप्रणय-प्रकाशोऽयं नूनं विशदीकरोति पुनरुन्नतिपथमिति प्रत्येति मे मानसम् । अस्माभिः सश्रद्धं सावधानं च विधीयमानाऽपि सादरसेवा श्रीमतां महानुभावानां योग्यताया अननुरूपैवेति वाढं जानीमो वयम् । तथापि संस्कृत-वाङ्मयामृतपानैकबद्धलक्ष्यैः भवद्भिः न तन्न्यूनता परिगण्यते, प्रत्युत अल्पीयस्यपि अननुगुणाऽपि सेवा स्वादुतया समाद्रियते चेति बलवान् प्रत्ययः किंचिदिव समादधात्यन्तरङ्गम् । संस्कृतप्रेम्णा समागत्य आत्मनः

सान्निध्येन महोत्सवस्यास्य शोभातिशयं पुष्णतां भवतामुपकारभरं न कदापि विस्मरणसरणिमुपनेष्यति कृतज्ञताभारनम्रा **मधुरवाणी गीर्वाणवाग्वर्धनी** सभा च । भवादृशानां प्रथितयशसां साहित्यभक्तानां सहवासलाभेन प्रमोदामहेतमाम् । क्षीरे शर्करेव एलाफलचूर्णमिव, दिविषदां भाषापकर्षस्य अक्षमायाः सरससाहितीनिर्माणक्षमाया विशदयशोभासा अलङ्कृतक्षमायाः **क्षमादेव्याः,** तथा वाचस्पतिरितियथार्थविरुदभाजां निरवद्यगद्यपद्यरचनानिपुणानां **श्रीगुण्डेरावमहाभागानां** चाध्यक्षता नितरां पुष्णाति महोत्सवस्य सुषमाम् ।

अत्र केषांचन अयमाक्षेपो यत् सत्स्वपि पुरुषप्रकाण्डेषु विद्यमानेष्वपि सनातनधर्मधुरीणेषु वैदुष्यबलाया अपि अबलाया अध्यक्षपदारोपणमनुचितमिति । तत्र सविनयमुत्तरं दातुमभिलषामो वयं यद्-अनधीतसंस्कृतानां पुरुषाणाम् अबलाया अपि संस्कृतज्ञानप्राबल्यमवलोक्य तेषां मनसि लज्जया संस्कृताध्ययनबुद्धिः उदीयादिति, धर्ममूलं संस्कृतमनधीत्य केवलमाडम्बरं विदधतां चेतसि 'धिगात्मनो जन्म संस्कृतज्ञानहीनाडम्बरसम्भृतम्' इति त्रपया संस्कृताध्ययने अभिनिवेशः समुत्पद्येतेति, तथा महिलानामपि स्वजातीयायाः संस्कृतभाषावैदुष्यं तन्मूलकं गौरवं चावलोक्य संस्कृतभाषायामभिरुचेरङ्कुरः परिस्फुरेदिति च बुद्धिपूर्वकमेव पण्डिताया अध्यक्षपदसम्भावना विहिता । 'गुणाः पूजास्थानं गुणिषु न च **लिङ्गम्**' इति सारस्वतविभूतेर्भवभूतेः सारभूतं वचनमपि प्रमाणमत्र पोषयति मतं नः ।

अस्मदीयोऽयं कर्णाटकः संस्कृतवाङ्मयनिर्माणे पुरा महतीमेव अलभत ख्यातिम् । मतप्रवर्तकाः सर्वेऽप्याचार्याः पावनतमे कर्णाटके मेधा-नवस्फूर्तिसुरतरङ्गिणीहिमालयायमाने कर्णाटके गृहीतावताराः अशेषविद्वच्छिरोमान्यानि ग्रन्थरत्नानि विरच्य समर्पयामासुःसुरसरस्वतीकण्ठे । मेधाविमूर्धन्याकरतया प्रथितस्यापि वङ्गदेशस्य अनन्यलब्धं गुरुत्वसौभाग्यमन्वभवेदकदा आस्माकीनः गीर्वाणवाणीकर्णाटनपटुतरसमुत्कटयशोभासुरः कर्णाटकः । यद् वङ्गदेशे चैतन्यमतप्रवर्तकः श्रीगौराङ्गप्रभुः निजजन्मना कर्णाटकं पावितवतां श्रीव्यास-

तीर्थनाम्नां यतीश्वराणां शिष्यत्वमात्मनः ख्यापयति स्वविरचिते ग्रन्थे। सकलशास्त्रपारदृश्वानः श्रीविद्यारण्यस्वामिनोऽपि अस्मिन्नेव प्रान्ते गृहीतजन्मानः सुगृहीतनामधेयाश्च अनन्यसामान्यसर्वतोमुखवैदुष्यप्रतिबिम्बीभूतैः विस्मयकरैः ग्रन्थैरप्रीणयन् सुरत्राणीम्। एवं सर्वमतीयैरपि विद्वत्तल्लजैः शास्त्रविषये भगवत्या अमरभारत्या सेवा व्यधीयतैव अप्रतिमम्। कर्णाटकोऽयं विरक्तो मुमुक्षुरिव न केवलं शास्त्रव्यसनी, किन्तु अतुलेन सरससाहित्य-निर्माणकौशलेनापि आत्मनः असदृशीं रसिकाग्रेसरतामाविरकरोत्। चालुक्य—कदम्ब—विजयनगरसाम्राज्येषु समुच्छ्रितेषु जैना वीरशैवा ब्राह्मणाश्च भूयांसः कवयः स्वर्गीयसुधावधीरणाधीरैः स्ववर्णमाधरमाधुरीमधरयद्भिश्च स्वविर-चितका व्यामृतैराकण्ठमतर्पयन्सुरवाग्देवीम्। भूलोकनन्दनवने काश्मीरदेशे लब्ध-जन्मापि कवितल्लजो बिल्हणकविः निजस्फूर्तिकलिकाविकासाय सर्वतोऽनुकूलवातावरणं कर्णाटकमेव समाश्रित्य विरचयामास **'विक्रमाङ्कचरितं'** नाम असकृत्पठितमपि नव्यमिव भासमानं रस—रीति—गुणभव्यं काव्यम्। कर्णाटके न केवलं पुरुषा एव गुणवत्कवितापत्यजनकतया कीर्तिभाजः, अपितु ललना अपि स्वीयकाव्यरचनाविचक्षणतया पुरुषानपि अत्यशेरत। कविकुलललामभूता अन्वर्थितनामधेया **विजयाङ्कादयः** कवयित्र्यः उपलब्धैः कतिपयैरेव हृद्यैः निरवद्यैश्च पद्यैरद्यापि हृदि आकलयन्ति अननुभूतपूर्वामानन्दलहरीं यशश्शरीरेण विद्योतमानाः। विजयाङ्कायाः आत्मनः साहित्यसामर्थ्यविषये कीदृशः अभिमान आसीदिति तस्या एव हृदयङ्गमेन पद्यद्वयेन स्पष्टमभि-व्यज्यते। तद्यथा—

एकोऽभून्नलिनात्ततश्च पुलिनाद्वल्मीकतश्चापरः
ते सर्वे कवयो भवन्ति पुरतस्तेभ्यो नमस्कुर्महे।
अर्वाञ्चो यदि गद्यपद्यरचनैश्चेतश्चमत्कुर्वते
तेषां मूर्ध्नि दधा(दा)मि वामचरणं **कर्णाटराजप्रिया**॥

सरस्वतीव कार्णाटी विजयाङ्का जयत्यसौ।
या वैदर्भगिरां वासः कालिदासादनन्तरम्॥

अहो कीदृशो वास्तवो वैदुष्याभिमानस्तस्याः। धन्या खलु विजयाम्बा, धन्यतमश्च तस्या जन्मभूमिः कर्णाटकः। तथा विजयनगरसाम्राज्ये वीरकम्पनाम्नो भूपतेर्महिषी गङ्गादेवी नाम स्ववल्लभविजययात्रावर्णनपरं सरसं सरलं प्रसादगुणमेदुरं विद्वन्मूर्धान्दोलनक्षमं कालिदासकृतिसोदरं '**वीरकम्पचरितं**' नाम काव्यं विधाय अजरामरां कीर्तिमवाप। तस्मिन् काव्ये पद्यमेकं वैदेशिकभाषाप्रणयिनः साधु जागरयति।

'न तथा कटुघूत्कृताद् व्यथा मे
हृदि जीर्णोपवनेषु घूकलोकात्।
परिशीलितपारसीकवाग्भ्यो
यवनानां भवने यथा शुकेभ्यः॥ इति॥

अहो स्वदेशाभिमानः, अहो स्वभाषाभिमानो विजयनगरसाम्राज्ञ्याः। विदेशीयभाषाऽऽचारप्रणयिभिरवश्यं कण्ठस्थीकरणीयं पद्यमिदमवश्यं, येन मनसि अल्पीयस्यपि व्रीडा जायेत आत्मनो दुर्नीतिविषये। तथा अन्या **तिरुमलाम्बा** नाम विजयनगरराजमहिषी प्रगल्भरचनाशैलीपरिष्कृतं **वरदाम्बिकापरिणयं** नाम चम्पूकाव्यं निर्माय भूमण्डलसाम्राज्य इव साहित्यसाम्राज्येऽपि नैजं सर्वतोमुखमसामान्यं सर्वमान्यं च प्रभुत्वं प्रकटीचकार। काव्यमिदं वाराणसेयसंस्कृतमहाविद्यालयेषु परीक्षाक्रमे साहित्यशास्त्रिनाम्नि तृतीयखण्डे पाठ्यपुस्तकत्वेन अस्मिन्नेव वत्सरे न्ययोजि इति संश्रुत्य परप्रान्तेष्वपि कर्णाटककवयित्रीगौरवेण सन्तुष्यामः। विषीदामश्च तत्काव्यनामाऽप्यश्रुतवतां कर्णाटकीयानामौदासीन्येन। विजयनगरराजानो महिष्यश्च न परमुखेन साहित्यसुधां पपुः, परं स्वनिर्मितकाव्यामृतं पाययामासुः सहृदयान्। ईदृशसौभाग्यानुभवः प्रायो विरल एव राजकुलस्य। इदानींतनैः अनुचितेषु कृत्येषु मुसलधारं धनं वर्षद्भिः संस्कृतनामाऽप्यश्रुतवद्भिर्भूपालैः विजयनगरभूपतिचरितेनात्मनश्चरितं तोलयन्तु, येन क्षणमपि अपत्रपया सुबुद्धिरुपजायेत। संस्कृतविषये प्रणयाङ्कुरः समुत्पद्येत। किंच जगति यद्व्याख्यानं विना सहृदयाः कालिदासगिरां सारं वेत्तुमेव न प्रभवन्ति,

भारवेरर्थगौरवमवगन्तुं न पारयन्ति, माघकवेः काव्यस्वारस्यमनुभवितुं नेशिरे श्रीहर्षकवेः नैषधकाव्यरसपोषावगमतोषं नासादयन्ति, यश्च काणभुजीं वाणीमजीगणद्, वैयासकीं वाचमवाशासीद्, अन्तस्तन्त्रमरंस्त, पन्नगगवीगुम्फेषु चाजागरीद्, अक्षपादस्फुरां वाचां रहस्यमाकलयद्, लोके यदुपज्ञमेव विदुषां सौजन्यजन्यं यशोऽभूद्, 'यस्य च वयः माघे मेघे गतं' स च सकलसाहित्यसाम्राज्योपकारकः कोलाचलमल्लिनाथः अस्मिन्नेव कर्नाटके निखिलसहृदयजेगीयमानं जन्म लेभे गजेन्द्रगडाभिधाने पत्तने इति नितरां गौरवावहमभिमानास्पदं चेदं कर्णाटकस्य। एवं कर्णाटकः प्राचीनकालादपि प्रणयातिशयविहितेन सुरभारतीसेवनेन भेजे शारदसुधाकरावदातं यशः ।

कालमहिम्ना वा परिस्थितिप्रातिकूल्येन वा साम्प्रतं संस्कृतभाषाया विपन्ना दशा दरीदृश्यते। या खलु पुरा काश्मीरेषु स्मेराननना प्रतिसदनमादृता न सस्मार सुरलोकम्। वङ्गेषु अङ्गेषु कलिङ्गेषु च रिङ्गन्ती माङ्गल्यभाजनमभूत, कोसलेषु विपुलैर्विलासैरुदभासत, विदर्भेषु गर्भगृहमपि प्रविवेश, महाराष्ट्रेषु महान्तं सत्कारमवाप, कर्णाटके अवर्णनीयं गौरवमलभत, मद्रेषु सर्वतो भद्रं, केरलेषु विरलेतरप्रचारं, चोलेषु अचलां स्थितिम्, आन्ध्रेषु सान्द्रामानन्दपरम्परां चाविन्दत, सैवेदानीं संस्कृतभाषा शोचनीयां दशामनुभवति। तदस्याः संस्कृतिलतामूलायाः सुरगिरश्चावनतिकारणविवेचनापेक्षया पुनरुज्जीवनोपायान्वेषणमावश्यकमिति मे प्रतिभाति ।

अत्र केचिदाक्षिपन्ति — सतीषु सकलोपकरणसम्पन्नासु समृद्धासु देशभाषासु मृतकल्पायाः किं बहुना जराजीर्णतामासाद्य मृतायाः संस्कृतभाषाजरत्या बहुश्रमसाध्ये को वा लाभ इति । अस्याक्षेपस्येदमेवोत्तरं यत् संस्कृतभाषोज्जीवनाभावे प्राकृतभाषाजीवनमेव न सम्पद्यते । 'मूले च्छिन्ने कुत्र शाखाप्ररोहः'। देशभाषाणां संस्कृतादेव पोषणं संस्कृतादेव सौन्दर्यं किं बहुना सर्वापि समृद्धिः संस्कृतायत्तैव। संस्कृतस्य तानेव शब्दान् तत्समान्वा तदुद्भवान्वा तदपभ्रंशान्वा विहाय का वा प्राकृतभाषा जीवनं पोषणं सुभगतां समृद्धिं

वा समासादयितुं शक्नोति । एवं हि परिस्थित्यां संस्कृतसम्मेलनोद्यमो देशभाषाकण्ठकुठारायित इत्युक्तिः मस्तिष्कभ्रंशमेव सूचयति वक्तुः । अतो यदि देशभाषाणां जीवनादिकमपेक्ष्यते तर्हि संस्कृतभाषायाः सर्वतः समुन्नतिः सर्वथा विधेयैवेति सिद्धम् ।

संस्कृतभाषोज्जीवने तस्या राष्ट्रभाषात्वसम्पादनमेकोऽत्र प्रधानोपायः । तदशक्यमिति सङ्गिरन्तां नाम केचन । परं दक्षिणभारतदृष्ट्या विचार्यमाणे हिन्दीव्यपेक्षया संस्कृतमेव सुलभीकृत सुकरमायत्तीकर्तुमचिरादेव । यतः कन्नड-तेलगु प्रभृतिभाषासु संस्कृतशब्दाः तत्समाः तद्भवाः तदपभ्रष्टाश्च भूरिशः समुपलभ्यन्ते । उत्तरभारतीयभाषास्तु प्रायः संस्कृतविशेषसम्बन्धिन एव अतस्त-द्देशवासिनां संस्कृतं नातिश्रमावहम् । एवं च सर्वप्रान्तीयजनानां परिचिततया चिरपरिचिततया संस्कृतभाषायै एव मातृस्थानीयायै राष्ट्रभाषात्वमानदानमतितरां समञ्जसं मन्यामहे । संस्कृतभाषामहिष्यां राष्ट्रभाषात्वसिंहासनमारूढायां सर्वा अपि देशभाषासामन्तराज्ञ्योऽपि तदालम्बेन महान्तमेवाभ्युदयमवाप्नुयुः ।

संस्कृतभाषाभिवृद्धौ आधुनिकसाधनान्यपि उपयोक्तव्यानि । तेषु प्रतिनगरं संस्कृतभाषोत्तेजनी सभा स्थापनीया, यत्र अध्यापका विद्यार्थिनश्च विविधविषयेषु वक्तृतापाटवमधिगच्छेयुः । तदर्थमेव इदानीं तत्र तत्र गीर्वाणवाग्वर्धनीसभाः प्रस्थापिता इति प्रमोदावहमिदम् । परं विषादावहमेतच्चात्र यद् आसु सभासु उपाध्यायाः, अन्तेवासिनः, शास्त्रनिष्णाताः, श्रीमन्तः, राजकीयाधिकारिणश्च नेषदपि भागं गृह्णन्ति संस्कृतप्रणयिनोऽपि । श्रोतृजनविरहितं व्याख्यानं किं वा फलं साधयेत् । अतः सभासु तासु संस्कृतमधिजिगमिषूणामधीतानां पाण्डित्यमधिगतानां सान्निध्यमावश्यकम् ।

प्रथमतः प्रतिप्रान्तं साप्ताहिकमासिकादिनियतकालिकानामप्यावश्यकता पदे पदे भासते सर्वत्र संस्कृतप्रसाराय । नियतकालिकमहत्त्वं जानन्त्येव सर्वे साम्प्रतम् । संस्कृतभाषाप्रचारैकदृष्ट्या 'मधुरवाणी' पत्रिका पञ्चवर्षेभ्यः प्रचाल्यतेऽस्माभिः । मधुरवाणीयम् आकाश्मीरादासिंहलम् आमद्रादाद्वारकं

प्रतिप्रान्तं सर्वादरणीया संस्कृतपत्रिकाप्रपञ्चे महतीं यशस्वितामलभतेति आत्मस्तवनलाघवदोषमङ्गीकृत्यापि साभिमानं सानन्दं चाभिदध्महे । संस्कृतिसंरक्षणैकाधारे संस्कृतविषये नितरामौदासीन्यभाजि भारतीये सुशिक्षितेऽपि सम्पन्नेऽपि समाजे मधुरवाण्याः पर्याप्तग्राहकानुग्रहविरहो नातीव विस्मयावहः । तथाऽपि सुरभारतीसमुन्नयनैकलक्ष्यैः सधैर्यं प्रचाल्यत एवाऽस्माभिः सेयं मधुरवाणी । तत्पोषणभारश्च सर्वथा संस्कृतप्रणयिष्वन्वायत्त एवेत्यलमतिप्रसङ्गेन श्रोतृजनवैरस्यावहेन । मदीयभाषणजनितोद्विग्नतानिरासाय यदि अमृतवर्षिणी चन्द्रिका अपेक्ष्यते, यदि च वाचस्पतिसरसभाषणसुखानुभूतिरभिलष्यते, यदि च भवताम् अमौल्यकालरूपधनहान्यारोपसंसिद्धये न्यायाधीशः आकाङ्क्ष्यते तर्हि भवतामस्माकं च सुकृतपरिपाकवशात् तावपि न दुर्लभाविदानीम् । यतः 'साहित्यचन्द्रिका' सौ० क्षमादेवी, तथा 'वाचस्पतिः' श्रीमान् न्यायाधीश्वरो गुण्डेराव महाभागश्च अनुपदमेव अध्यक्षपदसिंहासनमारुह्य श्रीमतामभीप्सितं पूरयिष्यत एवेत्यलं पल्लवितेनेति शम् ।

संस्कृतभाषोत्कर्षः

ले. मलगीत्तुपाह्वः वेंकटरमणाचार्यः बागलकोट

अयि प्रणयिमहाशयाः विधातृविनिर्मिते जगति कति नाम न सन्ति विविधविषयव्यवहारनिर्वाहक्षमा मनोरमा गिरां स्तोमाः । परमिदमभिधीयते, नवरसेषु तत्तद्रसोद्रेकसमुचितपदसन्निवेशा, रीतिविशेषवैचित्र्यसमुल्लासा, सहृदयहृदयेषु तांस्तान् भावविशेषाननुभावयन्ती, उदारजनमनोवृत्तिरिव पदे पदे बहुविधानर्थान् सरसजनसात्कुर्वती, नूतनवरवर्णिनीव विलसदलङ्कारनिचयमुद्भासयन्ती प्रौढेव वक्रोक्तिभरानुरञ्जितरसिकहृदया, दयावृत्तिरिव दीनजनगण ? मानसातङ्कपरिहरणप्रकटितप्रभावा, भावाविष्करणचतुरा चतुरेव, हिमगिरिसुतेव साध्वीमणिषु, प्रशान्तिरिव गुणगणेषु, दृष्टिरिवेन्द्रियनिचयेषु, सदाचारपद्धतिरिव करणीयपथेषु, वाराणसीव पुण्यस्थानेषु, त्रिपथगेव निम्नगासु, विवेकिसंहतिरिव मानवेषु, मानवजातिरिव प्राणिजातिषु, जातिरिव वस्तुधर्मेषु, धर्मप्रवृत्तिरिव करणव्यापारेषु, परां कोटिमुत्कर्षस्याधिरूढा सुरभारत्येव नेतरेति ।

यतो नित्या किल भगवती सुरभारती, कल्पान्ते पुनरशेषासु तत्तद्देशभाषासु विलीनास्वपि नेयं विलयमुपयाति। समाम्नायते किल बह्वृचैः 'यावद्ब्रह्म विष्ठितं तावती वाक्' इति। परब्रह्मेव समयत्रयेऽप्यप्रतिहतस्थितिरियं भाषेति श्रीभगवदानन्दतीर्थमुनिमणिभिरपि व्यवास्थापि, तत्त्वनिर्णयादिग्रन्थेषु। परमस्माभिर्न तत्समर्थनप्रकारोऽत्र निरूप्यते। किंतु नित्यत्वादेतस्या यदशेषभाषोत्तमत्वमभ्यधायि, तत्तावन्न नाम नाद्रियते। न केवलमेतावतैव वरीयसी सा सुरभारती, किं नाम, इहतावदशेषभाषाणामर्वाचीनानामुपजीव्यतयापि नेतदतिरोहितं प्रेक्षावताम्। सेयं सुरभारती रसालकिसलयततिरिव परभृतविरुतेषु निजरसास्वादनगुणेनैव पुनरितरभाषाकविवचनेषु निरतिशयं मधुरिमाणमुपजनयति। प्राकृतेष्वपि काव्येषु तत्र तत्र रसविशेषाविष्करणरीतिगुणालङ्कारादिवैचित्र्यमाकाङ्क्षमाणैः प्राकृतकवितल्लजैरपि जैमिनि—जगन्नाथविजय—राजशेखरविलासप्रभृतिषु कर्णाटकीयमहाकाव्येषु, मयूरपन्तीयमुखेषु महाराष्ट्रनिबन्धेषु, आन्ध्रद्राविडादिकविपुङ्गवग्रन्थेष्वपि समादृतः सुरभारत्याः समुचितः पदविन्यासप्रकारः परिपठ्यमानः कस्य वा साहित्यशास्त्रीयगुणदोषरीतिरसाभिज्ञस्य मनसि प्रतप्तकाञ्चनाभरणेषु प्रत्युप्तरत्नावलिरुचिनिचय इव न प्रमोदभरमुत्पादयेत्, उत्पन्नं वा न संवर्धयेत्?। यत्र क्वापि न संस्कृतपदं स्प्रष्टास्मीति प्रतिजानन्नपि 'कब्बिगरकाव, काव्यकर्ता, अंडय्य नामा कन्नडभाषैकाभिमानी कविः संस्कृत पदद्वयमगतिकतया प्रायुङ्क्तेति तदभिज्ञा उद्घोषयन्ति। तदेवं सर्वभाषोपजीव्या सुरभारती कुतो नाम न प्रशस्तिपदमध्यारोहेत्?। न केवलमेतावदेव प्रशस्तिपदकारणं सुरभारत्याः, किंतु सर्वविषयकज्ञानानां निधिरियमित्यपि मतं विपश्चिताम्। इयं खलु खनिः सुरभारती निखिलार्थविषयिण्या प्रतिपत्तेः। यामवलम्ब्य सुधियस्तासु तासु कलासु लब्धकीर्तयः समाल्हादयन्ति विस्मापयन्ति च गुणग्राहिणो लोकान्। संस्कृतभाषामयानां समयानां प्रत्येकमपि स्वस्वविषयसमर्थनसामर्थ्यं यावदुपलभ्यते, तावन्न कस्यापि इतरभाषामयस्य प्रबन्धस्य संस्कृतपरिवर्तितस्यापि निष्पद्यते, किंपुनरतद्विधस्येत्युक्तिर्नातिशयोक्तिपदमधिगच्छेदिति नैतन्नानुभूतं भावुकानाम्। अहो सुरभारत्याः समुद्रेकमहिमा यत्, प्रातिस्विकेषु शास्त्रेषु अनितरसाधारणी प्रक्रियापरिपाटी,

असदृशी परिभाषाविस्तृतिः, अस्खलिता प्रतिपादनशैली, अलौकिकी प्रतिपाद्यविषयविचित्रता चेत्येकैकमपि एकायनं विमृशतां विपश्चितां नूनमतलस्पर्शतामस्याः सम्यगावेदयति । यतो रुद्रभट्टकविरत्नकृतजगन्नाथविजयमहाकाव्यस्य कर्नाटकभाषामयस्य व्याख्याता पञ्चपाषाणापरपर्यायमङ्गलाचरणपद्यपञ्चकं विस्पष्टं संस्कृतभाषयैव रसरीतिगुणालङ्कारव्यङ्ग्यार्थविवेचनपुरःसरं व्याचख्यौ । नूनमनेनावगम्यते सुरभारत्या एव ज्ञाननिधित्वम् । शब्दमणिदर्पणप्रभृतयः कन्नडव्याकरणग्रन्था अपि कर्नाटकीयोदाहरणमात्रप्रदर्शनेन संस्कृतभाषामया एवेति न परोक्षमिदं प्रेक्षावताम् । यामेव सुरभारतीं कामदुधां धेनुमाश्रित्य कवितर्णकाः प्रतिपत्तिपयोभरमातृप्ति समास्वाद्य परिपुष्टाः अन्यादृशं प्रौढिमानं च समधिगम्य विषयस्यैकस्यापि वर्णनविधौ वचनातिगामिनीं विचित्राकारामेव धुरमुद्वहन्ति । यया किल प्रेमप्रवाहप्लवमानमानसाः सुमनसः सानन्दं समूधान्दोलनं च तानेव समये समये श्लाघन्ते । सेयमाल्हादयन्ती सुरसरस्वती चन्द्रिकामप्यतिशेत इति परा काष्ठा समुत्कर्षस्य । चन्द्रिका हि प्रियतमवस्तुदुःसहविरहसंज्वरज्वलनज्वालावलीदग्धहृदयानां विषविषमतमामवस्थां वर्धयन्ती वित्रस्ततां नयति विरहिणः । सुरभारती पुनरियं शान्तरसभरसमुत्सर्पणनिदानैः विविधविषयासारतावर्णनचमत्कृतिभिः क्षणादेव देवदूतीव विदूनहृदयालवालेषु संतापकश्मलमपसार्य विवेकसलिलसेकेनाधिकपूरणतः प्रमोदबाष्पपूरच्छलेनावगलतेव अन्तरङ्गमार्द्रीकृत्य पुलककुलकैतवेन शिखाजालमातत्य समाधानकल्पतरुमुल्लास्य भगवति मनःप्रणिधानरूपं फलमुपजनयन्ती प्रीणयतितमां प्राणिनस्तथाविधानपीति कैषा, क सा वराकी चंद्रिका ? । सेयं तर्ककर्कशविचारभारनिष्ठुराक्षरक्षुब्धापि मृदुलोक्तिसारसुरभिणि काव्ये कोमलतमा, दिग्गजघटासंघट्टनकिणीकृतत्रिदशरिपुवक्षोविदारणदारुणां कमलाकुचयुगलकमलकुड्मलकोमलप्रसरां नरसिंहनखरावलिमनुकरोति । रन्नप्रभृतिकर्नाटककविरत्नप्रणीतेष्वपि गदापर्वादिकाव्येषु सुरभारतीसंश्रयसमुद्रेकादेवारभटीवृत्तिरिति नूनमियं सर्वोपजीव्यतया नित्यतया विज्ञाननिधितया समधिकाल्हादननिदानतया च निःसंशयमध्यारोहति समस्तभाषासु परां प्रशस्तिमित्यलं पल्लवितेनेति शम् ।

सं. सा. सं. अभिनन्दनम् ।

वेणुग्रामसंस्कृतसाहित्यसम्मेलनाद्युत्सवसमये कृष्णापवनपावनभूत-वैराजक्षेत्रीयरङ्गीश्रीरङ्गशर्मप्रहितानि पद्यानि ।


वेणुग्रामनिवासिनो बुधजनाः साहित्यवारांनिधे-
र्याताः पारमहो तथैव सततं गीर्वाणवाण्यां रताः ।
तैरारब्धमिदं प्रमोदभरितैः सत्रं हि सारस्वत-
मृत्विग्वच्च विभाति तत्र नितरां प्राप्तस्तु विद्वज्जनः ॥१॥

तन्त्रीवत्सततं विभाति मधुरालापांश्च या कुर्वती
लोकैर्या च यथार्थमेव मधुरा वाणीति सम्बोधिता ।
यस्याः पञ्चमवत्सरोत्सवमिमं श्रुत्वा प्रहृष्टा जनाः
सेयं श्रीशकृपाबलेन भुवने दीर्घायुरालम्बताम् ॥२॥

वाचामाचार्यतायाः पदमखिलनुतं बिभ्रती या / चकास्ति
या स्वैरं सञ्चरन्ती सुरमुनिविदुषां भूषयत्याननानि ।
सेयं गीर्वाणवाणी विलसतु वदनाम्भोजरङ्क्तौ जनानाम्
भ्राजन्तां तत्पदाब्जे सततमनुरतास्ते च विद्वत्सभायाम् ॥३॥

स्वभक्तजनसंस्कृतौ बहुविशारदे शारदे !
विधिप्रमुखसन्नुते विधुमुखे विधेर्दर्शिके ।
स्थिरा भव बुधानने रसयुते मयूरासने
त्वदीयनखचन्द्रिका लसतु सूरिहृत्कैरवे ॥४॥

श्रीश ! त्वदीयपदपङ्कजभक्तियुक्ता दैवीं गिरं श्रयतु भारतभूमिरेषा ।
यत्र स्थिता विमलवश्यगिरश्च धीरा वीरा रणेष्विव सभासु विभान्तु शश्वत् ॥५॥
वेणुग्रामसभानुत्यै ग्रथिता रङ्गशर्मणा ।
पञ्च श्लोका भवेयुस्ते प्रमोदाय विपश्चिताम् ॥६॥



बेळगांवनगरे प्रवर्तिते प्रथमसंस्कृतसाहित्य-
सम्मेलने स्वागताध्यक्षपदमलङ्कुर्वाणः
श्रीमान् एम्. पी. वाली, एम्. ए.
महाभागः



बेळगांवनगरे प्रवर्तिते प्रथमसंस्कृतसाहित्य-
सम्मेलने प्रधानमन्त्रिपदमलङ्कुर्वाणः
डॉ. व्ही. एम्. बाक्रेमहाभागः



बेळगांवनगरे प्रवर्तिते प्रथमसंस्कृतसाहित्य-
सम्मेलने प्रधानमन्त्रिपदमलङ्कुर्वाणः
मधुरवाणीसहसम्पादकः संस्कृतसाहित्यभूषणम्
पं. बुर्लीश्रीनिवासाचार्यः, बेळगांव.



संस्कृतविद्वान् आयुर्वेदतीर्थः निखिल
कर्णाटकायुर्वेदपरिषदध्यक्षः विजापूरप्रान्त-
सन्मान्यप्रतिनिधिः
श्रीमान् आद्यअनंताचार्यः, विजापूर.

॥ श्रीसुरभारती विजयतेतराम् ॥

सं-सा-स-स्वागताध्यक्ष भाषणम्

" विद्यामुद्राक्षमालामृतघटविलसत्पाणिपाथोजजाले !
विद्यादानप्रवीणे ! जडबधिरमुखेभ्योऽपि शीघ्रं नतेभ्यः।
कामादीनान्तरान्मत्सहजरिपुवरान्देवि ! निर्मूल्य वेगा-
द्दिव्यां शुद्धां च बुद्धिं कमलजदयिते ! सत्वरं देहि मह्यम् "॥
— श्रीसच्चिदानन्दशिवाभिनवनृसिंहभारतीस्वामिनाम्.

अयि भोः सुधानिष्यन्दिसुरभारतीचरणपरिचरणप्रणयिनो मान्यप्रवराः,

प्रथमत एवात्र प्रदेशेऽनुष्ठीयमानमिमं संस्कृतसाहित्यसंमेलन महोत्सवमस्मदभ्यर्थनानुरोधात्संनिधानेन संमानितवतामत्रभवतामागमनमभिनन्दामि स्वागतमण्डलस्य कृते। हन्त धन्योऽस्म्यहं यतश्चिरत्रुटितसंस्कृतसाहित्यसम्बन्धेनापि मया व्यवसायान्तरव्यापृतेन लब्धमेतन्महत्तरं पुण्यं स्वागतमण्डलस्य विश्रम्भरससिद्धिमहिम्ना। परिगृहीतार्था हि वयमत्रभवद्भ्योऽनुरूपातिथ्यसमर्पणे नो दौर्बल्यमन्तरेण। इत्थंगतेऽपि गीर्वाणवाणीचरणपरिचरणपरायणैकबुद्ध्या संनिधानेनेमं महोत्सवमलंकृतवद्भिर्भवद्भिरतीवोपकृता वयम्।

प्रमोमुदीति मे चेतोऽत्र निवेदयितुं यदस्माकं बेळगांवपत्तनेऽस्मिन्पीयूषरसधारावर्षिण्या सुगमया भाषासरण्या वाचकवृन्दस्यान्तरङ्गं नितान्तं संतोषयन्ती लघुकथाकाव्यनाटकसमस्यासमेता सामाजिकविषयान् प्रतिपादयन्त्यैतत्पत्तनस्याभिमानवस्तुभूता 'मधुरवाणी' नाम्ना प्रसिद्धा मधुरा मासपत्रिका प्रकाश्यमानाऽऽस्त इति। अस्याः सम्पादकौ गलगली श्रीरामाचार्यमिश्रो बुर्ली श्रीनिवासाचार्यमिश्रश्च महाविद्वांसावधोनिपतच्चारुसुरुचिरसुरभारतीदिव्यपताकोत्थापनार्थं सरस्वतीदेव्या संप्रेषिताविवामरवाग्देवीपदङ्घ्रिवरिवस्यापरायणावनन्यसाधारणभक्तौ चारुचमत्कृतिजनकचातुरीप्रगल्भकाव्यनिर्माणचणौ सहृदयहृदयाल्हादकलघुकथानिबन्धलेखकौ च। तथा च प्रतिपक्षं प्रचचाल्यतेऽत्रैव नगरे गीर्वाणवाग्वर्धिन्यभिधाना सभा संस्कृतभाषाप्रवर्धनाय बद्धकंकणा। षष्ठाब्दे पदं निहितवत्योस्तयोर्मधुरवाणीमासपत्रिकाया गीर्वाणवाग्वर्धिनीसभायाश्च नववत्सरारम्भमहोत्सवमनुपालयितुकामाभ्यामुपरिनिर्दिष्टाचार्यमिश्राभ्यां यथाक्रममध्यक्षमहाभागौ नियोजितावास्ताम्। एवमना-

यासमसम्प्राप्तव्यप्रथितसंस्कृतपण्डितवृन्दसंनिधेर्लाभः सर्वेभ्यो भवत्विति प्रगल्भा बुद्धिः समजनि तयोराचार्यमिश्रयोर्मनसि । ततस्ताभ्यामत्रत्य-संस्कृतभाषाप्रणयिभिः सह यो विचारविनिमयः कृतस्तस्यैव फलमेतत्सं-मेलनम् । अल्पावकाशशेषतया संमेलनोत्सवदिनात्प्राक्सहत्तरोऽयमुद्देशः कथं पूर्णो भवेदिति वयं किमपि साध्वसाक्रान्ता अभवाम खलु । तथापि सदयसहृदयानामवष्टम्भेन नियोजिताध्यक्षमहाभागानां नामप्रभावेण च संमेलनानुष्ठानाय कृतनिश्चया वयमद्य सन्तुष्टान्तरङ्गा यतो नः प्रयत्नाः सफलतां ययुरत्रभवतामागमनेन ।

दिष्ट्या वर्धते हन्त संमेलनस्य कार्यनिर्वाहकमण्डलं सहशाध्य-क्षमहाभागानां वरणेन । स्थाने खलु मुम्बईपत्तनालंकारभूताः, एम्. डी. इति प्रतिपत्तिमदाङ्ग्लवैद्यकपदवीविभूषितानां डॉक्टररावमहोदयानां दयिताः, सौ. क्षमाबाईमहाभागाः संमेलनाध्यक्षस्थाने नियोजिताः । सुकृतिनो वयं यदस्मन्निमन्त्रणमादृत्य संमेलनस्य कर्तव्यपथं प्रवर्त-यितुमनुमोदनं दत्वाऽऽत्रागता अत्रभवत्यः । ताश्च कीर्तिशेषाणां संस्कृत-साहित्याकाशविद्योतद्विद्वद्द्युमणीनां पण्डितानां शङ्करपाण्डुरङ्गपण्डित-महोदयानां दुहितृतया बाल्यत एव गीर्वाणवाण्यन्नेन संवर्धिताः सुर-भारतीं प्रत्यनन्यसाधारणं प्रेम धृतवत्यः सुरससंस्कृतकवितानिर्माण-सहजचातुरीसम्पन्नाः स्वपितृचरित्रात्मक 'शङ्करजीवनाख्याना' द्यनेक-संस्कृतग्रन्थानां प्रणेत्र्यः । तथैव च सौपर्वाणी वाणीव संस्कृतिसम्पन्नाः, सदसद्विवेकबुद्धिरिव पण्डितात्मजाः, शारदाम्बेव संस्कृतसदारावप्रियाः, सर्वसिद्धिसम्पादनक्षमः क्षमागुण इव मूर्तिमत्यः, सुरभारतीविद्या-प्रौढिमतया उपनिषत्कालीनविदुषीगार्गीवाचक्नवीमैत्रेयीर्नः संस्मार-यन्त्यः, लब्धलक्ष्मीवरप्रसादा अपि सरस्वतीप्रीतिभाजनभूतास्ताः सरस्वतीदेवीव साक्षाद्गीर्वाणवाणीं प्रत्यौदासीन्यमाश्रितवतोऽत्रत्यजना-ञागरायितुमागता इत्यहो महान् पुण्योदयो नः । अस्मभ्यो मातृस्थाने वर्तमानाः मातृवाण्यामिव संस्कृतभाषायां परां प्रतिष्ठां संपादितवत्यस्ता अधिकारिण्यः खलु पन्थानं दर्शयितुं कथं तावद्गीर्वाणवाणी नो मातृ-भाषाणां पोषणकरी कर्तव्येति । एवमेव गीर्वाणवाणीप्रणयिनो गद्वाल-संस्थाने प्रधानन्यायासनमारूढा वाचस्पतिपदवीविभूषिताः श्रीहरकारे-गुण्डेरावमहाशया अस्य संमेलनस्यांगभूतायाः साहित्यगोष्ठ्या अध्यक्ष-

स्थानाय लब्धा इत्यतीव सुकृतिनो वयम् ।

इतिहासप्रसिद्धमस्माकमिदं बेळगांवनगरमैतिहासिकावशेषाणां हेतोर्लब्धवैशिष्ट्यम् । अस्मिन्देशविभागे धीरवीराः कदम्बचालुक्य-राष्ट्रकूटयादवभूपा राज्यं कृत्वा भास्वद्भारतीयसंस्कृतिप्रभाव्यतिकर-प्राप्तद्विगुणितशोभां कर्णाटसंस्कृतिमतिमात्रेण पुपुषुः । खिस्ताब्दीयनवम-शतकस्य पूर्वार्धभागे मान्यखेटपुरे (अधुना हैद्राबादसंस्थानान्तर्गतं-मालखेडसंज्ञं नगरं) राज्यं कुर्वता राष्ट्रकूटराजान्वयललामभूतेन राजकविकविराजनृपतुंगदेवेन कर्णाटभाषायां विरचिते कविराजमार्गा-भिधपुरातनतमालंकारग्रन्थे सारभूतकर्णाटविभागस्य वर्णनप्रसंगे निर्दिष्टं वकुन्दं नाम नगरमत्रैव प्रदेशेऽद्यापि पुरावृत्तावशेषसनाथं विराजत इत्यस्य देशविभागस्यैतिहासिकमहत्त्वं परिज्ञायते । अत एवात्र प्रदेशे प्रथममेवानुष्ठीयमानमिदं संमेलनं स्थाने निर्वर्त्स्यतेऽस्मिन्पत्तने समुज्वलसंस्कृतिपरम्परावभृथपवित्रिते । विशिष्टसंस्कृतिसमलंकृतः प्रदेशविशेषः, भारतीयसंस्कृतेर्भाण्डागारस्य संस्कृतसाहित्यस्य सेवा-प्रसंगः, प्रसंगानुरूपाः प्रशान्तमधुरिमशीकरसारवाहिचन्द्रिकाप्रभये-वासाधारणगीर्वाणपाण्डित्यप्रभया सभां समुज्वलयन्त्यः ‘संस्कृत-साहित्यचन्द्रिके’त्युपपदविभूषिता अध्यक्षमहाभागाः, विपश्चिद्भूयिष्ठ-श्चादर्शः श्रोतृवर्गः, इत्येतैरदृष्टपूर्वैःसंनिवेशैर्लब्धानन्यसाधारणवैशिष्ट्य-मेतत्संमेलनमित्यहो नितान्तं सानन्दाभिमानास्पदं नः ।

महामान्याया अनितरसाधारणप्रभाववत्याः संस्कृतभाषाया महिमा न केनापि वर्णयितुं शक्यते । ऐहिकामुष्मिकसुखहेतुपवित्रज्ञानदात् पुरातनतमात्कालाद्भारतीयजनमनोव्यापारनिरूपयितृ भारतीयसंस्कृते-र्भाण्डागारं बृहत्साहित्यविश्वं गीर्वाणभाषायामेव वर्तते । सा हि सौप-र्वाणी वाणी प्रायशोऽशेषदेशभाषाणां प्रसवभूमिः । व्याकरणशब्दसंग्रह-साधर्म्यं लक्षीकृत्य भाषातत्त्वज्ञैर्व्यवस्थितासु भाषाकुटुम्बेषु संस्कृतेतर-कुटुम्बान्तरसम्बन्धिन्यपि कर्णाटभाषा गीर्वाणवाण्याऽऽतीव परिपोषि-तास्ति । द्राविडभाषाकुटुम्बसम्बन्धिनी कर्णाटभाषा संस्कृतविभिन्न-व्याकरणशास्त्रोपेताऽऽपि तस्याः शब्दकोशो लक्षणशास्त्राणि च प्रायः संस्कृतभाषानुसारीणि । सार्धकोटिजनैर्भाष्यमाणा पुरातनी सुरुचिरा कर्णाटभाषा लालित्यौजस्वितादिसमुज्वलगुणगणमण्डिता सुरभारतीदत्त-

हस्तावलम्बा मधुमाक्षिकासम्पन्नेक्षुदण्डकैव द्विगुणितमाधुर्या मधुरिमाकृष्टोद्दामकविमधुपजेगीयमानमञ्जुगुञ्जारावपरवशीकृतरसिकमानसा नितान्तमाह्लादयति सहृदयहृदयानि । पम्प-पोन्न-रन्न-रुद्रभट्ट-हरीश्वर-षडक्षरिप्रभृतिप्रोद्दामकर्णाटकविपुङ्गवाः संस्कृतकर्णाटोभयभाषाकोविदा एव कर्णाटभाषायां ललिततमानि काव्यानि व्यरचयन् । एवं संस्कृतकर्णाटभाषयोरन्योन्यबान्धव्यमपरिहार्यम् । नैव कदापि साध्या तयोर्विपक्षता । यावत्संस्कृतभाषावैदग्ध्यं कर्णाटपण्डितानां तावद्वीर्यवत्तरा रंसवत्तरा च तेषां कर्णाटभाषासरणिः ।

अनल्पः खलु कर्णाटकस्यांशः सुरभारतीसम्पदभिवर्धनेऽपि । प्राज्यकर्णाटकसाम्राज्यकण्ठभूषायमानविजयनगराधिपत्यस्य चतुःशतवत्सरावधिदशायामपरिमेयसंस्कृतसाहित्यराशिर्निर्मिता । सायणविद्यारण्यपाल्कुरिकेसोमनाथमाघनन्दिप्रभृतिवैष्णववीरशैवजैनपण्डितैर्बहुमुखं संस्कृतसाहित्यं विनिर्मितम् । विजयनगरसार्वभौमा अपि कृष्णदेवरायप्रौढदेवरायप्रभृतयोऽमोघान्ग्रन्थान्संस्कृतभाषायां व्यरचयन् । 'तुक्कापञ्चक' ग्रन्थकर्त्री तुक्कादेवीनाम श्रीकृष्णदेवराजमहिषी तथा च 'कम्पराजविजय' पुस्तककर्त्री गङ्गादेवी नाम कम्पभूपस्य राज्ञी भूरिप्रभावे ग्रन्थप्रणेत्र्यौ बभूवतुः । एवमेव विजयनगरसाम्राज्यान्तर्गतकेळदिवंशललामभूतो बसवराजो नाम भूपो विचित्रनानाविषयाभिरामं मनोज्ञबन्धं वेदागमान्तर्गतविविधविद्यातन्त्रसारभूतं विद्याकोषग्रन्थं चकार । स ग्रन्थोऽधुना प्रकाशतां गत इति हन्त महद्भाग्यं गीर्वाणवाणीप्रणयिनाम् । तथैव च गैर्वाण्युद्धरणैकतानसुमतीनां महिशूरपुरवराधीशानामाधिपत्ये सुरभारती सुतरां प्रोत्साहिता । खिस्ताब्दीयसप्तदशतमशतकस्यापरार्धे निवसता महिशूरराजामात्येन वेङ्कप्पय्यमिश्रेण संस्कृतभाषायामनेके चम्पूनाटकालङ्कारव्याकरणग्रन्था रचिताः । परम्पराप्राप्तसुरवाणीचरणसारसपरिचरणबुद्धिमधुनापि दृढमवलम्ब्य महिशूरपुरवराधीशास्तदमात्याश्च सुरवाणीसमुन्नत्यै प्रयतमाना आसत इति परमप्रमोदास्पदम् ।

सरसतासादनार्थमशेषदेशभाषाभिः समुपजीव्यमाना सर्वभाषामयी हि संस्कृतभाषा भारतीयानां धर्मन्यायतत्त्वज्ञानकाव्यग्रन्थानां भाषा । एतद्विषयसम्बन्धिनः सर्वे पुरातनाः पूज्यतमाश्च ग्रन्थास्तस्यामेव भाषायां लिखिताः । आधुनिककालेऽपि प्रत्यहिकप्रार्थनानां कृते धार्मिक-

विध्यनुष्ठानाय च संस्कृतभाषैवोपयुज्यतेऽस्माभिः। अस्माभिर्वैद्यमाना संस्कृतभाषाऽधुना न कुत्राप्युपयुज्यते व्यवहारोपयोगिभाषतया। सा केवलं पुस्तकेषु परिपाल्यते विद्वद्भिश्चोपयुज्यते। पुरातनकाले कर्हिचिदपि सा व्यवहृता भाषाऽऽसीद्वा न वेति प्रश्नो विवादविषयीभूतः। महाराष्ट्रगुर्जरवङ्गप्रभृत्यनेकदेशभाषाणां प्रसवभूमितया संस्कृतभाषा-ऽऽस्तयाऽऽवश्यमेव पुरा व्यावहारिकभाषया भाव्यमिति सिद्धान्तं कीर्तिशेषाः सुप्रसिद्धसंस्कृतपण्डितप्रवराः सर् आर्. जी भाण्डारकर-महोदयाः प्रतीतिजनकैः प्रमाणैः पूर्वपक्षं खण्डयित्वा प्रस्थापयामासुः। सा ह्यमोघा देववाणी यथा देशभाषाणां प्रचयाय कल्पेत तथा कर्तु-मुचितं यतः साम्प्रतिकप्रजातन्त्रीययुगे प्राकृतजनानां तास्ता मातृभाषाः साकल्येन वर्धितव्याः। साम्प्रतमाङ्ग्लभाषाध्ययनमन्तरेण न वयं पारयामः। अत एवाङ्ग्लभाषामप्यधीत्य तेन नवीनविमर्शकदृष्टि-र्लब्धव्या। संस्कृतविद्यायाश्च सम्यगध्ययनं कृत्वा भारतसंस्कृति-दीपिका प्रदीपितव्या। भूतकालीनसंस्कृतिप्रभावलब्धप्रकाशो वर्तमान कालः साम्प्रतिकयुगप्राप्यज्ञानलाभेन प्रदीपितव्यो भविष्यत्कालाय च मार्गोपदेशकः कर्तव्यः। प्रत्यहं परिवर्तिनि संसारे प्रजातन्त्र-भावे चोपचीयमाने नूतनयुगविशिष्टभावोऽनुप्रवेष्टव्योऽस्माभिः। एवं प्रतीच्यसाहित्यसंस्कृतिव्यतिकरेण नः पुरातने संस्कृतिसाहित्ये किमप्यभिनवं तेजो धरिष्यतः। अतो गीर्वाणवाण्युद्धाराय सर्वात्मना-
[illegible] प्रयासः तथा [illegible]
प्रयतितव्यमेतदर्थं च केन्द्रसंस्थामेकां संस्थाप्य तन्मुखेन प्रतिपत्तः सङ्घसंस्थापनव्याख्यानादिभिः प्रचारकार्यमङ्गीकर्तव्यम्।

भोः महामान्याः, अलमतिविस्तरेणाधुना। संस्कृतभाषाभ्यास-ज्ञन्यूनतयैतावत्कालं कानिचित्त्रुटितवाक्यानि प्रजल्पितवतो मे ये प्रमादाः सहजमेव संजातप्रायास्ते क्षन्तव्या इत्यत्रभवतां सविधेऽस्ति मेऽभ्यर्थना। अनिशं च दिवौकोवाणीप्रसरणसरणिः पुरः प्रवर्ततामि-त्युमाजानिं परमेश्वरं प्रणतिपुरस्सरं प्रार्थये।

अयि भोः मान्यप्रवराः, पुनरप्येकवारमत्रभवतामागमनमभिनन्द्य स्वागतमण्डलस्यादेशानुरोधान्मयि न्यासीकृतं कार्यं पूरयित्वाऽनन्तर-कार्यनिर्वाहाय सविनयं विज्ञापयामि।

— इति शम् —

। अपत्यानन्देनापि नन्दति माताऽऽपदि ।

(ले० सुमित्रा सोहनी बेळगांव)

अयि सुरवाण्युपासकाः महनीयचरिता महात्मानः ! अद्यतनोत्सवदिने मीमांसनीयोऽयं विद्यते प्रश्नः यदियं संस्कृतभाषा राष्ट्रभाषा भवेन्नवेति । भवेदित्येकपदे नैव वक्तुं शक्येत केनापि । परं स्वापत्यराज्यारोहणमप्यापदि न काङ्क्षतीति का जाता वर्तते भविष्यति वा माता ?

भस्माभिभूतोऽनल आपाततो दृश्यते नामशेषीभूत इति । तथाप्यदृश्या संभवत्येव तास्मिन् पाददाहनशक्तिः, इत्यनयैव दृशा अस्यास्संस्कृतवाचोऽपि कलिकालभस्माभिभूतायाः प्रतिकूलकालाभिभूतानां देवानामिव नैवाद्यादृश्यत ओजः । अथवा नैवेयमीदृश्यपि यतो व्यक्तिरिव भाषापि विनाशिनीति को वदेत् ?। विशेषतश्च देवभाषाविषये । कथितमिह वेदैरप्यपौरुषेयत्वेन सूर्यप्रकाशवत् स्पष्टतमोयं विषयः । अनुभवश्चापि व्यक्तेरपि भाषा नित्येति । तथाहि—कविरत्नं कालिदासो गतः । ननु तन्मुखकमलनिवासिनी वाणी । कविवंशललामभूतो भारविरपि गतः, परं विद्यत एव किरातार्जुनीयम् । अत एव असंशयं शंसति मे मनोपि एवमेव [illegible] चिरकालं जीवेद्वयं वाणीति । भाग्यवतां बहुपत्यानां जन्मदा माता तनुवियोगेनापि जीवत्येवापत्यरूपेण । 'आत्मा वै पुत्रनामासीति' श्रुतिरपि इदमेव वक्तीति सुविदितचरमेव सर्वेषां वेदानुयायिनां विदुषाम् । गगनावगाही वटवृक्षोपि कालक्रमेण नश्यति, परं सोपि जीवत्येव बीजरूपेणेत्यस्मिन्विषये नैव बुधानां विवादः । अस्यास्संस्कृतभाषायाः अपि महाराष्ट्री हिन्दी अर्धमागधीत्यादयः केषाञ्चिन्मतेन आङ्ग्लभाषापि अस्या एव संततिः । सत्स्वेतेष्वपत्येषु कथं म्रियेतैषा ? । लोकेपि यथा मुखसादृश्यादस्यास्स्यान्मातेयं इयमपि स्यादस्याः कन्येति भवत्येव कुत्रचिदपि कल्पना, तथैव अतीवसाम्ययुते दृश्येते एव अस्या अपि द्वे कन्ये ये अस्या एवेति शक्येते कल्पयितुं विशेषतः । के ते इत्याकाङ्क्षायां येन केनापि कथ्येत हिन्दी महाराष्ट्री चेति । एते अपराश्च सर्वा अपि भगिन्यो विप्रकृष्टाः स्वस्व—भाग्य—संपदा नानादेशेषु अनुभवन्ति उन्नत्यव-

नती । तत्रालं विषादखेदाभ्याम् । क एवं विधो देवोऽपि सञ्जातः विद्यते भविष्यति वा प्रतिकूलदैवमार्जनसमर्थः । आखिलेऽस्मिन् आरसातलात् सुरलोकपर्यन्तं विश्वस्मिन्नेव दृश्येते उन्नत्यवनती । तत्र कः किं करोतु । उक्तमपि त्रिकालज्ञेन भगवता षड्गुणैश्वर्यसम्पन्नेन श्रीकृष्णेन स्वानन्यभक्ताय पार्थाय—

सुखदुःखे समे कृत्वा लाभा–लाभौ जयाजयौ ।
ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ॥ इति ॥

एतासां सर्वासामपि यद्यपि अस्यास्सुरभाषाया एव जन्म, तथापीयं माता आसां भाग्यविषये किं करोतु । जन्मदान एव अधिकारः पित्रोः, नतु स्वापत्यानां भाग्यदाने । पूर्वदत्तमेवात्र कारणम् । अतो जनानां भाग्यसम्पद्विवासां वाङ्मयसम्पदपि सर्वासां नहि सदृशी । अत्रापि दृश्यत एव न्यूनाधिकत्वम् । तथाचापरं नैव । भाग्यमेव केवलं जनहृदयाकर्षणे कारणमिति जगति दृष्टमेव सर्वत्र । यदि मतं चेत् भाग्यमेव कारणं जनचित्ताकर्षणे, तदा स्यात् धीमतां शिरोमणिरपि लोकमान्यः जगद्वन्द्यश्च । परं स तु नैव तथा मतो लोकानाम् । आसु भाषास्वपि काचन तुल्या समधिका वा भवेदासु । परं हिन्दवाण्या नैव सुपरिचिता वल्लभा वा जनानामिति निष्पक्षपातवृत्तीनां विदुषां स्वानुभवसिद्धं वेदम् । एवं च देवभाषा तु मातृत्वादेव यद्यपि स्थिता सर्वासां शिरसि, तथापि सा अद्यैव राष्ट्रभाषा भवितुं नार्हति यतस्सा पण्डितप्रिया मान्यापि नाखिलजनपरिचिता । अनेनैव हेतुना इतरास्वासु भाषास्वपि हिन्दवाणी–तुल्या नैव काचिदपराऽखिलजनपरिचिता सुलभा प्रिया च। एवं किमायातमिति चेत् आसु सर्वास्वपि भाषासु सर्वेषामविरोधेन राष्ट्रभाषा इति पदारोहणयोग्या इयमेव हिन्दवाणीति केनापि उच्येत । अस्याश्च तत्पदाभिषेकसमये तन्मातापीयं सुरवाणी नैव विषादमाप्नुयात् । इतरासामपि भगिनीनां भवेदेवानन्दः स्वज्येष्ठभगिनीराज्याभिषेकदर्शनेन । न खलु काचिदपि सुमातेदृशी दृष्टा श्रुता वा या स्वापत्यराज्यारोहणसमये विषादमनुभवेत् । कैकेय्यापि स्वपुत्रराज्याभिषेकार्थमेव प्रेषितो रामो वनवासाय । उक्तञ्चाचार्यैः—' कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ' इति।

एवं च ' संस्कृतवाण्याः अनेन हिन्दवाणी—राज्यारोहणप्रसङ्गेन नैव परिभवः। इतरासां मत्सररहितानां सुभगिनीनामपि लोकव्यवहारवत् नैवापमानाऽस्त्वं किञ्चिदपि इति मे मतिः । ननु पूर्वमुपक्रमितं संस्कृतवाणी राष्ट्रभाषापदवीमर्हति न वेति । उपसंहारश्च कृतो हिन्दवाणीराज्याभिषेकं पुरस्कृत्य । विरुद्धवचनमिदम् इत्यपि शङ्का न कार्या । यतो दर्शितमेवोपरि अद्यानुकूलकालाभावादेव ' सर्वं नाशे समुत्पन्ने अर्धं त्यजति पण्डितः ' इति न्यायेनैव हिन्दवाण्याः प्रथमं राष्ट्रभाषापदेऽभिषेकः, अन्ते च समर्थेयं सुरभारती करोतु स्वराज्यम् । तदर्थं तु प्रतिग्रामं पाठशालासंस्थापनं स्वस्वाबालकानाम् उच्चतमं अस्याः पाठन सम्भाषणवेलायां च अस्यामेव सम्भाषणं कर्तव्यमित्यायोजनया स्यादियं पूर्ववत् सर्वेषामादरास्पदम् । यतः नैव सन्त्येतादृशानि ग्रन्थरत्नानि अन्यासु कासुचिदपि भाषासु, प्रत्युत अस्या एव बिन्दुमात्रं लब्ध्वा 'वृश्चिको बिन्दुमात्रेण ऊर्ध्वं वहति कण्टकम्' इतिवत् प्रस्थापयितुं यतन्ते स्वगरीयस्त्वम् । अतः पुनरपि इयमेव सुरभारती अन्ते राष्ट्रभाषापदे कालान्तरेऽपि अभिषेक्तव्यैव अस्माभिर्भारतवासिभिः । यतस्तस्या वयं पुत्रा एव । पुत्रत्वन्तु पुन्नाम्नो नरकात् स्वपित्रोस्त्राणमेवेत्युक्तमेव महर्षिभिः । तेन चाद्यमेव कर्तव्यमस्याः पुनरुद्धरणमस्माकं पुरतः आपतति । तदर्थमेव यतामहे अद्यारभ्येति सर्वे भारतीयाः सुपुत्राः कुर्वन्तु इमामेव प्रतिज्ञाम् ।'अयि सुपुत्राः ! उद्धरत स्वमातरम् । तस्याः शुभाशिषा च लभध्वं पुनरपि स्वास्थ्यं पूर्ववत् । 'सद्विद्या यदि किं धनैरिति' स्मरत पुनः पुनरपि सुभाषितमिदम् । इतीदं वाण्यैव कृतं वाणीसेवनं तस्याश्चरणयोस्समर्प्य, ददातु सैव वाग्देवी स्वपुत्रेभ्यः स्वोद्धाराय सुमतिमित्याशास्य पतामि तस्याः पादयोः गृण्हामि च सर्वेषां सभ्यानां सतामनुज्ञाम् ।

मदीयलघुकथाया गुरुकथा

लेखकः—श्रीगलगलीकूर्माचार्यतनुजन्मा पण्ढरीनाथशर्मा

विमलीकृतसरिति, शीतलीकृतमरुति, प्रसन्नीकृतहरिति, स्वच्छीभूतविहायसि, मन्दीभूतोष्णमहसि, प्रचुरीभूतकामिजनरहसि अस्मिन्नेव सहसि कदाचित् कामपाल इव धृततमोनीलक्षौमः, अमरासुरसमरकाल इव कौशिकनागाधिपसञ्चारभीमः, धाराधरनिकर इव चञ्चच्चामीकरचारुचपलास्तोमः धूर्जटिजटाजूट इव संस्फुरद्भालसोमः, मर्दितभामिनीभामः वर्धितकामिनीकामः मध्यमो यामिनीयामः। तत्र च तपस्विन इव विमुक्ताहाराः, वर्षावासरा इव गृह्यमाणपयोधरमण्डलाः, उत्तानपादप्रेमप्रवाहा इव हृदयोपाहितप्रियोत्तमाङ्गाः, महाप्रासादा इव दृढसंश्लिष्टोरुस्तम्भाः, अद्वैतवादिन इव तादात्म्यापादकाः, सुबन्धुकविप्रबन्धा इव श्लेषभूयिष्ठाः, कान्ताधरासवलम्पटकामिभृङ्गाः, रतिवागुरानिपातितप्रणयिकुरङ्गाः, स्वेच्छाप्रवर्तितेन्द्रियतुरङ्गाः समुद्वेलितानन्दसागरतरङ्गाः, प्रेमोद्रिक्तान्तरङ्गाः, कुसुमशरनाट्यरङ्गाः, वक्त्रे गात्रे च अलंकाररहिताः शैत्यातिरेकेऽपि उद्दामनर्मश्रमस्वेदवाहिनः प्रवर्तन्ते स्म रतिप्रसङ्गाः। यत्र च दरिद्रजनता छिद्रांशुकधारिणो शैत्येन विद्रावितानिद्राकातरा, सुभद्रेव सन्निहितधनञ्जया, रावणचमूरिव मारुतसंत्रस्यमाना, वृषाऽऽरूढभवपुरोनिषण्णभवानीव उभयकरदृढगृहीतनिजवृषस्कन्धा, कमलिनीव उष्णकरांशुकापेक्षिणी, दुष्पद्धतिरिव विपुलकण्टकजालाञ्चिता, मन्मथमनःप्रवृत्तिरिव दूरीकृतशम्बरा, अकृतसुरतोद्यमाऽपि शतधा क्षताधरपल्लवा सीत्कृतिविकृता चासीत।

शिशिरतातिशयजडीकृतनिखिलाशान्ते स्वस्वनिशान्तनिलीनसकलजनप्रशान्ते तस्मिन्निशान्ते, परिसमपिताभ्यासेषु, अभ्योसोत्थितेषु मत्सब्रह्मचारिषु मत्सब्रह्मचारिषु निद्रामुद्रितलोचनेषु सत्सु, साहित्येऽभिनिवेशबहुलतया, मम चेतश्चमत्करितया च संस्कृतगद्यपद्यानां, नव्यकाव्यावलोकनकुतूहलितया च मनसः, माधुर्यपक्षपातितया चात्मनः, अनवाप्तावसरतया च दिवा तदवलोकनस्य, सांसारिकदुरन्तचिन्तासन्ततिनितान्ततान्तस्वान्तविश्रान्तिदायिनीं लोचनग्राहिणीं निरन्तर-

हठादसकृदागच्छन्तीमपि सन्तापसन्तानतिरोधानशान्तिसञ्जीवनौषधिं निद्राङ्गनां दूरतः परिहाय, नारायणमूर्तिमिव व्याप्तनिखिलक्षोणीं त्रिविष्टपस्थलीमिव मधुरलेखश्रेणीं मधुरवाणीं तद्दिन एव समागतां समवलोकयन् तल्प एव समतिष्ठम्। तत्र च नयनपथमनैषमहं नैकान्सहृदयहृदयसमुल्लेखान् लेखान्। अपश्यं विद्वद्वृन्दविहितानन्दान्प्रबन्धान्। पर्यशीलयं च प्रसारितविद्वत्ताकीर्तीः संस्फुरन्नवस्फूर्तीः समस्यापूर्तीः। परामृशं च गुणदोषादर्शान् रसिकजनहृदयस्पर्शान् विमर्शान्। समालोकयं च जगति प्रसारितज्ञानालोकं समावर्जितविवेकिलोकं सम्पादकालोकम्। अवाचयं च विविधभावनालतोपवनानि विदितदेवदेवस्तवनानि माधुर्यैकभवनानि विविधानि कवनानि। न्यशामयं च एकां लघुकथां गुरुप्रमोददायिनीम्। तस्या एवाधस्ताद् निरैक्षे च संपादकीयाः इमाः पङ्क्तीः यद्-

“अयि अशेषवाङ्मयपारावारपारीणा वाचकधुरीणाः! प्रगतिपरेऽस्मिन् काले सर्वसहायामस्यां स्वस्वभाषाणां सर्वाङ्गीणसमुन्नत्यै सर्वदा तत्तद्भाषाभिमानिनः सर्वेऽपि सर्वतोमुखं प्रयतन्ते एव सर्वथेति सार्वजनीनमेतत्। अत एव हि निखिला अपि ता भाषा अधुना काव्य--नाटक -कथानक--चम्पू--प्रहसनादिभिर्बहुभिरन्यान्यैश्च प्रकारैः प्रतिदिनं प्रतिप्रहरं प्रतिक्षणं प्रतिपलं च पुरःप्रसर्पन्ति। विस्तृतिमधिगच्छन्ति। विकासयन्ति चात्मानमित्यवगतमेव समेषामपि। इदानीं तु सर्वेष्वपि इतरवाङ्मयेषु लघुकथानां प्रसारः समुत्कर्षश्च महता रभसेन प्रवृत्तो दरीदृश्यते। बह्व्यः खलु मासिक्यः पाक्षिक्यः साप्ताहिक्यो दैनिक्योऽपि च पत्रिकाः लघुकथानामेव कृते आविष्क्रियन्ते। यासु च नेतरे समीचीना अपि विषया न प्रकाश्यन्ते। एवं दश--पञ्चदश--विंशतितिसंख्यालघुकथागर्भिता असङ्ख्या बृहत्यः खलु पुस्तिकाः तदा तदा प्रकटीक्रियन्ते। तथा सर्वास्वपि भाषासु लघुकथानां विस्तृतिः उत्कर्षश्च महता वेगेन दिने दिने क्षणे क्षणे समेधमानौ च विलोक्येते। सकलेष्वपि साहित्येषु लघुकथानामेकं विशिष्टस्थानं विद्यते। लघुकथा नाम साहित्यस्य एकं प्रधानमङ्गमिति परिगण्यते। तद्विरहिता च साहित्यस्य व्यङ्गतां वैधुर्यं परिपक्वतावैकल्यं न्यूनतां च

व्यञ्जयति । कदाचित् तदेव साहित्यसमुन्नतिमापनसाधनतामपि भजेत् । अतः अधुना स्वस्वसाहित्यसौहित्यौन्नत्यप्रेप्सुभिः प्रथममवश्यं लघुकथानां प्रसृतिर्विस्तृतिश्च साधनीया, साध्यते च । संस्कृतसाहित्येऽपि प्रागासीदेव निखिलसाहित्याङ्गानामिव लघुकथानामपि विश्वव्यापिनी उन्नतिर्विस्तृतिश्च । तत्साक्षीभूता अद्यापि वरीवर्तन्ते इव पञ्चतन्त्र-हितोपदेश-कथासरित्सागर-कथामृततरङ्गिणी-दशकुमारचरितादयः । परं त्विदानीं तासां वैरल्यमेव गोचरीभवति संस्कृतसाहित्ये सर्वतः । अतः तदुन्नतिसिषाधयिषुभिः तत्प्रसिसीर्षुभिश्च तन्न्यूनतां परिजिहीर्षुभिश्चास्माभिरस्याः पत्रिकायाः प्रत्येकस्मिन्नपि अङ्के एकस्या लघ्व्याः कथायाः प्रकाशनाय अवकाशः कल्पितः । ततः प्रयतनीयं विद्वद्भिर्विद्यार्थिभिश्चास्मिन्विषये । प्रेषणीयाश्च प्रत्यङ्कं सरसाः सरलाः सुन्दराः स्वकपोलकल्पिताश्च लघुकथाः । तासु च या गुणगरिमाणं भजन्ते स्वारस्यातिशयं विन्दन्ते लभन्ते च सौष्ठववरिष्ठतां, ताश्च सादरं सानन्दं सोत्साहप्रदानं च प्रकाशपदवीमुपनेष्यन्तेऽस्माभिः मधुरवाण्यां प्रत्यङ्कम् । अतः त्वर्यतां त्वर्यतां सुरसरस्वतीसमुन्नतिसमाकाङ्क्षिभिः सविशेषशेमुषीकैः स्वतन्त्रविचारशालिभिः सुधीभिः विद्यार्थिभिश्च कविभिः ” इति ।

हुक्केरिकरोपाभिधस्य गोविन्दशर्मणो विद्यार्थिनः

भाषणम्

अयि मान्यतमा अध्यक्षमहाशयाः ! पूज्यतमाः सभासदश्च ! अद्य किल प्राज्ञशिखामणीनां श्रीमतां पुरतः अद्याऽपि विद्यार्थिदशामनतिक्रान्तस्य परिमितमतेर्मे भाषणसाहसं नाम, भगवतः प्रद्योतनस्य पुरतः खद्योतविलसितमिव हनुमतश्चाग्रे चटकोड्डानाडम्बर इव नूनमपहासास्पदं स्यादिति जाने । तथापि संस्कृतप्रणयातिरेकः बलादेव प्रवर्तयति मामस्मिन् कर्मणि । तत्कृपालवो भवन्तः, प्रथमोऽयं प्रयत्न इति वा, विद्यार्थिनः साहसमिति वा संस्कृतप्रेमोद्रेकप्रभवा परिस्फूर्तिरिति वा मे साहसमिदं क्षमन्तामिति साञ्जलिबन्धं सप्रणामं चाभ्यर्थये । अथवा कुतो वा प्रार्थयामि, संस्कृतप्रेम्णा सधैर्यं पुरस्सृत्य कृतं मे भाषणसाहसं गीर्वाणवाणीप्रणयिनो भवन्तः, अवश्यमभिनन्देयुरेवेति दृढं विश्वसिति मे मानसम् ।

अस्माकं भारतवर्षे पुरा या संस्कृतभाषा मातॄणां वात्सल्यमयी लालनभाषा, मातामहीनां जरतीनामानुभविकोपदेशपरकथाभाषा, शिशूनां कलभाषा, युवयुवतीनां प्रणयभाषा, क्रीडान्धयोः दम्पत्योः वहिरननूच्चार्यरहोभाषा, कुलटानामश्लीलभाषा, वारवनितानां ग्राम्यभाषा आसीत्; या च ब्राह्मणानां मुक्तिभाषा, क्षत्रियाणां राजकारणभाषा, वैश्यानां वाणिज्यभाषा, शूद्राणां परिचर्याभाषा बभूव; या च आर्तानां करुणभाषा, सुहृदां विनोदभाषा, विदूषकाणां परिहासभाषा खलानामुच्छृङ्खलभाषा, कलहप्रियाणां गालीभाषा, मदिरापायिनामुन्मादभाषा, भ्रान्तानां प्रलापभाषा, चन्डीनामाक्रोशभाषा, मानिनीनां वक्रभाषा, सपत्नीनां मिथः कलहभाषा, साध्वीनां विनयभाषा, नववधूनां सम्मतिगर्भा 'मा मा' इति निषेधभाषा, वीराणां समरभाषा, भीरूणां कम्पनभाषा, सतां सत्कारभाषा, असतां परिभवभाषा, अतिथिभ्यः स्वागतभाषा, धनमदावलिप्तानामुन्मत्तभाषा, शास्त्रनिष्णातानां प्रौढभाषा, कवीनां सरसभाषा किं बहुना, सर्वेषां सर्वव्यवहारक्षमाचासीद्, या च प्राकृतभाषाभ्यो जन्मदायिनी जीवनोल्लासिनी नवचैन्यरसस्राविणी चाभूत्; या च वेदरूपेण आत्मनः अनादिनित्यत्वं प्रस्थापयति, पुराणवपुषा पुराणत्वं प्रख्यापयति हन्त!! तस्या एव सर्वाङ्गीणहृदयङ्गमत्वं दधत्या गीर्वाणभाषेति अनन्यसामान्यं यथार्थं नाम दधत्याः संस्कृतभाषायाः प्रसार इति नाम, तत्कृते सम्मेलनमिति वा कल्पनाऽपि हृदयमर्माण्येव छिनत्ति सहसा तस्याः पुरातनतादृशसीमातिगवैभवमनुसन्दधतां संस्कृतप्रणयिनाम्। अमरभाषाया अपि मृतत्वापवादोऽपि अधुना श्रूयत इति नितरां शोचनीयं नितान्तं गर्हणीयं लाञ्छनास्पदं व्रीडाकरं च भारतीयानामिदम्। धिगस्मान् सुरभारत्या ईदृशदुरवस्थापादकमौदास्यं बिभ्रतः स्वाभिमानशून्यान्।

दुःखे च सुखमियदेव यद् अधुनाऽपि वा विपद्गर्तनिपतितायाः संस्कृतभाषायाः समुत्कर्षाय भवादृशो महात्मानः सम्मेलनादिरूपेण प्रयतन्त इति। अस्तु सावधानं सानन्दचर्यं सहासोन्मुखं च मे क्षुद्रमपि भाषणं श्रुतवतां गुणपरमाणुमपि स्वादुतया गृहीतवतां श्रीमतामुपकारभरं शिरसा उद्वह्य सविनयं कृतज्ञतां प्रदर्श्य विरम्यते इदानीम्।

वेतण्डतुण्डस्तवः

कवयिता—बालकविः गलगलीण्ढरीनाथशर्मा

निद्राणः सविधे विवर्तनवशाद् व्यालोलकर्णानिलै–
रुन्मीलत्सुरतश्रमौ स्वपितरौ सम्मोदयन् , खेदयन् ।
कुम्भोद्यन्मदलाभलोभिमधुलिड्झङ्कारकोलाहलैः
प्रौढप्रेमरहस्यविघ्नकलनात्, पायात्स विघ्नेश्वरः ॥ १ ॥
विनाऽग्रपूजां भुवि यस्य नूनं न कोऽपि किञ्चित्क्षमते विधातुम् ।
निलिम्पमुक्तासरनायकोऽसौ विनायकोऽस्माकमनामयाय ॥ २ ॥
मातङ्गप्रमुखोऽपि यःस्वजनतापावित्र्यसम्पादकः
भक्तायाभिमुखप्रसन्नवदनो यो वक्रतुण्डोऽप्यहो ।
यश्चोद्यन्मदमेदुरोऽप्ययमसत्पुंगर्वसर्वंकषः
सोंऽहःखण्डनपण्डितो दिशतु शं वेतण्डतुण्डोऽनिशम् ॥ ३ ॥
दन्तेनोन्नमितेऽद्रिकेलिषु मुदा कैलासशैले शिवे
वेगाक्षिप्तपदं क्षिपत्यपि तनूभारं दशास्यभ्रमात् ।
सम्भ्रान्तां गिरिजां स्वयंग्रहपरिष्वङ्गानुबद्धादराम्
दृष्ट्वा स्मेरमुखः सुखं गजमुखः कुर्यादमर्यादितम् ॥ ४ ॥
स्वामिन् पात्रमसौ सदैव बहुलामोदस्य दानस्य ते
कृष्णात्मा मधुपश्च षट्पदगणश्चेत्पङ्कजाताश्रयः ।
दीनेनाऽत्र मयाऽपराद्धमपि किं यन्नो दयावांस्तथाऽ
भूर्मातङ्गमुखेषु युज्यत इयं नीचानुकम्पैव वा ॥ ५ ॥
कर्णोध्दूननजातवातविसरात्सिन्दूररेणूत्करैः
शोणं पुष्कलपुष्कराकरगतं सत्पुष्करं पुष्करात् ।
धृत्वा तारकितं यदुच्छलनतो दृष्ट्वा क्षणं पुष्करम्
सन्ध्याविभ्रमतो ननर्त गिरिशोऽकाले, स देवो मुदे ॥ ६ ॥
वेतण्डस्फुरदाननोऽपि पशुराट्पञ्चाननेनादरा-
दुग्रेणैव सुपोषितः प्रणयतो गण्डे मुहुश्चुम्बितः ।
यो दीर्घैककरोऽपि विस्तृतचतुर्हस्तैः सनाथो महो-
दारो दारयतादिरेतरदरं धीरः स लम्बोदरः ॥ ७ ॥

नो वारणेषु, रमणीवरणेऽपि नेच्छा
नो वा रणोद्धतहयाद्यभिसारणेषु ।
श्रीवारणानन ! परं भवदारुणाप-
त्संवारणाय चरणौ भवतो वृणेऽहम् ॥ ८ ॥

विघ्नेश्वरः संन्नपि विघ्नकारी
विनायकोऽप्येष हि नागभूषः ।
एकद्विजोऽर्धद्विजराजमौलेः
सूनुश्च नैकद्विजवृन्दसेव्यः ॥ ९ ॥

एषा वारणबुद्धिराशु मधुपा ! दूरात्परित्यज्यतां
हंहो वारणधीर्गणेश ! भवतो नैवोचिताऽर्याजनेः ।
जातोऽन्तः किमु वो मदो, बहिरपि स्यन्दत्यहो ते मदः
मत्तानामिति चाटुभिर्मधुलिहां तुष्टोऽस्तु देवो मुदे ॥ १० ॥

विप्राणामहमातनोम्यघमिति त्यागो न मे युज्यते
हन्ताऽद्याप्यनुभावयस्यपचयं भूयो द्विजाधीश्वरम् ।
उन्मत्तोऽहमितीह दूषय न मां स त्वं मदोल्लासितः
नित्यं मूषकवाहनस्य भवतः क्षुद्रत्वधीर्नोचिता ॥ ११ ॥

निजापारौदार्यस्तवमुखररोलम्बनिकरं
दिगन्तोड्डानेऽलं श्रवणचलनादेव विदधत् ।
शनैः स्निग्धापाङ्गां दृशमसदृशंमेऽद्य विकिरन्
भवालम्बो लम्बोदर ! चिरमलं बोधबलदः ॥ १२ ॥

यस्माद्बिभ्यति ते हरीश्वरमुखा यस्य प्रसादाप्तये
सोत्कण्ठाः सततं महोज्ज्वलबलाः यश्चावनैकाश्रयः ।
सोऽन्यादृग् विगताङ्कुशश्च कमलोत्कर्षावहश्चावशा-
स्तापं नस्तु हिनस्तु निस्तुलमहा हस्ती महानानने ॥ १३ ॥

निराश्रये यः कृतपक्षपातः
भुजङ्गसङ्घस्य च नाशकर्ता ।
विनायको मामवतात् कृतोरु-
कृपाच्युतस्यन्दन एव तार्क्ष्यः ॥ १४ ॥

अन्तर्धानसिद्धौ प्रमाणोपपत्तयः ।

निबन्धा—श्रीदीनानाथशर्म्मा शास्त्री सारस्वतः
स. ध. कालेजोपाध्यायः; मुलतान सिटी ।

पूर्वतोऽनुवृत्तम्

'अग्ने ! सहस्राक्ष !' यजुः १७।७१ अस्मिन् मन्त्रे स्वा० दयानन्दः 'इत्थं भाष्यं व्यदधात्-- 'जो योगी पुरुष तपः स्वाध्याय और ईश्वर-प्रणिधान आदि योग के साधनों से योग के बल को प्राप्त होता और **अनेक प्राणियों के शरीर में प्रवेश करके** अनेक शिर नेत्र आदि अंगोंसे देखने आदि कार्यों को कर सकता है ! अनेक पदार्थों वा धनों का स्वामी हो सकता है'। अत्र मस्करी एव प्रष्टव्यो यद् यो योगी अपरेषां शरीरं प्रवेक्ष्यति, तत्र एतत् कथनमनावश्यकमेव यत् सोऽवश्यं सूक्ष्मो भविष्यति। तदा उत्तरणीयं मस्करिणा यत् स योगी स्वकीयास्थीनि आर्यसमाज-मन्दिरस्य हवनकुण्डेषु स्थापयिष्यति, 'सत्यार्थप्रकाशस्य' कर्गजेषु वा ? हन्त ! मस्करिन् ! किं खण्डनमात्रं शिक्षितवान् भवान् ?। अधुना तु भवदीयलेखादेव भवदीयखण्डनं जातम्। किं स्वलेखतोऽक्षिनिमीलनमेव भवद्धर्म्मः ?। परं'या वास्तविकी वार्त्ता भवति, सा एकत्र खण्डने निह्नवे वाऽपि अन्यत्र स्वलेखे स्वयं व्यक्तीभवत्येव। एवमत्र मस्करी स्वलेखतोपि विरुद्धः सिद्धः। यमकिङ्करेषु योगशक्तिः स्वाभाविक्येव भवति।

'संस्तूयमानो हनुमान् व्यवर्धत महाबलः' वाल्मीकिरामायणकिष्किन्धाकाण्डे ६ ७।४ दशयोजनविस्तारो हनूमान् अभवत् तदा' सुन्दरकाण्डे १।१५४ अत्र हनूमत आकारवृद्धिर्दर्शिता। न चेदमसम्भवि कर्म्म। प्राणायामिनो योगाभ्यासिनो वा एतत् कर्तुं प्रभवन्त्येव। अद्यत्वेऽपि ईदृशाः सन्ति जनाः। लवपुरीय डी. ए. बी. कालेजे १८-२०-२१ ईशवीयाब्दनिकटे एको योगाभ्यासी समागत आसीत्। सोऽवोचद् भवन्तो यदङ्गकृते कथयन्तु तद् अहं स्थूलं करिष्यामीति। तदा कश्चिद् वक्ति स्म यद् भवता स्वबाहुः

पीनः क्रियतामिति । ततः स स्वशारीरिकवायुं बाहावेव केन्द्रीकरोति स्म, येन वायुव्याप्त्या बाहुरत्यन्तपीनतां प्राप्नोति स्म । एवमङ्गान्तराण्यपि पीनानि सोऽकरोत् ।

एवं पाठकैरीदृशा जना अपि दृष्टाः स्युर्ये दशद्वादशवर्षपर्य्यन्तं तु कृशा वा साधारणवपुष्का वा स्युः; ततस्तेषां शरीरं क्रमशोऽत्यन्तपीनं जातम्। प्राक् तदीयशरीरेण यावद् आकाशं व्याप्तमासीद्; अधुना तदीयेनैव शरीरेण पूर्व्वापेक्षया द्विगुणस्त्रिगुणो वा आकाशभागो व्याप्तः । कथनस्य अयमेव निष्कर्षो यद् ये खलु पीना भवन्ति; तेषां शरीरेषु वायुरेव तु व्याप्नोति, वायुपूर्णताकारणात् तेषां शरीरं स्थविष्ठं जञ्जन्यते एवमस्थीन्यपि । एवं योगिष्वपि शक्तिर्यत् ते यदैव इच्छेयुस्तदैव बाह्यं वायुं स्वस्मिन् निगृह्य तेन स्वशरीरं यावद् विवर्द्धयिषन्तु, तावद् वर्धयेयुः । इयं शक्तिर्योगिषु अभ्यासेन आयाति, देवेषु स्वभावेन अर्थाद् जन्मनैव भवति । हनूमांस्तु वातजात एवाऽऽसीद् इतश्च वातदेवतावतार आसीत् । स स्वस्मिन् वायुं प्रपूर्य यदि स्वशरीरम् अत्यन्तम् उपबृंहयाञ्चक्रे, तद् नाऽत्र आश्चर्यमत्रसेयम् ।

पुनस्तस्यैव हनूमतः ' सूर्ये चास्तं गते रात्रौ **देहं सङ्क्षिप्य** मारुतिः । **वृषदंशकमात्रोऽथ** बभूवाऽद्भुतदर्शनः ' सुन्दरकाण्डे २।४७ अत्र कायसङ्क्षेपेण विडालपरिमाणवत्त्वमुक्तम् । स च कायसङ्क्षेपस्तावत्प-रिमाणकवायोश्शरीराद् बहिष्करणेन ज्ञेयः । यथा ' फुटबालवालीबालयोः ' 'रबडनिर्म्मितो ' ब्लैडरः ' ' पम्प ' द्वारा वायोः सम्भरणे स्थूलः, ततो वायोर्निष्कासने च सूक्ष्मो जायते । तथैव योगिषु, देवेषु, देवावतारेष्वपि च इयं शक्तिर्यत् ते यदैव इच्छेयुः, वायुं प्रपूर्य स्वशरीरं स्थूलं कुर्य्युः; यावच्च स्वशरीरं ते सूक्ष्मं चिकीर्षेयुः, तावत्परिमाणकं वायुमन्तर्निदध्युः, अवशिष्टवायुं च शरीराद् बहिष्कुर्य्युः । परं साधारणजनेषु स्वयं नैषा शक्तिः । ते तु स्वशरीरप्रकृतिपरतन्त्रा एव । यदा तद्वशाद् वायुपरिपूर्ण्णा भवन्ति; तदा स्थूला जायन्ते । यदा च ज्वरादिकारणात् स वायुः शनैस्तच्छरीरतो बहि-र्भवति; तदा तनुतनुलताका भवन्ति । परं स्वतस्तेषु तथा न्यूनाधिकतायां

स्थूलसूक्ष्मतायां वा शक्तिर्न भवति। अत एव ते पुराणवर्णितऋषिमुनियोगिषु तथात्वं दृष्ट्वा विस्मयमानमानसास्तत्र असम्भविताशङ्कां वितन्वन्ति। परं तैरत्र '**ऋषीणामपि** मन्त्रब्राह्मणदर्शिनां **सामर्थ्यं नाऽस्मदीयेन सामर्थ्येन उपमातुं युक्तम्**। तस्मात् समूलमितिहासपुराणम्.... **योगोपि आणिमाद्यै**श्वर्यप्राप्तिफलः स्मर्यमाणो **न शक्यते प्रत्याख्यातुम्**' वेदान्त० शाङ्कर० १।३।३३ इति वचनमवधेयम्।

एवं 'यद्यपि प्राकृताः प्राणिनो न तद्व्यवहारमनुसन्दधाना दृश्यन्ते, तथापि न प्राकृतवद् ईश्वराणां भवितव्यम्। तथाहि प्राणित्वाऽविशेषेपि मनुष्यादिस्तम्बपर्य्यन्तेषु ज्ञानैश्वर्य्यादिप्रतिबन्धः परेण परेण भूयान् भवन् दृश्यते। तथा मनुष्यादिषु हिरण्यगर्भपर्य्यन्तेषु ज्ञानैश्वर्याद्यभिव्यक्तिरपि परेण परेण भूयसी भवति इत्येतच्छ्रुतिवादेषु असकृद् अनुश्रूयमाणं न शक्यं नास्तीति वदितुम्' वेदान्तदर्शने १।३।३० इति शाङ्करभाष्यमपि सदैव स्मर्त्तव्यमविश्वासघनैः।

एवं च यत्र हनूमतो विडालपरिमाणवत्त्वमुक्तम्; तत्रैव तस्य अन्योपि शरीरसङ्क्षेपः प्रोक्तः। तथाच 'स **सङ्क्षिप्यात्मनः कायं** जीमूत इव मारुतिः। तस्मिन् मुहूर्ते हनुमान् बभू**वाङ्गुष्ठमात्रकः**' सुन्दरकाण्डे १।१५६ अत्र च तस्यैव विशालाकारस्य हनूमतः क्षणमात्रे अङ्गुष्ठपरिमाणवत्त्वं निदर्शितम्। देवादीनां तदवताराणां वा, अस्मद्विलक्षणसृष्टीनामृषिप्रभृतीनां च अस्थीन्यपि अस्मदादिकवत् पृथ्वीभागभूयिष्ठानि न भवन्ति, येन तेषां कायसङ्क्षेपावसरे अस्थिसङ्क्षेपे काठिन्यं स्यात्। वैशेषिकदर्शनस्य प्रशस्तपादभाष्ये द्रव्यग्रन्थे पृथ्वीनिरूपणे तत्र अयोनिजम् **अनपेक्ष्य शुक्रशोणितं देव-ऋषीणां शरीरं** धर्मविशेषसहितेभ्योऽणुभ्यो जायते' इत्यादिना ऋषिदेवादीनामुत्पत्तिरस्मद्विलक्षणा प्रोक्ता। तेन न तेषां शरीरेषु अस्मच्छरीरसाम्यमनुमाय तत्र शङ्का विततयितव्याः। एवमेतदादिकानां ग्रन्थानां स्पष्टोल्लेखे विद्यमानेपि यमकिङ्कराणामस्थिसङ्क्षेपणे

सन्दिहानो मस्करी अल्पश्रुतोऽल्पविज्ञानज्ञानोऽपि च सिद्धः।

स्वामी दयानन्दो योगदर्शनं तदीयव्यासभाष्यं, योगसिद्धीश्च मन्यते। तथाच स सत्यार्थप्रकाशस्य तृतीयसमुल्लासे ४२ तमे पृष्ठे, संस्कारविधे-र्वेदारम्भप्रकरणे ११२ पृष्ठे, ऋग्वेदादिभाष्यभूमिकाया ग्रन्थप्रामाण्याऽप्रामाण्य-विषये २६३ पृष्ठे पतञ्जलिमुनिकृते योगदर्शने व्यासमुनिकृतभाष्यस्य प्रामाणिकतां ग्राह्यतां च आचष्ट। तर्हि तस्यैव योगदर्शनस्य 'ततोऽणिमा-दिप्रादुर्भावः, कायसम्पत्, तद्धर्मानभिघातश्च ३-४५ इति सूत्रेण योगिनोऽणिमा सिद्ध्यति।" तत्र आणिमा भवति **अणुः** तद्धर्मानभिघातश्च **शिला-मपि अनुप्रविशतीति**" इतितत्रत्यव्यासभाष्येण च योगिषु 'अणिम' सिद्धिः सिद्धा। अणिम्ना खलु यदा योगी शिलां प्रविशति; तदा तस्य स्थूलास्थीनि खलु ऋग्वेदादिभाष्यभूमिकायाः कर्णजेषु निवसन्ति? तदीयवेद-भाष्यकर्णजेषु वा? इति स्वामिना प्रवक्तव्यम्। इदानीं 'जो कहो कि सूक्ष्मदेह भी धारण कर लेते हैं, तो प्रथम पर्वतवत् शरीर के बडे२हाड पोपजी, विना अपने घर के कहां धरेंगे।' स० प्र० पृ० २१६ इति तस्यैव प्रश्नस्तस्यैव गलग्रहं कुर्य्यात्; यदि सोऽस्मत्समाधानं न स्वीकुर्यात्। एतेन सिद्धं यत् सनातनधर्म्मद्वेषी मस्करी स्वकीयमान्यग्रन्थानपि न पश्यतीति।

फलतः--अयमणिमैव अन्तर्धानविद्याया बीजम्। अणिमसिद्धिसमु-पलब्धौ योगी स्वयमेव जनसाधारणदृष्टौ अन्तर्हितो भवति। इयं शक्तिर्देवेषु जन्मनैव भवति, ऋषिमुनियोगिषु योगसिद्ध्युपलब्ध्या योगाभ्यासेन वा प्राप्नोति। इयमेव अन्तर्धानसिद्धिः 'तिरस्करिणीविद्या' इति नाम्नापि कीर्त्यते। मेनकोर्व्वशीप्रभृत्यप्सरसां तिरस्करिणी विद्या प्रसिद्धैव।

अन्तर्धानं विविधाभिर्विधाभिर्भवति। प्रथममन्तर्धानं तु अणिम्ना भवति यथा प्राक् प्रतिपादितम्, इदं वास्तविकमन्तर्धानम्। तदा दर्शकस्य पश्यत एव सोऽन्तर्धीयते, यथा सत्यनारायणकथायां वृद्धब्राह्मणरूपधारी भगवान् नारायणः शतानन्दब्राह्मणस्य पश्यत एव अन्तर्हित इति।

॥ श्रीनिवासप्रसादनम् ॥

ले. पं. कृष्णमूर्तिशास्त्रिणः व्याकरणप्रधानाध्यापकाः
संस्कृत कालेज मदुरा

पूर्वतोऽनुवृत्तम्

नानात्मनाप्यसुरकीनाशतामभजदेनांसि हन्ति धरणौ
योऽनादिरम्बुरुहयोनावुदीत कृपया, नायको दिविषदाम् ।
न्यूनान्यवेदानिवहानार्तिभङ्गकृदनेना॰ दिदेश महितान्
हानाय मोहतमसोऽनामयाय स च मेऽनारतं
प्रभवतात् ॥१२९॥

आराधितं निगमसारायितं भृशमुदारात्मभिश्च, दधतं
वाराशिराजतनुजारामकल्पमुरुहारावळीधुरमुरः ।
धाराधरोपमशरीराभिराममरारातिसिन्धुरहरिं
नीरागिणां श्रयत दूरादसन्तमिह ताराधिनाथवदनम् ॥१३०॥

मागा व्यथां हृदय ! योगाधिगम्य ◎महिमाऽगाग्रसंविहरणः
त्यागाय स स्फुरति यागाधिपो विहितभागाय यः स्पृहयति ।
नागाधिराजवरभोगायमानभुज ! वेगादुपेत्य दयया
श्रीगात्रवीरुदुरुरागाद्यनृत्यहृदि, रोगान्हरेभवरद ! ॥१३१॥

ओजायमानमहिराजाद्रिमूर्ध्नि भृशमाजावरातिजयिनं
पूजार्हमङ्घ्रियुगभाजां विमुक्तिदमुरोजाग्रदङ्क∴सुभगम् ।
गोजातनाथमुडुराजार्कनेत्रमनघाजाय जन्म ददतं
श्रीजानिमाभुहि सरोजाक्षमाप्तवनसाजात्यमाशु हृदय! ॥१३२॥

श्रीकामुक! स्वयमनाकाम ! निर्मलचिदाकार! जन्मजलधेः
नौकायमान! मम पाकान्तकृद्भिनुत! शोकान्हर द्रुततरम् ।

॰ अनेनाः=अपापः ◎ अगः=पर्वतः ∴ अंकः=श्रीवत्साख्यः।

राकाशशाङ्कमुख! नो कामयेऽहमपि लोकान्विरक्तहृदयः
नाकादिमान्गगननीकाश! देह्यनिशमेकान्तभक्तिमिह
मे ॥१३३॥
प्रासं निशम्य परिहासं त्यजाद्य भृशमासं ह्रियाऽऽनतशिराः
नाथाम्यजस्रमहिनाथाङ्कतल्प! महिनाथ! प्रसीद पृथुके ।
मन्तुं क्षमस्व यदहं तुङ्गशैलमपि गन्तुं यतेऽर्जितधनैः
न्यस्तो भरस्त्वयि समस्तोऽपि देह्यभयहस्तोऽमितं च
भविकम् ॥१३४॥
प्रत्यर्थिनस्सपदि यन्तु प्रशान्तिमिह सद्भयश्शुभं च ◆भवका
निर्व्याजभक्तिभरनम्रं कुरुष्व तव डिम्भं प्रसन्नहृदयः ।
धुक्षीष्ट शिष्टजनकष्टं निरस्य भृशमिष्टं च धर्मसुरभिः
श्लोकान्गृहाण कुलपालाद्य मे मधुरवाणीं पुषाण
घृणया ॥१३५॥
अहीशशैलवासिनं महीन्दिरामनोहरं
गृहीतरम्यकार्मुकं विहीनपुण्यदुर्ग्रहम् ॥
जहीहि मा मनो! यतो नहीश्वरः परो हरेः
स्तुहीह सर्वदा मुदाऽप्नुहीप्सितं द्रुतं भुवि ॥ १३६ ॥
अजादिनिर्जरार्चितं यजाधिराजमुक्तिदम्
भुजातिनिर्जितासुरं । निजाङ्घ्रिभाग्रुजाहरम् ॥
ध्वजायितद्विजेश्वरं सुजातपङ्कजेक्षणम्
व्रजाङ्गनाप्रियङ्करं व्रजामि सिन्धुजेश्वरम् ॥ १३७ ॥
सुपर्वराजपूजितं सुपर्वते चकासतम्
कपर्दितुल्यविक्रमं नृपर्युदीप्तसत्कृपम् ॥
उपर्यवस्थितं श्रुतेरपर्यवस्यदोजसम्
विपर्ययैकदुर्ग्रहं सपर्यया भजे हरिम् ॥ १३८ ॥

◆ भवका=भवतात् आशिषि कनश्च नेति नेत्वम् ॥

अधोक्षजः प्रपद्यतामधोगतेरनाप्तये
मधोर्द्विषन्नपि ✤ द्विपे ह्यधोग्दयालुरीहितम् ॥
सुधोदधेरवाप यो विधोस्सहोदरीं, पराम्
स धोरणीं श्रितोऽस्ति नो, ० मुधोपसृप्यनूनलम् ॥१३९॥
उरीकरोतु मे मनस्सरीसृपेशशायिनम्
दुरीहितप्रहाणये करीन्द्रचङ्क्रमं प्रभुम् ॥
अरीन्निगृह्य रक्षिताऽमरीस्तुतोऽमृतान्धसां
नरीह मय्युदग्दयश्चरीक्रियेत भावुकम् ॥ १४० ॥
मनोमलं जिहासतामनोहकं × सुपर्वणाम्
तनोर्घनद्युतेर्धरं मनोः कुलेऽवतारिणम् ॥
धुनोति शोकमात्मजान्दनोर्विजित्य यश्च तम्
विनोपजम्भभेदिनं न नोऽस्ति निर्भरोऽवनौ ॥ १४१ ॥
बलाहकप्रभाभृतं बलारिमुख्यकिङ्करैः
इलाधरोपरिस्फु§रं विलासिनं सह श्रिया ॥
कलाधरार्कलोचनं कलावपीह सुग्रहम्
खलातिमात्रभीकरं छलादृते स्मराम्यहम् ॥ १४२ ॥
महोन्नतं प्रभावतो महो महच्च बिभ्रतम्
सहोदरं बिडौजसो गृहोपमं यतात्मनाम् ॥
(§) बहोः श्रुतेर्गिरामरं रहोभिधेयमादरात्
[] अहोऽखिलं भजेत मामहोधिनाथसप्रभम् ॥ १४३ ॥
सदार्तिभञ्जनोद्यतं सुदारुणं सुरद्रुहाम्
उदारकीर्तिभास्वरं मदावलेन्द्रमुक्तिदम् ।
निदाघरुग्विलोचनं सुदामभिर्मनोहरम्
मुदा श्रयेऽहमन्वहं गदाधरं श्रियः प्रियम् ॥१४४॥

✤ द्विपेऽपीत्यन्वयः ० नः + अस्माकम् ∞ अस्य रक्षिते-त्यनेनान्वयः । × सुपर्वणामित्यनोकहविशेषणम् । § क्विबन्तम् । (§) बह्वादित्वान्ङीष् [] दिनपर्यायः नाव्ययः अत्यन्तसंयोगे द्वितीया ।

ऋगादिवेदसन्नुतं मृगाङ्कमूर्धसंस्तुतम्
खगाधिपाधिरोहिणं नगाग्रसंविहारिणम् ।
अगारमेकमोजसां स्वगात्रनूत्यदिन्दिरम्
न गायतीह कोऽवनावगाधसत्वमीश्वरम् ॥१४५॥
हराऽद्य मे भयं मृतेः पुराणपूरुषोत्थितं
विरागिणामदूरग! ◫ स्थिराप्रियाऽत्र शावकम् ।
धराधरेन्द्रमुच्चकैर्विराजमान! संश्रितः
स्फुरान्तरे निरन्तरं सुराधिराजसेवित ॥१४६॥
अरण्यवासिनं पुरा धरण्यपत्यसीतया
हिरण्यगर्भजन्मदं शरण्यमेकमर्थिनाम् ।
जयन्तमुग्रकैटभं धयन्तमिन्दिराधरम्
श्रयन्तमद्रिशेखरं वयं तमानमाम हि ॥१४७॥
वनस्रजातिसुन्दरं दरस्फुरत्सितस्मितम्
मितेतरात्मवैभवं भवाम्बुधेस्तरिं हरिम् ।
हरित्पतिप्रपूजितं जितात्मनामदुर्लभम्
लभस्व मानसाऽद्य मे यमाद्भयं च मास्तु ते ॥१४८॥
त्रयीनिवेद्यवैभवं भवान्तरं जगद्धरं ⊕
धरारमापरिष्कृतं कृतामरारिनिग्रहम् ।
ग्रहार्तिभञ्जनक्षमं क्षमावतां प्रियङ्करम्
करोल्लसच्छरासनं सनात्पुमांसमाश्रये ॥१४९॥
गभीरभावभासुरामुदाररीतिमेदुराम्
समिद्धबन्धबन्धुरामनल्पकल्पनापराम् ।
सुवृत्तदन्तुरेतरां रसोर्मिभिर्विकस्वराम्
श्रियः पते! मनोहरां दिश त्वमावलिं गिराम् ॥१५०॥

(क्रमशः)

◫ संबोधनान्तम् । ⊕ हरमित्यनेन समासः ।

कथं स्यात्संस्कृतभाषाभ्यासस्योत्कर्षः ?

अनुवादकाः—एम्. पी. वालीमहोदयाः एम्. ए.

अतिबृहदपि संस्कृतसाहित्यमाधुनिककाले संस्कृतस्याध्येतॄणां कृते विश्वविद्यालयविनिर्दिश्यमानाध्ययनक्रमेऽत्यल्पभाग एव तस्य समारोप्यत इत्यहो नु कष्टमेतत् । संस्कृतसाहित्यस्य नैकस्यामपि शाखायामेकोत्तरं शतमप्यधुनोपयुज्यते । यतो वैदिकवाङ्मयविषये नैकोऽप्यध्येता यजुर्वेदीयकाण्वसंहिताया अध्ययनं करोति । केवलं ऋग्वेदसंहिताया अन्यासां च कासामपि संहितानां कियन्त्यः ऋचो विद्यार्थिनामध्ययनक्रमे निर्दिष्टा अभ्यस्यन्ते । पैप्पलादादयो वैदिकसंहिताः जैमिनीयप्रमुखा ब्राह्मणग्रन्थाः, प्रायः सर्वे च श्रौत-धर्म गृह्यसूत्रग्रन्थास्तथैव च तेषामसंख्यानि भाष्याणि तत्तद्वेदानां प्रयोगपद्धतिलक्षणग्रन्थाश्चेत्येतद्विस्तृतं वैदिकसाहित्यं निरादरवृत्त्याऽऽवधीरितप्रायमेव । परीक्षायाः कृते द्वित्राणां पुस्तकानामध्ययनेनालं तदधिकं चाव्यवहारिकमिति सर्वैर्मन्यते । अयमेव भावोऽवलम्ब्यते संस्कृतसाहित्यस्य शाखान्तराणामपि विषये । भारतदेशस्य मनोव्यापारं निरूपयितुः संस्कृतसाहित्यस्य महानंशोऽध्ययनक्रमे सर्वथा न दृश्यते । कतिपयापवादान्वर्जयित्वा बौद्धवाङ्मयः संस्कृताभ्यासक्रमे नैव लब्धावकाशः । तथा च जैनवाङ्मयः । स्वरशास्त्रं शिक्षणविषय इति न गृहीतम् । तथैव शिल्पोऽपि । वीरपुरुषेतिहासायापि स्थानं न दत्तम् । विश्वविद्यालयेष्वध्येतव्यविषयेष्वप्युद्धरणं स्तोकमात्रमेवास्त्यतः प्रतिवर्षं त एव कतिपया ग्रन्थाः प्रकल्प्यन्ते । इतरे च सर्वे विस्मृतिपथं नीयन्ते ।

अभ्यासार्थमुद्धृताश्च केचित्संग्रहा भाषादृष्ट्याऽतीव दुर्बोधाः सन्ति । स्वाभाविकस्य भाषाप्रवाहस्य प्रदर्शयित्री सरलगम्भीरसरणिर्न तत्र दृश्यते । सुबन्धुसदृशा ग्रन्था अनुचितगौरवपदमानीताः । प्रमाणभूतसंस्कृतग्रन्थानां छात्रेभ्यः परिचयकरणमेव विश्वविद्यालयेषु संस्कृताध्ययनस्य हेतुरद्य संजातः । किन्तु भाषाभ्यासस्य हेतुर्भाषापाण्डित्यसंपादनेनैव नावसीदति, तर्हि तद्भाषानिरूप्यमाणसंस्कृत्यवगाहनमप्यावश्यकम् । तत्संस्कृत्यवगमायेतस्ततः कतिपयग्रन्थवाचनं नालं, किन्तु

यावच्छक्यं तावद्वाचनमावश्यकम् । परीक्षार्थं नियमितग्रन्थानां सूक्ष्माध्ययनानन्तरं विद्यार्थिभिः साहित्यसागरस्य बहुभाग आलोडयितव्यः । इंटरमीजियेट् तथा च बी. ए. परीक्षाभ्याससमये दशसहस्रपृष्ठांशोऽपि समापयितव्यः । येषां च संस्कृतमेवैच्छिकविषयः तैर्वाचनीयपृष्ठसंख्या त्रिगुणा चतुर्गुणा वाऽपि भूयात् । अन्यच्च परमार्थतो ये ग्रन्थास्ते संस्कृताध्ययनक्रमेऽनुपूर्वं प्रवेष्टव्याः । एवं कालेन गच्छता छात्रवर्गो गृहीतसंस्कृतसाहित्यविस्तरज्ञानो भवेत् । अध्यापकवर्गोऽप्यनया पद्धत्योपकृतो भवति । यतोऽध्यापकैस्तदाऽवश्यं संस्कृतसाहित्योदधिरालोड्यते । संस्कृतस्याध्ययनाध्यापनक्रमश्चानन्ददायको भवेत् । इदानींतनसंस्कृताध्यापकवर्गस्य मान्द्येन संस्कृताभ्यासोऽतीवोपहतश्चास्ति ।

अन्यदप्यत्र विचारणीयम् । यदि संस्कृतसाहित्यं सर्वांशेन छात्राणामध्ययनभूमिर्न क्रियते तदा वाङ्मयो मृतप्रायो भवेत् । अध्येतृवर्गो बहुशोऽध्ययनक्रमान्तर्गतपुस्तकव्यतिरिक्तान्ग्रन्थान्नैव पठति । यद्येकदा लघुवाचनादिभिश्छात्रा वाचनशीला भवेयुस्तर्हि अपरजीवितकाले संस्कृतवाङ्मयस्यैकतमस्याप्यङ्गस्याध्ययनं कुर्वीरन् । अतोऽध्येतृगणे वाचनाभिरुचिरवश्यं निर्मातव्या ।

भारतवर्षस्य महिमा संस्कृतभाषया निबद्धोऽस्ति किल । अत एव संस्कृतस्योज्जीवनेन भारतदेशस्योज्जीवनं, संस्कृतस्यावसादेन च भारतदेशस्यावसादः । एषः भूतार्थः प्रत्यक्षीकर्तव्यो भारतदेशस्थैर्निखिलैर्गृहीतविद्यैर्यो वा को वा भवतु तेषां धर्मः । तथा च राष्ट्रस्य कशेरुकाभूतं संस्कृतसाहित्यं न कदाप्यवनमयितव्यमिति सर्वैरकृत्रिमदेशाभिमानिभिर्ज्ञातव्यम् ।

टीपः—(' मॉडर्न रिव्हयू 'मासपत्रिकान्तर्गतस्य लाहोरपत्तनस्थायाः भारतीयसंस्कृतरन्तरराष्ट्रीयसंस्थायाः प्रवर्तकानां, एम्. ए. पि. एच्. डी. डी. लिट् इत्याद्युपपदविभूषितानां डॉक्टर **रघुवीरमहोदयाना**मांग्ललेखनस्याधारेण लिखितमिदम्)

समस्या--पूर्तयः ।

श्रीगीता-जनके हरावपि च यत्स्त्रैणत्त्वमारोप्यते
स्यान्नैतत्परमार्थतो भगवति श्रीवासुदेवे परे ॥
सामान'ऽधिकरण्यमेतु तमसा भास्वान् कथं वा स्वयं
लोके काऽपि सिताऽसितं वद सखे ! दृष्टं त्वया मौक्तिकम् ॥१॥
वर्षा-श्यामल-मेघ-वर्ण-वपुषा नीलायमानं मुहुः
विद्युत्सन्निभ-रत्न-भाभिरुपरि स्वर्णायमानं तथा ॥
गोपाः प्रोचुरथो निरीक्ष्य भगवत्कण्ठास्थितं कौस्तुभम्
लोके काऽपि सिताऽसितं वद सखे ! दृष्टं त्वया मौक्तिकम् ॥२॥
राजत्पार्वण-यामिनीशरुचिरां नीलाम्बरेणाऽऽवृताम्
पद्मासरुचोज्ज्वलामाभिधवं यातुं त्वरां कुर्वतीम् ॥
दृष्ट्वा कामपि कोऽपि विस्मितमना प्रोवाच मित्रं स्वकम्
लोके काऽपि सिताऽसितं वद सखे ! दृष्टं त्वया मौक्तिकम् ॥४१॥
तातः ! किं नु कुमार ? पूर्वहरिति प्रद्योतते ब्रूहि किं
बाल ! श्रीमुकुंदप्रियोऽयमधुना प्राच्यां दरीदृश्यते ॥
श्यामं किंनु ? कुमार ! तस्य शशको, रक्तः कथं ? शैशवात् !
लोके काऽपि सिताऽसितं वद सखे ! दृष्टं त्वया मौक्तिकम् ॥५॥

आठलेकरोपाभिख्यः लक्ष्मणशर्मतनुजन्मा श्रीपादशर्मा
इचलकरंजीस्थसंस्कृतपाठशालानिवासी

कस्तूरीतिलकश्रिया सहकृतां गौरीरदालिं विना
नासामौक्तिकरोचिषोत विलसत्कान्ताकटाक्षं विना ॥
श्रीगीताचरमोक्तिमौक्तिकमणिं कृष्णार्जुनौ वा विना
लोके क्वापि सितासितं वद सखे दृष्टं त्वया मौक्तिकम् ॥१॥

हुबळीकरोपाव्हभीमाचार्याणाम् विजयपुरम्

गाढप्रेमरसौघसन्ततमिथःसंश्लिष्टगौरप्रभ-
श्रीराधास्फुरदिन्द्रनीलमणिभश्रीकृष्णरूपं परम् ॥
देवैरीशविरिञ्चिवासवमुखैरप्यनालोकितं
लोके क्वापि सितासितं वद सखे दृष्टं त्वया मौक्तिकम् ॥१॥
पापं यद्यदकारि दुष्टमनसा जन्मान्तरेषु त्वया
तद्भुङ्क्ष्व प्रतिकारयत्नरहितस्त्वं कृष्णमन्त्रः स्मरन् ॥
अद्यान्तं किमहो विधिः प्रतिकृतः केनापि भोगं विना
लोके क्वापि सितासितं वद सखे दृष्टं त्वया मौक्तिकम् ॥२॥
अद्य स्नातुमनूरुसारथिसुतातीरं गता त्वत्प्रिया
राधा, मौक्तिकमेकमध्वनि तदा तन्मुद्रिकातश्च्युतम् ॥
तस्यै वस्तु न रोचते भुवि किमप्यन्यद्विना तेन त-
ल्लोके क्वापि सितासितं वद सखे दृष्टं त्वया मौक्तिकम ॥४॥
वृन्दारण्यनिकुञ्जकेलिभवने कृष्णेन राधा समं
क्रीडन्ती निजगाद तं स्मितलसद्वक्त्राम्बुजा साञ्जलिः ॥
मानं मानभृतां हरे हरति यश्चन्द्रो घनैर्निर्गतो
लोके क्वापि * सितासितम् वद स, खे दृष्टं त्वया मौक्तिकम् ॥५॥

श्रीमुकुन्दभवनसंस्कृतपाठशालाविद्यार्थिनो
राधाकृष्णशर्मणः [पुण्यपुरम्]

स्थूलस्थूलमहार्घमौक्तिकसरान् कण्ठे बबन्धादरा-
न्माता वारिधरद्युतेर्यदुपतेर्बालस्य तत्तेजसा ॥
नीलार्धाधरभागमौक्तिकमणीन् दृष्ट्वाऽवदद्विस्मयात्
लोके क्वापि सितासितं वद सखे दृष्टं त्वया मौक्तिकम् ॥

पांडुरंगी प्रल्हादशर्मणः
एस्. एम्. एस्. ओ. कॉलेज विद्यार्थिनः (पद्मसरोवरम्)

---

* सिता—शर्करा तद्वत्—सितम्

लोके क्वापि सितासितं वद सखे !! दृष्टं त्वया मौक्तिकम्
कान्ते !! त्वत्कुचकुड्मलाग्रविलसद्रत्नावलीमध्यगम् ।
व्यक्तं मौक्तिकमेव मामकघनश्यामाङ्गसङ्गेन चे-
त्यालापः प्रमदाय वोऽस्तु सततं सत्यासतीशौरिणोः ॥१॥
लोके क्वापि सितासितं वद सखे ! दृष्टं त्वया मौक्तिकम्
हासाङ्कूरविलासभासुरमध श्वेन्दीवराक्ष्याः परम् ।
श्यामालोलकटाक्षकान्तिलहरीलेपानुषङ्गोज्ज्वलं
नासामौक्तिकमेव तादृशमहो !! सन्दृश्यते भूतले ॥ २ ॥

श्री. नेरेळ. शतावधानि वेङ्कटाचार्याणाम्

बडलिङ्गपूर (संस्थान)

श्रीमदर्धनारीश्वरपरा

स्वच्छस्फाटिकशुभ्रवर्णकलितं यद्दक्षिणाङ्गे तथा
मेघश्यामसमानकान्तिरुचिरं वामाङ्गभागे सदा ।
तद्ब्रह्मात्मककृष्णपिङ्गलमिति श्रुत्युक्तसाम्योपमं
लोके क्वापि सितासितं वद सखे दृष्टं त्वया मौक्तिकम् ॥१॥

श्रीरामपरा

यद्दिव्यासितरूपमुज्ज्वलतमं रामस्वरूपायते
यत् स्फूर्त्या सितकीर्तिमूर्तिविभवं नामस्वरूपायते
तत्तेजोमयमूर्तिकीर्तिविलसद्रामोपमं शाश्वतं
लोके क्वापि सितासितं वद सखे दृष्टं त्वया मौक्तिकम् ॥२॥

चंद्रपरा

शुक्ले यस्य कलाः क्रमेण सकलाः सम्पूर्णतासङ्कुलाः
कृष्णे क्षीणदशावशा असदृशा दर्शाश्रिता दर्शने ।
रम्याकाशनिकाशमौक्तिकमणिं तं पूर्णचन्द्रं विना
लोके क्वापि सितासितं वद सखे दृष्टं त्वया मौक्तिकम् ॥३॥

सूर्यपरा

यत्कृष्णार्णनिजस्वरूपममलं सद्वर्तुलाद्दृश्यते
तेजः सर्वजगत्प्रकाशनपरं शुभ्रस्वरूपायते ॥
तद्यावद्रुचिमण्डलावृतरुचा सूर्योपमं प्रोज्ज्वलं
लोके क्वापि सितासितं वद सखे दृष्टं त्वया मौक्तिकम् ॥४॥

शनैश्चरपरा

यच्छास्त्रेष्वसितार्णशोभितरुचा देवात्मना वर्ण्यते
आकाशे सितरूपतामधिगतं तेजःस्वरूपायते ।
तद्दिव्याकृतिभाक्शनैश्चरसमं सूर्यात्मजातप्रभं
लोके क्वापि सितासितं वद सखे दृष्टं त्वया मौक्तिकम् ॥५॥

हूलिबृहन्मठाध्यक्षाणां
तर्कतीर्थोपाव्हश्रीनीलकण्ठशिवाचार्याणाम्

लोके क्वापि सितासितं वद सखे दृष्टं त्वया मौक्तिक-
मित्युक्तः सुहृदा सविस्मयभरस्तं नेत्यहं प्रोक्तवान् ।
किं मे दर्शयितुं क्षमोऽसि तदिति प्रश्नं च मे कुर्वते
मत्कान्तावदनं शुचि प्रहसता नलिालकं दर्शितम् ॥

लिमये बालकृष्णशर्माणः
मुम्बापुरी

लोके क्वापि सितासितं वद सखे दृष्टं त्वया मौक्तिकं
तन्वी ध्यानरता यदा विरहतो नासाग्रदत्तेक्षणा ।
तस्याः श्यामकनीनिकाञ्जनरुचिच्छायार्धनीलद्युति
नासाभूषणमौक्तिकं मतिहरं यूनां तथा दृश्यते ॥

श्री. पं. गलगली मुद्दूविठ्ठलाचार्याणाम्
संस्कृतपाठशालाध्यापकानाम् (करजगी)

कृष्णस्यैव हि कृष्णया परिलसत्कान्त्या वरं मौक्तिकं
नासाग्रे सहसा सितासितमभूदाभीरवामभ्रुवः ॥
सौभाग्यातिशयैकदृश्यमतुलं त्यक्त्वा तदन्यन्पुनः
लोके क्वापि सितासितं वद सखे दृष्टं त्वया मौक्तिकम् ॥ १ ॥
गौरीकण्ठगहारलम्बितमहामुक्ताफलं सङ्गमे
गौरीशङ्करयोः सितासितमभूद् कण्ठोल्लसद्रोचिषा ॥
तद्दृष्ट्वा विहसन् जगाद शशिनं मन्दं ललाटानिलः
लोके क्वापि सितासितं वद सखे दृष्टं त्वया मौक्तिकम् ॥ २ ॥
कालिन्दीसुरसिन्धुसङ्गमजलभ्राम्या समुल्लासितं
फेनं नीलरुचा च शुभ्रमहसा श्यामार्धभागद्वयम् ॥
मुक्तासोदरबिन्दुबन्धुरमलं दृष्ट्वाऽह कश्चिन्सुधीः
लोके क्वापि सितासितं वद सखे दृष्टं त्वया मौक्तिकम् ॥ ३ ॥
ग्रस्तेऽर्धं रजनीकरे सुखकरे स्वर्भानुना, भानुना
क्षीणे तत्क्षणमेव कोऽपि रसिको मित्रं जगदात्मनः ॥
पश्याऽऽश्चर्यकरं सितासितमिदं नाकश्रियो मौक्तिकं
लोके क्वापि सितासितं वद सखे दृष्टं त्वया मौक्तिकम् ॥४॥

साहित्यरत्नं पं. तिवाडीनन्दलालशर्मणः
बबाई (राजपुताना)

लोके क्वापि सितासितं वद सखे दृष्टं त्वया मौक्तिकम्
शम्भोर्मूर्ध्नि दृगग्निधूमकलितं चन्द्राभिधं मौक्तिकम् ॥
कैलासोपवनीविहारसमये किंचारविन्दभ्रमा-
दालेढुं त्वरितालिसन्निधिवशाद्गौरीमुखेऽदर्शि तत् ॥ १ ॥
लोके क्वापि सितासितं वद सखे दृष्टं त्वया मौक्तिकं ?
दृष्टं तच्छृणु मित्र ! चित्रमधुना वक्ष्यामि पृच्छोत्तरम् ॥

उत्सङ्गे शयितस्य नीरदरुचेर्भृङ्गालकोल्लासिनो
भासां नन्दशिशोः परिस्फुरणतो मातुर्मुखे मौक्तिकम् ॥ २ ॥
लोके क्वापि सितासितं वद सखे दृष्टं त्वया मौक्तिकम्
किं वाऽऽश्चर्यमयेऽत्र तादृगतुलं दृष्टं मयाऽद्य व्रजे ॥
अग्रे चुम्बनलोलमाधवतनोर्नीलत्विषा पार्श्वयोः
हीरोल्लासितकुण्डलोज्ज्वलरुचा राधामुखे मौक्तिकम् ॥ ३ ॥
दृष्टा किं मिहिरप्रभा निशि, दिवा जैवातृकस्य द्युतिः
दृष्टः किं शरदि स्फुरत्स्वरपिकः काकश्च मञ्जुध्वनिः ॥
दृष्टा किं बहुदोषसंकुलकलौ पापेषु शुद्धात्मता
लोके क्वापि सितासितं वद सखे दृष्टं त्वया मौक्तिकम् ॥४॥
लोके क्वापि सितासितं वद सखे दृष्टं त्वया मौक्तिकम्
दृष्टं मित्र ! किमत्र चित्रमधुना क्वापीतिशब्दः कुतः ॥
अभ्यङ्गे शिथिलीकृतैः कचभरैः स्कन्धादधोलम्बिभिः
भ्राजच्चन्दनचार्चितस्रजि गतं प्रत्येकशो मौक्तिकम् ॥ ५॥

पं० श्रीगलगलीमुद्गविठ्ठलाचार्यतनुजस्य शुकाचार्यस्य.

लोके क्वापि सितासितं वद सखे दृष्टं त्वया मौक्तिकं ?
कान्तायाः पुरुषायितेऽधिकतरां प्रौढिं दधत्याश्चिरम् ॥
पर्यस्तैश्चिकुरैः कपोलपतितैर्भृङ्गप्रभोद्भासिभि-
स्ताटङ्कोज्ज्वलहीरकेण च तथाभूतं मयाऽलोकि तत् ॥१॥
लोके क्वापि सितासितं वद सखे दृष्टं त्वया मौक्तिकम् ?
मुग्धायाः सुरतावसानसमये तन्द्रावशादूर्ध्वतः ॥
दोर्वल्लीसमुदञ्चनोद्यमभृतोऽकस्मात्समासञ्जितं
प्रोन्नतस्तनचूचके सरगतं तादृक्समालोक्यहो ॥ २ ॥

शशिमोहन शर्मणः

" लोके क्वापि सितासितं वद सखे !! दृष्टं त्वया मौक्तिकम् "
दृष्टं मित्र ! मया, कथं कथय तत् शोश्रूयतां साम्प्रतम् ॥
अर्धार्धाङ्गविभक्तयोर्भगवतोर्विष्णुस्मरार्योः क्रमात्
श्यामश्वेतमहोविमिश्रितमहो तादृक् च भक्तेप्सितम् ॥

कविचक्रवर्तिभट्टश्रीपद्मनाभचक्रवर्तिनः (ग्वाल्हेर)

लोके क्वापि सितासितं वद सखे दृष्टं त्वया मौक्तिकं ?
क्षीराम्भोधिसुतासुधाकररुचिप्रोल्लासिहासश्रिया ॥
आलीढं कमलापतेर्मरकतश्यामं वपुः श्रीहरेः
मुक्तावुल्लसतीति वेदवचनैर्ज्ञातं न दृष्टं मया ॥ १ ॥
लोके क्वापि सितासितं वद सखे दृष्टं त्वया मौक्तिकं ?
कान्ताषट्पदकान्तिकुन्तललसत्सीमन्तसीमान्तरे ॥
अच्छाच्छं तदिदं सुधाकरमुखीमन्दस्मितस्पर्धि यत्
सौभाग्योपचयान्मयाऽद्य सुचिरं दृष्टं सुहृष्टात्मना ॥ २ ॥
लोके क्वापि सितासितं वद सखे दृष्टं त्वया मौक्तिकम् ?
यद्वाकारमणी बिभर्ति विलसन्नीलाम्बरस्योपरि ॥
तारामञ्जुलपाण्डुरांशुकमहं पश्यामि तस्यान्तरे
कान्त्या यद्भुवनं प्रकाशयति तच्छीतांशुमुक्ताफलम् ॥ ३ ॥
राधाया वदनाम्बुजं घनरुचौ कृष्णे मुहुश्चुम्बति
तत्कान्त्या शबलीकृतं सुरुचिरं नासागतं मौक्तिकम् ॥
दृष्ट्वा हन्त सितासितं प्रियसखी स्मेराननाऽऽहाऽस्फुटं
लोके क्वापि सितासितं वद सखे दृष्टं त्वया मौक्तिकम् ॥ ४ ॥
लोके क्वापि सितासितं वद सखे दृष्टं त्वया मौक्तिकम् ?
प्रेमोल्लासवशाद्यदाऽम्बुजमुखी बिम्बाधरा चुम्बति ॥
राकोल्लासिशशिप्रभस्मितरुचा प्रोन्मीलदिन्दीवर-
श्यामोदारकटाक्षभाभिरपि ते प्रेक्ष मुखं तादृशम् ॥५॥

पं श्रीगलगलीसुब्रह्मण्याचार्यसुतस्य नारायणस्य

या कान्त्या वदनस्य शीतकिरणं सम्यग्जिगायात्मनः
नेत्रेन्दीवरनीलशोभिवदनं तस्याः नवीनस्त्रियः ॥
दृष्ट्वा कश्चन वायुसेवनपथे मित्रं प्रियं प्रावदत्
लोके क्वापि सितासितं वद सखे दृष्टं त्वया मौक्तिकम् ॥

शिंगनमल्लि बिंदुमाधवशर्मणः
एस्. एम् एस्. ओ कालेजविद्यार्थिनः (पद्मसरोवरम्)

दीनाक्रन्दनम्

[२३ तमाङ्कादनुवृत्तम्
पञ्चमवर्षस्य]

(कवयितारः—पं. मलगीवेंकटरमणाचार्याः)

दुस्त्याज्या विषया हि संस्कृतिवशात् जन्मान्तरोत्थाज्जनैः
तस्मादेवजनस्य देव ! कथमप्यत्र प्रवृत्तिर्भवेत् ॥
तां त्वं पश्यसि चेद्दुरन्तविषयास्वादे रता मादृशा
विन्देरन् कथमुध्दृतिं तव कथं ख्यायाश्च दिव्यं यशः ॥ ६ ॥
आश्रित्य स्वदुरन्तकर्मनिचयान् जन्मान्तरोपार्जितान् ।
क्लिश्यन्त्वत्र फलोपभोगसमये विस्मृत्य ते सद्गुणान् ॥
श्रुत्वा त्वां श्रितदोषदारणविधौ दक्षं दयावारिधिम्
भैमीनाथ ! समागतोस्मि शरणं तावद्यशः पालय ॥ ७ ॥
श्रीमन् सद्गुरुराजपाददयया याचे न चान्यत्प्रभो !
भक्तिर्भक्तजने तवास्तु विपुला सक्तिश्च तत्पूजने ॥
नित्यं ते गुणवर्णनेषु परमा प्रीतिः स्तवे चादरः
को वास्मादपरः क्व चास्ति विभवो युष्मत्प्रसादावहः ॥ ८ ॥
त्वां स्तोतुं मम देवशर्ममुनिवत् ज्ञानं न शास्त्रोद्भवं
नो रुक्माङ्गदभूपवद् व्रतविधौ निष्ठा च विष्णो ! तव ॥
नैवाजामिलवत्सुभक्तिकलिता नामस्मृतिः पावनी
का वाऽऽशा मम सद्गतौ यदुपते ! युष्मत्प्रसादं विना ॥ ९ ॥
प्रत्यग्रोद्गच्छदुच्चद्रविणमदभटाटोपनिष्पादितान्ध्यान्
स्तावं स्तावं मृषार्थैः सुललितपदविन्यासभाग्भिर्वचोभिः ॥
भूयः पापौघबीजे मयि निजचरणाभ्यर्णमुत्कीर्णतापं
दैवात्प्राप्ते विपन्ने कलयतु करुणां श्रीनिवासो दयालुः ॥ १० ॥
श्रावं श्रावं दुरुक्तीः श्रवणयुगतटप्लोषिणीः षिङ्गसङ्गात्
स्मारं स्मारं नितान्त स्तनजघनघनं वारिजाक्ष्याः स्वरूपम् ॥
भ्रामं भ्रामं तदाप्तिः सुखनिधिरिति हा सत्समासक्तिहीनो
भक्ताभीष्टार्थदं त्वां सुखमयमजहां श्रीपते ! तत्क्षमस्व ॥ ११ ॥ (क्रमशः)

मधुरवाणीसमभिनन्दनभाषणम्

(ले. पं. शिवणगीविट्ठलाचार्यशास्त्रिणः प्राध्यापकाः कर्नाटक कालेज धारवाड)

सर्वजनमनोहारितया मुद्रणविषयतां गमिताभ्यो ह्यामन्त्रणपत्रिकाभ्यः प्रागेव विदितप्रायं भवतां सर्वेषां यतेयं मधुरवाणी पञ्चवर्षाणीमानि यशस्वितयाऽतिक्रम्य सानन्दमधुना षष्ठे वर्षे पदं निदधातीति। सामान्यतः सर्वेषां भारतीयानां विशेषतः कर्णाटकीयानामस्माकमनन्यसामान्यां मानोन्नतिमावहन्त्या अस्या मधुरवाण्याः समभिनन्दनार्थं तन्मातृस्थानीयेयं क्षमादेवी 'संस्कृतसाहित्यचन्द्रिका' मोहमय्या मुम्बापुर्या मोहं तीर्त्वा बेलगांवनगरमिदं पर्णकुटीरकल्पैः सदनैः समलंकृतमागत्याध्यक्षीयपदमध्यतिष्ठत्। तथैवायं गुण्डेरावमहोदयो वाचस्पतीतिसुगृहीतोपाधिः, गद्वालसंस्थानन्यायाधीशोऽस्या मधुरवाण्याः तथा गीर्वाणवाग्वर्धिन्याश्च समभिनन्दनं न्याय्यं-न्यायप्राप्तं-मन्वानः, अध्वनो दैर्घ्यं प्रवासायासं चागणयन्नत्राभ्युपेत्य गी. वा. न्या आध्यक्षीयं पदमध्यासीनस्तयोरुपरि पैतृकं प्रेमादरं समभिव्यञ्जयत्। एवमेवान्येऽपि संस्कृतभाषावेदिनः संस्कृतभाषाभिमानिनश्च लौकिका वैदिकाश्च विद्वांसः-केचिदत्रत्याः केचिद्दूरतोऽत्रायाताः—अस्मिन् स्वलंकृते महावसथे स्वासनान्यध्यासीनाः साक्षाद्दिवि देवा इव विभ्राजन्ते। एतत्सर्वं सत्यमेव कृतयुगीनं दृश्यम्। एतादृशं कृतयुगीन दृश्यम् अस्मिन् कलिकालेऽप्यवलोकयतां बेलगांवनगरनिवासिनां नरनारीणामाननेभ्यः, 'अहो भाग्यं मधुरवाण्याः, अहो धन्या खलु मधुरवाणीसंपादकसहसंपादका इति हर्षोद्गारः सुनिर्भरं प्रसह्य बहिर्यायादेवेति मन्ये।

सम्प्रति, 'सोऽकामयत बहु स्यां प्रजायेय' इति भगवतः परब्रह्मणो वाचमनुकुर्वतीयं मधुरवाणी स्वयमेकापि बहूनि रूपाणि आकारतः स्वरूपतोऽर्थतश्चाभिन्नानि धारयित्वा चात्मानं प्रीतिपूर्वकं भजतां भक्तानां गेहं गेहं गत्वा चाविरतं तेषां मनःप्रसादमनुतिष्ठन्तीमानि पञ्चवर्षाण्यत्यवाहयत्। एतावता परितोषं पर्याप्तमनासादयन्तः सन्मान्या भक्तजना मधुरवाण्या जन्मभूमिमेव

बेलगांनगरं दिदृक्षव एवं तस्या अत्यर्थप्रसादं चाभीप्सव एतावन्तं सुदीर्घं पन्थानमाक्रम्यात्मानमत्यायासपदमनैषुः । एतादृशः परिपाठोऽन्यत्राप्यस्मिन् लोके धार्मिके दरीदृश्यते । तथाहि प्रायः सर्वे वयं स्वस्वकुलदेवतां गेहे प्रत्यहमावाहयन्तोऽपि तेन परितोषं पर्याप्तमनावहन्तः स्वस्वकुलदेवतामूलनिवासस्थानं वेंकटाचलं वा करवीरपुरं वा यात्रामिषेण यास्यामः । तत्र तां कुलदेवतां मूलस्वरूपेऽवलोक्य चक्षुःसाफल्यमुपेत्य पावितात्मानः सन्तस्तत्परिसरभूमौ तानि तानि तीर्थान्यवगाहमानास्तत्तद्देवताविषयकास्तास्ताः कथाश्चाकर्णयमाना वयमात्मानं कृतकृत्यं धन्यं च मन्यामहे । एवमेवार्याणां कुलपरम्परागतेयं गीर्वाणवाणी नूनमस्माकं कुलदेवतैव । सेयं कुलदेवताद्य मधुरवाणीस्वरूपेणास्मान् स्वसेवापराङ्मुखान् स्वसेवाभिमुखी-भवितुं प्रोत्साहयति प्रेरयति च । अनेन हेतुनेदं बेलगांवनगरं महायात्रास्थानमेव संवृत्तम् । तस्मादिदं क्षेत्रं नानादेशतो महीयांसो भूयांसो विद्वांसश्चोपसंगम्य मधुरवाणीकुलदेवतायास्तास्ताः कथाः सम्प्रत्याकर्णयन्ति । तदनन्तरं कौतूहलतस्ते यात्रिका अस्मादावसथाद्बहिः पतन्तः, 'कीदृशो वर्तते स मुद्रणयन्त्रणालयो यत्र मधुरवाणी सम्मुद्र्यते; कानि तानि गृहाणि यत्र मधुरवाणी सं. स. संपादका निवसन्ति; कथंकारास्ते स्वरूपतो वर्तन्ते; कीदृशं वेषं ते धारयन्ति—किम् उष्णीषसहकृतं लौकिकं वेषमस्मदादिवद्धारयन्तिकिम् उष्णीषविरहितं प्राचीनं महावस्त्रप्रावरणरूपं वैदिकं वेषं धारयन्ति; इत्येतान्यन्यानि ज्ञातव्यनि मधुरवाणीपरिसरणभूमौ संचार्य ज्ञात्वाऽलं परितुष्टस्वान्ता भवन्ति ।

इदानीं मधुरवाणीमन्तरा किमस्माकं कर्तव्यमस्तीति कथयामि यथा महायात्रिकाः पावनतमायां वाराणस्यां जगदुद्धरणक्षमाया जन्हुकन्याया भागीरथ्याः सलिलं कलिमलापहं काशीतः प्रतिप्रयाणसमये कलशेषु पूरयन्ति, गृहं च नयन्ति, यत्र चार्चनवेदिकायां तान् कलशान् सुप्रतिष्ठितान् कृत्वा प्रत्यहं भक्तिप्रवणेन चेतसाऽर्चयन्ति । तथा वयमप्यस्मिन् क्षेत्रे बेळगांवनगरे मिलितानां विदुषां विदुषीणां च विचारधारावारीणि श्रोतॄणामघमर्षणानि स्वस्वहृदयपुण्डरीककलशेषु पूरयित्वा गृहं च नीत्वा संस्कृतवाण्याः मधुरवाणी

स्वरूपिण्याः कुलदेवतायाः श्रवणमनननिदिध्यासनरूपमर्चनं भक्तिप्रवणेन चेतसा कुर्वीमहि । भवन्तः सर्वे जानन्त्येव यथा तीर्थवारीण्यात्मन्यवगाहमानं पुमांसं कृतापराधात्पुनन्ति । परं ज्ञानधारावारीण्यात्मन्यवगाहमानं पुमांसं न केवलं कृतापराधात् पुनंति किंतु करिष्यमाणादप्यपराधात् पुनन्ति । यथोक्त मणुभाष्ये श्रीमत्पूर्णप्रज्ञेन मुनिना प्रारब्धकर्मणोऽन्यस्य ज्ञानदेव परिक्षयः । अनिष्टस्योभयस्यापि सर्वस्यान्यस्य भोगतः । तस्मात् ज्ञानधारावारीणि तीर्थवारिभ्यः सर्वात्मना वरमिति सेत्स्यति । अत एवोक्तं गीतायां भगवता श्रीकृष्णेन 'न हि ज्ञानेन सदृशं पवित्रमिह विद्यते' इति । तस्मादेतादृशे परस्परविचारविनिमयक्षमेऽस्मिन् ज्ञानसत्रे स्वीया विचारा अत्र मिलितेभ्यो विदुषीभ्यश्च निर्निगूहनं निवेदनीयाः । तेषां विदुषां विदुषीणां च निर्णयपथमारोपिता ये विचाराः स्युस्तेऽस्माभिर्निरहंकारतया ग्राह्याः । तथैव याः काश्चन विचिकित्साः—संशयाः—अस्माकं मनसरांसि चिरं कालमाविलयन्त्यो हृदयमश्रित्य तिष्ठन्ति ता अत्रैव निर्धारणापदवीं नेतव्याः । एतदेवोक्तं शिक्षायामुपनिषदि 'अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात् । ये तत्र ब्राह्मणाः संमर्शिनः । युक्ता आयुक्ताः । अलूक्षा धर्मकामाः स्युः । यथा ते तत्र वर्तेरन् । तथा तत्र वर्तेथाः' । इत्येवं पूर्वस्मिन् काले यत्र तत्र विविधेषु शास्त्रेषु पारदृश्वानः सम्मार्शिनो विद्वांसः किलासन् । यदा यदा सामान्यानां जनानां कर्मविचिकित्सावा धर्मविचिकित्सा वा स्युस्तदा तासु तासु कर्मधर्मविचिकित्सासु ते विद्वांसः प्रमाणमासन् । ते तत्र यथा वर्तेरन् सामान्या जना अपि तत्र तथा वर्तेरन् । परमिदानीन्तने काले एकतस्तादृक्षा विचक्षणा विद्वांसो निरस्तसमस्तस्वार्थाः समदर्शिनो ब्राह्मणाविरलीभवितुमारब्धाः । अन्यतः कर्मधर्मवृत्तविचिकित्सास्तु दिने दिने पूर्वतनकालापेक्षया संप्रत्यधिकाः समापतितुमारब्धाः । तदा सर्वदर्शनसम्यग्विमर्शनपराणामभावाद्विदुषां सामान्यजनाः अन्धगोलाङ्गूलन्यायेन गभीरायां विपद्गर्तायां निपतन्ति, विह्वलीभवन्ति, किंकर्तव्यतामूढाश्च जायन्ते । अतश्चैतादृशीनां विद्वद्भिर्विदुषीभिश्च संकुलितानां संसदामावश्यकता कियती वर्तते भासते च तद् भवन्त एवालोचयन्तु । अत्र मिलिताः सर्वेऽपि ब्राह्मणा एव । न केवलं नम

स्कारमात्रपात्रं ब्राह्मणाः किंतु युक्ता आयुक्ता अलक्षा धर्मकामाः ब्राह्मणाः । अयं ब्राह्मणः, अयमब्राह्मण इति नाम पृथग् जातिभेदः न पदमाधातुमुत्सहते । कुतश्चेत अक्षरराशि—परब्रह्मजिज्ञासवः सर्वे अक्षरराशिपरब्रह्मजिज्ञासार्थमेवात्र संमिलिताः । इयं मधुरवाणी यामहमेतावंतं कालमभ्यनन्दं सा अक्षरराश्यात्मिका मासिकी पत्रिकैव । तद्विषयिका याः काश्चन विचिकित्साः सम्पद्येरन्, ता अत्रैव विचार्यतां यान्तु, अत्रैव निर्णेतव्यतां च यान्तु । स्वस्वविचारविनिमयार्थं नैमिषे निमिषारण्ये शौनकादीनां महर्षीणां ज्ञानसत्रं यथा, तथेदं बेलगांवनगरं ज्ञानसत्रमेव सम्पादितं मधुरवाणीसम्पादकसहसम्पादकैः । एतदापादनकं सर्वश्रेयः सा. र. रामाचार्यान् सा. भू. श्रीनिवासाचार्यान् गीर्वाणवाणीवाराशौ आपातालं अवतरणोत्तरणविधौ सुक्षमान् तानेवाश्रित्य तिष्ठतीति वक्तुं सर्वात्मनोत्सहते मे चेतः ।

श्लोकत्रयी

(कविः— पुष्पसरोनिवासिसदाशिवशास्त्रिणः)

शिशुत्वेऽपि स्वस्या भुवि मधुरवाणीति गदिता
स्वयं पञ्चाब्दाऽपि प्रकटसुखदात्री युवतिवत् ।
इदं चित्रं कन्याप्यखिलरसिकामोदनकरी
चिरं बालाऽनीदृङ्नवमधुरवाणी विजयताम् ॥१॥

भारत्याःस्तनहारनायकमणिस्तस्याश्च चूडामणि-
स्तस्याः पादसरोजनूपरमणिस्तच्चारुनासामणिः ।
तद्ग्रीवानवरत्नहारवरभा तन्मध्यकाञ्चीप्रभा
तत्ताटङ्कविभेव भाति दिविषद्वाग्वर्धिनीयं सभा ॥२॥

सुधर्मेव प्राश्चद्विबुधकुलसेव्या सुरुचिरा
स्थलीवानन्तस्य प्रथितकविराजादिलसिता ।
सभेयं नक्षत्राधिप इव कलाशालिरुचिरा
रसज्ञैः संसेव्या वरकृतिरिवाभाति सरसा ॥३॥

बेळगांवनगरे (१९४० ऐशवीयाब्दे १-१२-४०) दिवसे सम्मिलिते प्रथमसंस्कृतसाहित्यसम्मेलने निर्णीताः प्रस्तावाः ।

प्रथमः प्रस्तावः

संस्कृतस्योत्कर्षाय दिवं गतानां **श्रीकृष्णराज वडेरबहादूर** इति नामभृतां महीशूरमहाराजानां प्रयत्नाः प्रसिद्धाः एव । तथा दिवं गतानां श्रीकरवीरक्षेत्राधिपतीनां महाराजानां च श्रमाः विख्याताः एव । तयोः उभयोः कृते अस्माकं सर्वेषां मनांसि दूयन्ते इति अस्माकं दुःखम महीशूर कोल्हापूर राजकुलयोः निवेदनीयम् ।

— सभाध्यक्षैर्मण्डितः

द्वितीयः प्रस्तावः

आर्यधर्मसंस्कृतिमूलभूतायाः विविधशास्त्रधर्मवाङ्मयग्रन्थाधारभूतायाः गीर्वाणवाण्याः सार्वत्रिक प्रसाररक्षणाभिवृद्धयर्थं चिरस्थायिनी संस्कृतसाहित्यपरिषदभिधा विद्वत्समितिः स्थापनीया । एतन्निर्णयसंपादनार्थं च विदुषां कार्यकारिमण्डलं दत्ताधिकसदस्यस्वीकरणाधिकारं निश्चीयतेऽस्मिन्सम्मेलने । कार्यकारिमण्डलसभासदः पञ्चाशत्सङ्ख्याकाः । वार्षिकं शुल्कं व्यक्तिसदस्यानाम् आणकाष्टकम्--संस्था--सदस्यानाम् रूप्यमेकम् । कार्यकारिमण्डलसभायाम् अष्टानां सभासदाम् उपस्थितिः निर्वाहिका मन्तव्या । कार्यकेन्द्रम् वेणुग्रामः ।

प्रस्तावकः — प्रा. स. रा. भट बेळगांव
अनुमोदकौ—श्री. व्यंकटराव आलूर, धारवाड
,, न. चिं. केळकर, पुणे

तृतीयः प्रस्तावः

साहित्य--व्याकरण-न्याय-मीमांसा--वेदान्त--धर्मशास्त्र--आयुर्वेदादिविषयाणां सम्यगध्ययनाय बनारस, बिहार, कलकत्ता, लाहोर, मद्रास, महीशूरादि विभागेषु यथा संस्कृतमहाविद्यालयाः राजशासनानुरोधेन प्रातिष्ठापितपूर्वाःसान्ति,

तथा मोहमयीविभागेऽपि अधिकृतराजसंस्थया संस्कृतमहाविद्यालयः प्रतिष्ठापयितव्यः । तत्कृते च परिणामकारि महदान्दोलनं कार्यम् इति अस्याः सभायाः अभिप्रायः ।

प्रस्तावकारकः—श्री. नीलकण्ठ शिवाचार्याः सवदत्ती
अनुमोदकौ: } धर्माधिकारी शास्त्रिणः, सांगली
अनंताचार्य आद्य विजापूर

चतुर्थः प्रस्तावः

अधिकृतराजसंस्थया तथा भारतान्तर्गतसंस्थानामधिपतिभिःसम्प्रदायाचार्यैः मठाधिकारिभिः तदन्यैर्वा जनैः गीर्वाणवाणीप्रसारार्थं प्राचीनाः पाठशालाः समुचितमान्यतापूर्वकं उज्जीवनीयाः, विद्यमानाः वर्धयितव्याः, नवीनाश्च स्थापनीयाः इति अस्याः सभायाः सनिर्बन्धाभ्यर्थना ।

प्रस्तावकारकः—श्री. सुब्रह्मण्यशास्त्रिणः, पुणे
अनुमोदकः—,, भागवत वांई

पञ्चमः प्रस्तावः

आंग्लमहाविद्यालयेषु छात्राणां यथार्थसंस्कृतज्ञानाय पाणिनीयव्याकरणं बी. ए. परीक्षापर्यन्तं विभागशः संस्कृतविषयाभ्यासक्रमे नियतविषयतया समावेश्यम् इति ते ते विश्वविद्यालयाधिकारिणः विज्ञाप्यन्ते ।

प्रस्तावकारकः—श्री. शिवणगीशास्त्री, धारवाड
अनुमोदकः—,, ईश्वरशास्त्री दीक्षित

षष्ठः प्रस्तावः

माध्यमिकाङ्ग्ल पाठशालासु (Secondary School) तथा आङ्ग्ल महाविद्यांलयेषु (Colleges) संस्कृतपण्डितोपपदधारिणः विदिताध्यापनशास्त्रतत्त्वाः लब्धमातृभाषाप्रावीण्याः च शास्त्रिणः पुनरपि यथापूर्वं नियोजनम् अर्हन्ति ।

प्रस्तावकारकः—प्रा. के. ना. वाटवे, पुणे
अनुमोदकः—,, गोकर्णशास्त्री, सातारा

सप्तमः प्रस्तावः

मद्रदेशविश्वविद्यालयवत् मोहमयीविश्वविद्यालयसमित्यापि प्राच्यविद्या-विभागं प्रकल्प्य प्राच्यविद्याप्रावीण्योपलब्धये एव पदवीपरीक्षोपक्रमः कार्य इति मोहमयीविश्वविद्यालयाधिकारिणः अभ्यर्थ्यन्ते ।

प्रस्तावकारकः—तर्कतीर्थ वरखेडशास्त्रिणः, पंढरपूर
अनुमोदकः—पं. हुलिकविमहाशयः, बेळगांव.

अष्टमः प्रस्तावः

सम्प्रति मोहमयीविश्वविद्यालये प्रवेशपरीक्षोत्तरणाय संस्कृते तथा मातृभाषायां च लब्धानां गुणानाम् एकीकृतत्वात् छात्राः संस्कृतविषये अदत्तावधानाः सन्ति अतः प्रवेशपरीक्षोत्तरणाय अभ्यासक्रमे संस्कृतविषयः तत्समानस्थानीयाः अन्याः भाषाः पृथक्त्वेन पुनः च प्रतिष्ठापनमर्हन्ति । तथा प्रवेशपरीक्षा-संस्कृतप्रश्नपत्रिकान्तर्गतः संस्कृतभाषान्तरार्थं आङ्ग्लभाषायाम् एव मुद्रितः परिच्छेदः तासु तासु देशभाषासु अपि मुद्रणम् अर्हति इति अस्याः सभायाः निश्चितं मतम् ।

प्रस्तावकारकः—श्री. गुरुरावजोशी, गदग
अनुमोदकः—,, बी. जे. नाईक, बेळगांव

नवमः प्रस्तावः

प्राथमिकाध्यापकविद्यालयेषु अध्ययनविषयक्रमे संस्कृतम् नियतविषयतया पुनरपि पूर्ववद् समावेश्यम् इति शिक्षणाधिकारिणः साग्रहं विज्ञाप्यन्ते ।

प्रस्तावकारकः—श्री. रामाचार्य कित्तूर
अनुमोदकः—,, पं. हुलिकवि, बेळगांव

दशमः प्रस्तावः

संस्कृतभाषायाः सुलभप्रचारं विविधैः उपायैः साधयितुं कार्यकारिमण्डलेन समितिस्थापनेन प्रयतितव्यम् इति निर्णीयते ।

श्री. बेळगांवकर, धारवाड
,, डि. एम् कुलकर्णी, सानाग

एकादशः प्रस्तावः

काशिकराजकीय संस्कृतमहाविद्यालयपरीक्षाधिकारिभिः मध्यमापरीक्षायामनुवादादिप्रश्नोत्तरलेखने हिन्दीभाषा एव प्रयोक्तव्या इति नियमः विहितः। एताः परीक्षाःअन्यप्रान्तीयछात्राणामपि भूयसे हिताय भवेयुः इत्याशयेन तैः बङ्गीयपरीक्षासमितिवत् हिन्दीभाषास्थाने तत्तत्प्रान्तीयभाषोपयोगः सानुग्रहम् अनुमन्तव्यः इति तेऽधिकारिणः सविनयं विज्ञाप्यन्ते

प्रस्तावकारकः—श्री. केतकर, बेळगांव
अनुमोदकः — ,, वाली

द्वादशः प्रस्तावः

ज्ञानविज्ञानविषयसौलभ्यार्थं भारतवर्षे समितिद्वारा तत्तत्शास्त्र पारिभाषिकशब्दानां निर्माणाय कार्यकारिमण्डलेन यतितव्यम् इति सभाभिप्रायः।

— अध्यक्षाः

त्रयोदशः प्रस्तावः


मोहमयीविश्वविद्यालये संस्कृतमधीत्य ये लब्धोपाधयः सञ्जाताः, ते काशिकराजकीयसंस्कृतमहाविद्यालयपरीक्षादित्सवः चेत् तेषां मध्यमापरीक्षा-निर्बन्धपरिहारः आवश्यकः इति काशिकराजकीयसंस्कृतमहाविद्यलयाधिकारिणः सम्प्रार्थ्यन्ते अनया सभया।

— अध्यक्षाः

चतुर्दशः प्रस्तावः

एतेषां सर्वेषाम् निर्णयानां उचितस्थलेभ्यः सम्प्रेषणे अनया सभया कार्यकारीमण्डलम् अधिक्रियते।

— अध्यक्षाः



महाराष्ट्रसाहित्यसम्राट् राजकारणधुरंधरः बृहन्महाराष्ट्र
तिलकायमानः सुप्रसिद्धः
श्रीमान् न. चिं. केळकरमहाभागः, पुणे.



गीर्वाणवाग्व्यवहारवाचस्पतिः सर्. एस्. पी.
कॉलेजप्राध्यापकः पुणेप्रान्तीयसन्मान्यप्रतिनिधिः
प्रो. के. ना. वाटवेमहोदयः, पुणे.



व्याकरणसाहित्यविद्वान् वेदांततीर्थः गवर्नमेंटकर्णाटक
महाविद्यालये प्रधानशास्त्रिपदमलङ्कुर्वाणः संस्कृत
प्रचारबद्धापरतयाऽनेकप्रस्तावपुरस्थापकः
धारवाडप्रान्तीयसन्मान्यप्रतिनिधिः
श्रीमान् शिवणगीविठलाचार्यः, धारवाड.

भक्ते रसत्वम् ।

(प्रा. के. ना. वाटवे, एम्. ए. पुण्यपुरस्थाः)

एतत्खलु सुविदितमेव साहित्यशास्त्रविदां विदुषां सर्वेषामपि यद् भगवान् भरतमुनिः स्वीये नाट्यशास्त्रे षष्ठेऽध्याये " विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिरिति " सूत्रमुखेन काव्यात्मभूतं रसतत्त्वं समुपन्यस्तवान् । तदनु स्थायिव्यभिचारिविभावानुभावादीनां स्वरूपं विशदीकृत्य अष्टस्थायिभावानुरोधात् रसानामपि अष्टसंख्याकत्वं निश्चिकाय ।

" शृङ्गारहास्यकरुणारौद्रवीरभयानकाः ।
वीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः " ॥ इति ॥

तथा च ।

" रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा ।
जुगुप्सा विस्मयश्चेति स्थायिभावाः प्रकीर्तिताः ॥

इत्यष्टौ स्थायिभावान् निर्वेदग्लानिशङ्कादीन् च त्रयस्त्रिंशतं व्यभिचारिभावान् पर्यगणयत् । एवं भरतेन मुनिना प्रवर्तितोऽयं रससिद्धान्तः बहुभिः पण्डितप्रवरैर्विवेचनव्याख्यानादिद्वारा प्रपञ्चीकृतः ।

अष्टमेखिस्ताब्दे प्रादुर्भूतः उद्भटस्तावत् समधिकं शान्ताख्यं नवमं रसं रसमालिकायां समावेशयत् । स च बहुभिः साहित्यशास्त्रकोविदैः मम्मटजगन्नाथादिभिः भरतमुनेः रसत्वेन असंमतोऽपि तथात्वेन उररीकृतः । रुद्रटः प्रेयांसं, विश्वनाथो वत्सलं, अन्ये च अद्भुत-समाहित-लौल्य कार्पण्यादीन् रसान् परिगणयामासुः । तन्मध्ये भक्तिरपि कैश्चित् अनुपलब्धनामधेयैः पण्डितैः रसत्वेन परिकीर्तिता दृश्यते । परं नवात्मिकायां रससंख्यायां नैतेषां रसानां एकतमस्यापि प्रवेशः प्राचीनानां संमतः । सर्वैरपि तैः हेतुनिर्देशपूर्वकं प्रतिषिद्धा इमे रसाः ।

एवं स्थिते, विशेषतश्च भक्तिरसमवलम्ब्य तत्प्रतिषेधहेतून् सम्यङ् निरीक्ष्य

तन्निराकरणद्वारा परमेश्वरविषया रतिः रसत्वमर्हतीति यथामति पूर्वाचार्यप्रणिपातपुरःसरं निश्चेतुं व्यवस्यते अल्पविस्तरेऽस्मिन् निबन्धे । तत्र च सदसद्व्यक्तिद्वैतवः नीरक्षीरविवेकिनः स्वतन्त्रप्रतिभानशालिनः पण्डिताग्रेसराः अवधानदाने सविनयं प्रार्थ्यन्ते ।

भक्तिरसविरोधे दशरूपकस्य कर्ता दशमे खिस्ताब्दे प्रादुर्भूतो धनञ्जयः कालानुक्रमात् प्राधान्यमर्हति ।

प्रीतिभक्त्यादयो भावा मृगयाक्षादयो रसाः ।
हर्षोत्साहादिषु स्पष्टमन्तर्भावान्न कीर्तिताः ॥ (द. रू. ४–८३)

तस्य अयमाशयः—स्थायिभाव एव विभावानुभावव्यभिचारिभावैर्व्यक्तः स्वाद्यत्वं च आनीतः रसीभवति नान्यः इति मुनिवचनप्रामाण्यात् स्थायिनामेव रसत्वम् । कान्ताविषयका रतिः स्थायिभावमध्ये गणिता न देवताविषया । अतः तस्याः हर्षोत्साहादिषु व्यभिचारिभावेषु अन्तर्भावात् सा भक्तिरसत्वं नार्हति । हेमचन्द्रेणापि "एवं भक्तौ वाच्यमिति एतदभिप्रायगर्भात् वचनात् निराकृतं भक्ते रसत्वम् । मम्मटेन "रतिर्देवादिविषया व्यभिचारी तथाञ्जितः भावः प्रोक्तः" इति वदता निषिद्धं भक्ते रसत्वम् । जगन्नाथेन – प्रथमं भक्तेः विभावानुभावादिसामग्रीनिर्देशपूर्वकं रसत्वं नाम प्रतिपाद्य, आनुकूल्यमिव उत्पाद्य अन्ततः सा भक्तिः वरण्डलम्बुकन्यायेन दूरमुत्क्षिप्य पातिता । तद् यथा—

"अथ कथमेत एव रसाः । भवदालम्बनस्य, रोमाञ्चाश्रुपातादिभिरनुभावितस्य, हर्षादिभिः परिपोषितस्य, भागवतादिपुराणश्रवणसमये भगवद्भक्तैरनुभूयमानस्य दुरपन्हवत्वात् । भगवदनुरागरूपा भक्तिश्चात्र स्थायिभावः । न चासौ शान्तरसेऽन्तर्भावमर्हति । अनुरागस्य वैराग्यविरुद्धत्वात् । उच्यते भक्तेर्देवादिविषयरतित्वेन भावान्तर्गततया रसत्वानुपपत्तेः ।

"रतिर्देवादिविषया व्यभिचारी तथाञ्जितः ।
भावः प्रोक्तस्तदाभासा ह्यनौचित्यप्रवर्तिताः ॥"

इति हि प्राचां सिद्धान्तात् । नच तर्हि कामिनीविषयाया अपि रतेर्भावत्वमस्तु, रतित्वाविशेषात् । अस्तु वा भगवद्भक्तेरेव स्थायित्वम्, कामिन्या-

दिरतीनां च भावत्वम्, विनिगमकाभावात्, इति वाच्यम्। भरतादिमुनिवचनानामेवात्र रसभावत्वादिव्यवस्थापकत्वेन स्वान्तत्र्ययोगात् ।''

सर्वेषामेतेषां विरोधे ऐकमत्यम्। यथा भक्तेः केवलं व्यभिचारिभावन्तर्भावात् न रसत्वमिति। साहित्यशास्त्रकोविदानां मध्ये उभाभ्यामेव सानन्दमुररीकृतं सप्रपञ्चं च विवेचितं भक्ते रसत्वम्। तयोरेकः उज्ज्वलनीलमणेः कर्ता वङ्गदेशीयो रूपगोस्वामी, अपरश्च परिव्राजकाचार्यः श्रीमन्मधुसूदनसरस्वतिः। रूपगोस्वामिना 'पृथगेव भक्तिरसराट् सविस्तरेण उच्यते मधुरः' इति प्रतिजानता मधुराख्यो भक्तिरसप्रकारो महता विस्तरेण विवेचितः। परमियं भक्तिः केवलं शृङ्गारात्मिका श्रीकृष्णगोपीविषयिणी शृङ्गारपरिभाषासंयुता भक्तेः एकदेशत्वमर्हति। मधुसूदनसरस्वतिभिस्तु स्वीये भगवद्भक्तिरसायने प्रतिपादिता भक्तिः समग्रा, उदात्तस्वरूपा, साहित्यशास्त्रसिद्धान्तोपबृंहिता दृश्यते। एकेनैवानेन महाभागेन प्रमाणप्रमेयोपन्यासपूर्वकं समर्थितं भक्तेः रसत्वम्। एवं भक्ते रसत्वे अनल्पं प्रातिकूल्यं अल्पं च आनुकूल्यं पर्वतसर्षपप्रमाणं मनागिव प्रदर्श्य तस्याः रसत्वदृढीकरणाय प्रयत्यते।

प्रथमं तावत् साहित्यशास्त्रे सहृदयहृदयाल्हादैकमाने तत्तत्कालसमुत्पन्नकाव्यरसविषये रसिकबुद्धितन्त्रे च भक्तिरसविरोधे पुरस्कृतं मुनिवचनप्रामाण्यम् अङ्गीकरणीयं वा न वेति विचार्यते। 'अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेत्' इति न्यायाद् यत्र मानुषी बुद्धिरेव न प्रसरति, "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह" इति वचनानुरोधात् यत्र वा मनसो गतिरेव न वर्तते तस्मिन् परोक्षे परब्रह्मणि यदि भगवती श्रुतिः अथवा तदनुसारिणां दर्शनकाराणाम् आचार्याणां च वचांसि विनतमस्तकं अङ्गीक्रियन्ते तद् युक्तिसहं विमर्दक्षमं च स्यात्। परं साहित्यशास्त्रं रसिकधुरीणान्तःकरणप्रवृत्तिप्रमाणम्। तत्र प्राचीनाचार्याणां मतानि स्वानुभवविरोधे जायमाने सर्वदा न स्वीकारमर्हन्ति। यादृशि यादृक्प्रकाराणि वा काव्यानि तस्मिन् प्राचीनतमकाले प्रादुरासन्, तानि तानि अवलोक्य आस्वादगोचरणां रसानां परिगणनं भरतमुनिना कृतम्। स्थायिव्यभिचारिभावानां च विभेदः प्रकल्पितः। परं तदुत्तरं यद् बहुविस्तरं समुत्पन्न

काव्यजातं तत्र प्रादुर्भूतानाम् आस्वादस्थानानां रसत्वनिर्णये तदानींतनाः एव रसिकप्रवराः प्रमाणम् । 'शृङ्गाराद् हि भवेद् हास्यः' इत्युक्तं भरतेन मुनिना। परं यत्र शृंगाररसस्य लेशोऽपि नानुभूयते एतादृशानि वत्सलरसाधिष्ठितानि, तदितरभावानुप्राणितानि वा परःसहस्राणि हास्यरसमयानि पद्यानि गीर्वाणवाङ्मये समुपलभ्यन्ते ।

(१) "हे हेरम्ब किमम्ब रोदिषि कथं, कर्णौ लुठत्यग्निभूः।"

(२) "गुरोर्गृहे पञ्च दिनान्यधीत्य वेदान्तशास्त्राणि दिनत्रयं च।"

(३) "बिडौजाः पुरा पृष्टवान् पद्मयोनिं, धरित्रीतले सारभूतं किमस्ति।" इत्यादीनि। एतेषु आस्वाद्यमानेषु शृङ्गारस्य लेशतोऽपि न प्रतीतिरिति सुधियां रसिकानां बुद्धिरेवात्र साक्षिणी ।

एवं अनुभवविरोधे मुनिवचनं सर्वथा न ग्राह्यमिति प्राप्नोति । तथाच मुनिना अनिर्दिष्टस्यापि शान्तरसस्य रसमालिकायाम् अन्तर्भावात् मुनिवचनं सर्वथा नाङ्गीक्रियते पूर्वाचार्यैः इति प्रदर्शितं प्राक् ।

एवं गते व्यतिकरे, भक्तेः मोक्षानुकूलत्वं, शास्त्रोपदिष्टत्वं, आस्वाद-योग्यत्वं, विगतकल्मषैः रसिकधुरीणैः परिगृहीतत्वं, गीर्वाणवाण्यां निखिलासु च देशभाषासु अखिजजनमनोहारित्वं च आलोच्य तस्य रसत्वं यदि प्रतिपाद्येत नासौ प्रयत्नः साहसिकतामाटीकेत इति द्रढीयान्नो विश्वासः ।

"नमो दाधार पृथिवीमुत द्याम्" 'यजाम देवान् यदि शक्नवाम' "मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु" "सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज" "सवै पुसां परो धर्मो यतो भक्तिरधोक्षजे" इत्थंजातीयकानि श्रुति-भगवद्गीता--भागवतपुराणगतानि भक्तिपराणि वचनानि भक्तेः मोक्षदायित्वम् उद्घोषयन्ति। "चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि । काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते"। (सा, द. १·२) "धर्मार्थकाम मोक्षेषु वै चक्षण्यं कलासु च।" इत्यादिभिर्वचनैः रुद्रट-विश्वनाथादयः साहित्यशास्त्रविशारदाः काव्याभ्यासस्य मोक्षफलकत्वमभ्युपगच्छन्ति । शान्त-रसस्यापि मोक्षानुकूलत्वादेव रसप्रधानता इति भट्टतौतादिभिः प्रत्यपादि । एवं

स्थिते भक्तिरसस्य सकलजनसुलभत्वात्, सकललोकानुभवसिद्धत्वात् च मोक्षसाधनमूर्धन्यभूतस्य रसत्वेन काव्यशास्त्रे किमिति अनादर इति न ज्ञातुं शक्यते ।

भक्तौ न केवलं एकस्यैव किन्तु विविधभावानां व्यभिचारित्वात् अन्तर्भावेण अतिरमणीयत्वम् । श्रीरामकृष्णादीनां परेशानां चरितेषु वीर-करुण-रौद्र-शृङ्गार-हास्य-भयानकाद्भुतादयः सर्वेऽपि रसा यथावसरं लब्धावकाशा भक्तिमेव परिपोषयन्ति, तामेवच आस्वाद्यत्वं नयन्तीति को न पुराणेतिहासादीनां वाचको नानुमन्येत । मथुरायां कंसस्य रङ्गमण्डपं प्रविष्टस्य श्रीकृष्णस्य सर्वरसमयं वर्णनं तावद् भागवतपुराणगतमत्रलोक्यताम् ।

मल्लानामशनिर्नृणां नरवरः स्त्रीणां स्मरो मूर्तिमान्
गोपानां स्वजनोऽसतां क्षितिभुजां शास्ता, स्वपित्रोः शिशुः ।
मृत्युर्भोजपतेर्विराडविदुषां, तत्त्वं परं योगिनाम्
वृष्णीनां परदेवतेति विदितो रङ्गं गतः साग्रजः ॥

भागवतं पुराणं तावद् भक्तिरसाविष्कारस्य प्रथमं भाजनम् । (भाग १०-४३-१७) अनेनैव पुराणेन विष्णुभक्तिः, कृष्णसंप्रदायः वासुदेवमतं वा न केवलं गर्वाणवाणीसरिदवगाहमानानां पण्डितानां किंतु देशभाषाव्यवहार निरतानां निखिलभारतवर्षवासिनां सामान्यजनानामपि चेतः कमलानि भगवद्भक्तिसुधासेचनेन प्रत्यग्रतां नीतानि । प्रथमं तावत् तामिळसाधुभिः नम्मळवार--माणिक्क--वासहर--नन्दप्रमुखैः स्वरचितभक्तिरसमयकाव्यद्वारा भक्तेर्महिमानं उत्कीर्त्य भक्तिपथे स्थापितानि प्राकृतजनवृन्दानि ।

महाराष्ट्रे ज्ञानदेव--नामदेव--एकनाथ--तुकारामादिभिः साद्धिः स्वकीयया भक्तिरसपूरप्लाविन्या वाण्या भक्तेः कियान् उपचयो व्यधायि इति ऐतिह्यविदां गोचरमेव । ब्राह्मणाः, वैश्याः, चर्मकाराः, कुम्भकाराः, तैलिकाः, उद्यानपालाः शूद्राः स्त्रियः सर्वेऽपि एकेनैव भक्तिमयेन भावेन परिपूर्णस्वान्ताः, अकृतान्यव्यापाराः, विगलितान्यकर्तव्यबुद्धयो वीणामृदङ्गकांस्यहस्ता विठ्ठल विठ्ठलेति मधुर नाम उच्चारयन्तः उन्मत्तवत् जगुः, ननर्तुश्च । सांवताख्य उद्यानपालः कंद, मूलं, शाकं, क्षेत्रं सर्वमपि कृष्णमय मपश्यत् । नरहरिः सुवर्ण-

कारः सुवर्ण, अलंकारान्, अग्नि, सर्वमपि उपकरणजातं विठ्ठलस्वरूपममंस्त। एतादृशी भक्तिः एवंविधां उत्कटतांप्राप्तासती स्थायिभावपदं कथं न प्राप्नोतीति केवलं प्राचीनाः पण्डितप्रकाण्डाएव जानन्ति। इतरेष्वपि प्रान्तेषु, इतरासु चदेश-भाषासु अयमेव उत्कटो भावः भक्तिरूपतया प्रदर्शितो नयनसरणिमेति। सूरदासः, नरसीमेहता, मिरादेवी, श्रीकृष्णचैतन्यः, नैकेच द्रविड-कर्नाटक मण्डलस्थाः कवयः इममेव भावं परिपोषयामासुः। एतद्देशभाषागतं संपन्नं काव्यजातं पण्डितैर्नावलोकितं वा, अथवा अवलोकितमपि प्राकृतत्वात् तिरस्कृ-तमिति न विद्मः।

भगवद्भक्तिरसायनकाराः श्रीमन्मधुसूदन सरस्वतिमिश्रा एवमूचुः।

शोकक्रोधभयादीनां साक्षात्सुखविरोधिनाम्।
रसत्वमभ्युपगतं तथाऽनुभव मात्रतः॥
इहानुभव सिद्धेऽपि सहस्र गुणितो रसः।
जडेनैव त्वया कस्मादकस्मादपलप्यते। इति तथाच।
रतिर्देवादिविषया व्यभिचारी तथाञ्जितः।
भावः प्रोक्तो रसो नेति यदुक्तं रसकोविदैः॥
देवान्तरेषु जीवत्वात् परानन्दाप्रकाशनात्।
तद्योज्यं परमानन्दरूपे न परमात्मानि।

सर्वस्यास्य विवेचनस्य अयमेव सारः

"एतस्यैवानन्दस्य अन्ये आनन्दा मात्रामुपजीवन्तीति वचनात् परिपूर्णानन्द स्वरूपस्य भगवतः रतिः स्थायिभावं अवश्यमेव प्राप्नोति इति ज्ञेयम्। अयं भक्तिपथः श्रीरामानुजमध्वादिभिः आचार्यैः प्रसारितः कविभिः आस्वादं नीतः साधुभिः क्षुण्णः सर्वैरपि लोकैः आपण्डितात् आगोपालं, आपत्तनात् आखर्वटं, आराज्ञ्याः आदासि आस्वादितो रसत्वमर्हति इत्यत्र नास्ति संदेह कणिकापि। अतोऽत्र-भक्तिरसे-आलम्बन विभावो भगवान् परमात्मा, उद्दीपन विभावाः तच्चरित्र गतास्तेते अवसराः अनुभावाः यथावसरं जायमानाः नेत्रादिविक्रियाः व्यभिचारिभावा निर्वेद-शङ्का, मति धृति-हर्षादयः नैके भावाः, व्यक्तीभवद्भगवदाकाररूपरसाख्यस्थायीभावः परमानन्द-साक्षात्कारात्मकः एवं स्वरूपोऽयं भक्तिरसः इतिसिद्धम्। इतिशम।

संस्कृतभाषा राष्ट्रभाषात्वेन इष्टा वा अनिष्टा?

इति विषयमवलम्ब्य सम्भाषणम् ॥

पं. तर्कतीर्थनीलकण्ठ शिवाचार्यः

नन्दनवनानन्दसन्दोहबन्धुरे मन्दारतरुसम्बन्धमान्दिरे
साहित्यसङ्गीतविशारदो ब्रह्ममानसपुत्रो नारदः

स्वजननीं भारतीं स्तौति

सङ्गीतपद्यम्

(भूषणसंसारां विमला, इतिसङ्गीतपद्यवत्)

भारति परिपाहि जननि । भारतजनहितफलमिह देहि ॥ ध्रु ॥
अज्ञजनांस्त्व मनुजानीहि । अज्ञानावरणानि लुनीहि ॥ १ ॥
तव सन्तानप्रेम बिभृहि । तव सेवारतजनतां त्राहि ॥ २ ॥
परपरिहासं परिजानीहि । श्रितमपवादं सपदि पिधेहि ॥ ३ ॥
तव भाषोन्नतिं परिपिपृहि । तत्रोपायं शीघ्रं ब्रूहि ॥ ४ ॥

(तदा स्वगुरुं नारदमहर्षिमन्वेष्यमाणः शारदः प्रविशति)

शारदः—अहो सुरभारतीदेव्याः स्तवनं सङ्गीतरसनिर्भरं श्रूयते । धन्योऽहं यस्याः स्तवनश्रवणमात्रेण बधिरस्यापि श्रवणानन्दः सञ्जायते किमतोऽस्मदादीनाम् । अत एव आभाणका अपि भणान्ति—

‘ शिशुर्वेत्ति पशुर्वेत्ति वेत्ति गानरसं फणी ।
गानानन्दरसः प्रोक्तो ब्रह्मानन्दरसोपमः ’ ॥ इति ॥

अस्तु केनेदं संगीयते ? यस्य संगीतरसविलसितं सुरसरस्वतीस्तवनं श‍ृण्वन्तो वनविहारिणः पशुपक्षिपन्नगादयोऽपि श्रवणानन्दजनितविषयविरामि...तेन निःशब्दतामधिगच्छन्ति । कोऽयं सरससंगतिरसज्ञःस्यात् । न केवलमस्य पद्यं सङ्गीतरसनिर्भरं, किन्तु संस्कृतसाहित्यादृतैः पदप्रासादिभिरलङ्कृतम् । युक्तमेतत् साहित्यसंगीतरसविलसितं पद्यमनवद्यम् । यतः

"साहित्यसंगीतकलाविहीनः साक्षात्पशुः पुच्छविषाणहीनःइति साहित्यसंगीतकलाविलसितस्यैव पद्यस्यानवद्यत्वं वदंति पण्डिताः । तमेतं साहित्यसंगीतरसज्ञं एतल्लतामण्डपान्तरितो भूत्वा पश्यामि । (इति शारदः अनतिदूरस्थितं लतामण्डपं प्रविशति । तथा पश्यति । पुनरपि नारदस्तदेव पद्यं पठति " भारति परिपाहि " इति)

शारदः –(स्वगतम्) अहो तत्रभवान् भगवानयं नारदमहर्षिः । यस्यान्वेषणतत्परोऽहं सुरभारतीस्तवनादाकृष्यमाणः श्रीमद्गुरुचरणान्तिकं समानीतः । सत्वरं तदन्तिकं गच्छामि (इति शारदः नारदमहर्षिसमीपं गत्वा दण्डवत् प्रणम्य, प्रकाशं) भगवन् भवच्छिष्यः शारदो दण्डवत् प्रणमति ॥

नारदः—शिष्योत्तम ! आयुष्मान् भव ! उत्तिष्ठ !! शारद ! अत्रागन्तुं कस्माद्विलम्बालम्बनं सञ्जातम् ? तवागमनं निरीक्षमाणोऽहं मन्दारतरुसमाश्रिते मंदिरेऽस्मिन् सार्धघटिकापर्यन्तमवस्थितः ।

शारदः—भगवन् क्षम्यताम् । भगवतामाज्ञानुसारेण स्वगृहान्निर्गतोऽहं भवद्दर्शनार्थं जगदम्बाया भगवत्याः सरस्वतीदेव्या मन्दिरमगच्छम् । तत्र तत्रभवन्तं भवन्तं न समीक्ष्य मातुःसरस्वतीदेव्या अनुज्ञया भगवन्तमन्वेष्यमाणोऽत्रागतोऽस्मि ।

नारदः—शारद ! अस्तु तत्रागमनविलम्बालम्बकथालापकलापः, प्रथमं निवेदय । भगवती माता सरस्वती किमनुज्ञामकरोत् ।

शारदः—महात्मन् भगवती जननी इदमाप्तज्ञवती माम् " भो वत्स ! त्वमपि नारदेन साकं भूलोकसञ्चारार्थं गच्छ । अवगच्छ त्वं मदीयकीर्तिप्रकाशविषयं, ततः पुनरागत्य तत् सर्वं वृत्तं मह्यं निवेदय " इति ।

नारदः—(साश्चर्यं) अहो मातुरपि स्वकीयकीर्तिप्रकाशविषयावगमे इयती उत्कण्ठः । सुरभारतीकीर्तिप्रकाशविषयमवगंतुं को वा पारयति ? ।

(संगीतपद्यं--जगदात्मकश्रीरघुवर--इति संगीतपद्यवत्)

सुरसालंकृतियुतसुरवाणी । सुरसाम्राज्यसंश्रितहितजननी ॥ धृ ॥
चतुराननसती पन्नगवेणी । चतुरजनस्तुतसुमधुरवाणी ॥
श्रुतिशिखरोदितमतसद्बोधिनी । स्मृतिनिकराश्रितधार्मिकवाणी ॥ १ ॥

आगमनुतसंद्धर्मविमर्शिनी । योगमार्गसञ्चालकवाणी ।
सकलविद्यानिधिरमृतवाणी । सकलकलान्वयतोषकवाणी ॥ २ ॥
भो सर्वशास्त्रविशारद शारद ! किमतो वक्तुमवशिष्टम् ?

शारदः—महात्मन् ! किमतो निवेदयामि । (तदेवपद्यमनुसृत्य स्तौति)
नवरसनिर्भरनाट्यविलासिनी । नवकविताश्रितमञ्जुलवाणी ॥ धं ॥
राष्ट्रभाषाश्रितबुधसम्मोहिनी । अष्टादशपौराणिकवाणी ॥
सत्कविकृतमहाकाव्यविहारिणी ।सत्कलयान्वितसुन्दरवाणी ॥१॥
व्याकृतिसुन्दरनिर्जरवाणी । सत्कृतिसाधितसंस्कृतवाणी ॥
राजितत्रिभुवनराष्ट्रीयवाणी । राजराजेश्वरी वीणापाणिः ॥२॥

भगवन् ! इदमेवावशिष्टम ।

नारदः—सुष्टूक्तम् अवशिष्टं भवता । स्पष्टमेतत् सुरसरस्वतीदेव्या अनुग्रहादेव सर्वभाषा भुवनत्रये उपजीवन्ति । उपार्जयन्ति च स्वकीयवाङ्मये संस्कृतशब्दैकमात्रासमावेशेन सर्वालङ्काररसभावपुष्टिं सुरभारतीप्रभावोत्कर्षं वर्णयन्ति विपश्चितः । यतः—

सुरवाणी पदन्यासादन्यभाषागणं तथा ।
पवित्रीकुरुते गंगा ग्रामरथ्याजलं यथा इति

शारद—भगवन् । भवदुक्तं युक्तमेतत् भगवती सुरभारती अन्य-भाषासु स्वकीयशब्दैकसमावेशेन तत्कुलमुद्धरति । वर्धयते हिं तासामर्थमाधुरी-झरीं, प्रकटयति तत्तद्भाषाविदां सुरसालङ्कारभरां प्रयोगचातुरीम् , तनोति च संस्कृतसाहित्यधुरं विदुषो वैखरीम्। परन्तु भूलोके कस्मिन् जनपदे सुरभारती प्रचारः प्रचुरायते ? । तदाज्ञापयतु भगवान् ।

नारदः—शारद! भूलोकावलोकनेन सर्वं विज्ञायते भवता। तस्मादस्माभिः सह समागम्यताम् । अवगम्यतां च भूलोकविलोकनेन सुरभारतीप्रचारविषयः।

शारदः—यथाज्ञापयति भगवान् (इत्युभौ लोकसञ्चारार्थं प्रस्थितौ व्योममार्गेण किंचिद्दूरं गत्वा)

शारदः—भगवन् ! भूलोके तस्मिन् का वा भाषा प्रचरति ?।

नारदः—स्वर्गलोके संस्कृतभाषेव भूलोकेऽस्मिन् , एका भाषा नैव प्रचरति । किन्तु देशभेदेन बहुविधा भाषाः प्रचरन्ति । तासु-

संस्कृता प्राकृता चेति विकृता सुकृता तथा ।
भाषा चतुर्विधा प्रोक्ता तासु सर्वाः समाश्रिताः॥ इति

शारदः—महात्मन् संस्कृता प्राकृता चेति भाषाद्वयं विदितपूर्वमेव मया । विकृता सुकृता चेति भाषाद्वयं कुत्र व्यवह्रियते तन्निरूप्यताम् ।

नारदः—शिष्योत्तम ! संस्कृतभाषाविकारेण सञ्जाता भाषा विकृता भाषेति कथ्यते सेयं भाषा युरोप—अफ्रिका--अमेरिकादिखण्डेषु तत्तद्देशभेदेन तत्तन्नामसमाश्रिता व्यवह्रियते । सुकृता भाषा तु भरतखण्डे द्राविडजनैरादृता कर्णाटक--आन्ध्र—तामिळु-इत्यादिदेशभेदेन तत्तन्नामभिरलंकृता व्यवहारपथमधिरोहति । सेयं सर्वदासंस्कृतभाषा संस्कृतभाषागौरवं संप्राप्तुं समीहते । अस्त्वयं भाषाविचारः । सत्वरं गच्छावः ।

[संगीतपद्यं—आनन्दाच्या कन्द हरि हा—इति संगीतपद्यवत्]
भूलोकीयविशेषविचारं विदितुम् आवां गच्छावः ।
आलोकनतस्तद्गतविषयं विशदम् इदमवगच्छावः ॥

शारदः—भगवन् । किमिदं भयानकं दृश्यं, कोऽयं युद्धपराहतो देशः ? यस्मिन् आबालवृद्धा अपि निरपराधिनो युद्धानुतापम् अनुभवन्ति ।

नारदः—अयं युरोपखण्डः दोर्दण्डमण्डितं लण्डनम् एकपक्षः, प्रबलपराक्रमाक्रान्तः जर्मनः परपक्षः । एतयोः समाविष्टा अवशिष्टा अपि देशा युद्धानुतापम् अनुभवन्ति ।

इतरेतरमत्सरतो मनुजाः सहजापदि युधि सुपतन्ति ।
मतिविभ्रमतः परिभ्रमन्ति बहुतापं भुवि भुञ्जन्ति॥१॥

शारदः— हा कष्टं शिष्टाचारपरिभ्रष्टा दुष्टगुणप्रेरिता इमे परस्परम् अनिष्टकृतिमेवाचरन्ति ।

ऐरोपीयविकोपदशेयं दुर्गमदुःखं कारयति ।
स्वधनं स्वजनं स्वकुलं सकलं पातुं को वा पारयति ॥२॥

नारदः—शारद ! यथार्थमुक्तम् एतेषां दुर्दशापरिणामफलम्। एते खलु युरोपीया एकधर्मानुयायिनः परस्परं बान्धव्यसंबन्धानुबंधाः अपि इतरेतरराज्या-पहरणकारणात् किमिदं दुश्चरितमाचरन्ति पश्य-

हिंसादोषविशेषविचारैर्विकलीभावं गच्छन्ति

ध्वंसोचितदुष्कृतिकारणतो निजकुलनाशनमिच्छन्ति ॥३॥

" अवश्यमनुभोक्तव्यं कृतं कर्म शुभाशुभम् ॥ " अस्तु

तथापि आङ्ग्लभूपो भारते शिथिलितं विजयमूलसनातनधर्मं प्रस्थाप्य विजयं लभेतेवेति मे विश्रम्भः

शारदः—भूतलेऽस्मिन् शान्तिसमाधानावस्थितो देशो न कोऽपि विद्यते ?। विद्यते चेत् तत्र गच्छावः । किमनेन दुरन्तदुःखव्याकुलानां युरोप-देशवासिनां दुरन्तानुतापदर्शनेन ।

नारदः—शारद ! अस्ति भारतवर्षो नाम सस्यसमृध्द्यादिविलासविलसितो देशः । यस्य पवित्रभूस्पर्शमात्रात् युद्धोत्साहसाहदिसमायुक्ता अपि आङ्गलसाम्रा-ज्यधुरंधरा महाप्रधानादयः शान्तिसमाधानेन तं देशं प्रशासति । अनुसरन्ति शिष्टाचारप्रचारम् उपचरन्ति दुष्टाचारनिवृत्तिम् ।

शारदः—भगवन् ! यदि विशेषविपदालये भूवलयेऽस्मिन् शान्तिसमाधा-नावस्थितो भारतवर्षो नाम देशोस्ति, तर्हि साम्प्रतं तद्देशसंस्थितिं समीक्षितुं सत्वरं गच्छावः ।

नारदः—तथास्तु । तत्रापि राजकीयशासनपरिवर्तने राजप्रजयोर्मध्ये कलहाङ्कुरः सञ्जनित इति सन्दिह्यते मया । तस्मात् अस्माकं का वा हानिः ?। आगम्यताम् ।

नारदः—शारद ! अयमेव अनुपममहिमालयो हिमालयो नाम पर्वतराजः । एतद्दक्षिणदेशमेव " आर्यवर्त " इति व्यपदिशन्ति वृद्धाः ।

शारदः--विज्ञातं मया—

" आर्यावर्तः पुण्यभूमिर्मध्यं विन्ध्यहिमालयोः " इति अमरसिंहेन अमरानुशासने अनूदितोऽयं जनपदः ।

नारदः--पश्य तदान्तिके विद्यमानोऽयं काश्मीरदेशः । पुरा अत्रभगवती सुरसरस्वती स्वकीयरत्नपीठं स्थापयित्वा विश्वविख्यातैर्विद्वद्वरैः सेव्यमाना विश्राममभजत् ।

शारदः--भगवन् संप्रति ?

नारदः--सम्प्रति किं वक्तव्यं सर्वे काश्मीरदेशीया बलात्कारेण महम्मद-मताश्रिताः सन्तः यवनधर्ममेवाचरन्ति । तत्रावशिष्टाःशिष्टाः केचित् भारतध-र्मानुयायिनः संस्कृतविद्याविधुरेण यवनवाङ्मयमधुरेण नाममात्रेण सरस्वतीपीठाभि-मनिन इत्यात्मानं मन्यन्ते । तथापि एतद्देशं धर्मभावेन प्रशासतः प्रसिद्धक्षात्र-वंशावतंसाः महाराजमहभागाः सुरसरस्वतीसेवाम् अनितरभक्तिभावेन कुर्वन्ति, प्रसासति च प्रजाप्रेमातिशयेन शास्त्रनियमेन स्वकीयधर्मराज्यम् ।

शारदः--महात्मन् ! भगवत्याः सुरसरस्वत्याः पीठस्यावनतिरीदृशी चेत्, किं पुनरस्या उन्नतिमार्गसाधनम् ।

नारदः--शारद! न केवलमेकमेव पीठं सुरसरस्वत्याः काश्मीरदेशस्थितं किन्तु काश्यां काञ्च्यां च भगवती स्वकीयपीठस्थापनेन सर्वत्र भारतवर्षेऽस्मिन्, संस्कृतवाङ्मयप्रचारप्रकर्षमकरोत् । उक्तं हि--

'काश्यां काञ्च्यां च काश्मीरे स्वीयपीठं सरस्वती ।
स्थापयित्वा सर्वविद्याविलासेन विराजते ॥ इति ॥

शारदः--भगवन् ! काश्यां काञ्च्यामपि सुरसरस्वतीपीठप्रकर्षोऽस्ति चेत् तर्हि तत्र गच्छावः ।

नारदः--आगम्यताम् (इत्युभौ श्रीक्षेत्रकाशीं प्रस्थितौ । ततः--काशीं संप्राप्य)

नारदः--शारद ! पश्य इदमेव वाराणसीक्षेत्रम् अविमुक्तक्षेत्रमिति विख्यातं भुवनत्रय । (तथा काशीक्षेत्रं स्तौति)

संगीतपद्यम्

(हरनाम सुखदसुरधाम इति संगीतपद्यवत)

शुभदं परमसुखदं विजयते काशीक्षेत्रमिदम् विजयते ॥ ध्रु ॥

तुङ्गतरङ्गालिङ्गितगङ्गासंगतमङ्गलदम् ।
मङ्गलमयशिवलिङ्गसङ्गम् । पापकुलविभङ्गम् विजयते ॥ १ ॥
नवरसभरितं कविवरविनुतं । विविधबुधोपेतम् ।
नवभैरवसत्पालनकलितम् । नवदुर्गापूतम । विजयते ॥ २ ॥
संस्कृतवाणीविलसितसदनम् । संस्तुतसच्चरितम् ॥
संश्रितजनसंपालनशीलम् । संसृतिरतिरहितम् विजयते ॥ ३ ॥
विश्वविद्यालयसंश्रितविभवम् । विश्वनाथनिलयम् ॥
विश्वोद्धारणकारणकलितम् । विश्वंभरलसितम् ॥ ४ ॥

शारदः——भगवन् गंगास्नानं कृत्वा श्रीमद्भगवतो विश्वेश्वरस्य पूजनादिना पुनीतौ भवावः ।

नारदः——आगम्यताम् (इत्युभौ गंगायां स्नात्वा श्रीविश्वनाथस्य पूजनादिकं कृत्वा राजवीथ्यामागतौ । तदा कश्चित् पुरुषः प्रसिद्धपत्रिकां समर्पयति-तां गृहीत्वा)

नारदः——शारद ! पठस्व पत्रिकायामस्यां किं लिखितमस्ति ? ।

[शारदः——सर्वं विषयं पठित्वा प्रदर्शयति]

नारदः——(स्वगतं) अहो बेळगांवनगरे संस्कृतसाहित्यसम्मेलनं भविष्यति (प्रकाशं) शारद ! सुरभारतीप्रचारविषये बद्धपरिकराः बेळगांवनगरस्थमधुरवाणीसम्पादकादिमहाभागाः संस्कृतसाहित्यसम्मेलनं, तत्पूर्वस्मिन् दिने मधुरवाणीपत्रिकायाः गीर्वाणवाग्वर्धिनीसभायाश्च पाञ्चवार्षिकसमारम्भमपि अत्यन्तोत्साहभरेण समासादयिष्यन्तीति अतीव सम्मोदास्पदमिदं वृत्तम् । अतः आवामपि तत्र सत्वरं गच्छावः । अवगच्छावः तस्मिन् कर्णाटदेशे सुरभारतीकीर्तिप्रकाशविषयम् (इत्युभौ बेळगांवनगरंप्रति प्रस्थितौ) मार्गे मुम्बापुरीं समीक्ष्य

शारदः—महात्मन् केयं विशालनगरी या किल सागरावृता समुद्र-राजसम्भवा लक्ष्मीरिव तदन्तिके विराजति ।

नारदः—शारद ! इयमेव मुम्बापुरी, यस्यां विराजमाना स्वकीर्ति 'चंद्रिकायमाना संस्कृतसाहित्यचंद्रिकापदवीप्रतिष्ठिता संस्कृतसाहित्यसम्मेलनाध्यक्षतया नियोजिता श्री सौ–क्षमादेवी नाम सरस्वतीपुत्री संस्कृतसाहित्यं प्रकटयति ।

शारदः—भगवन् ! शीघ्रं तत्र गत्वा सं–सा–सम्मेलनोत्सवदर्शनेन सुरभारतीकीर्तिप्रकाशं विमर्शयावः (इति उभौ बेळगांवनगरं समागतौ)

श्री. महाराष्ट्रसाहित्यसम्राट् न चिं. केळकरमहाभागानाम्

भाषणम् ।

अयि संस्कृतसाहित्यसभासन्महाशयाः संस्कृतप्रणयिनः । अन्ये जनाश्च !

मन्ये अहं यद् अस्य संस्कृतसाहित्यंसेमलनस्य उपक्रमः अस्मिन् संस्कृतविद्वेषिणि विषमे काले सर्वथा समुचितः एव ।

बहुमानितः एव अहम् अत्र उपस्थितिप्रेरकेण निमंत्रणेन । नाहं कश्चित् गीर्वाणवाणीनिपुणः पण्डितः । तथापि सर्वथा संस्कृत प्रणयी । तस्माद् अत्र समुपस्थिते प्रस्तावे इच्छामि किंचित् तदनुकूलं वक्तुम् ।

आदौ तावत् एतद् विमर्शनीयं भवति यत् किं नाम संस्कृतसाहित्यम् । लौकिकव्यवहारे तु अधुना साहित्यशब्दः अतीव स्वल्पमात्रव्याप्तिः हीनार्थः शंकाकुलितो वा संजातो दृश्यते ।

अद्यतनाः महाराष्ट्रयुवकमहाशयाः साहित्यं हि ललितवाङ्मयसीम्नि परिसमाप्तं मन्यते । ललितं हि पुनः चतुर्दशपंक्तिमिते सुनीतमहाकाव्ये

अथवा अङ्गुष्ठमितायां द्रुतवाचनाकलनक्षमायां लघुकथायां परिसमाप्तं भवेत् । द्विशतपत्रमितः कादम्बरीग्रन्थः महाभारतबहुमानं संप्राप्नोति । विडम्बनं हि हास्यरससर्वस्वम् । 'स एव एको रसः इति वचनाधारेण शृंगार एव रसराजवैभवेन वेताल इव अनिर्बन्धं नृत्यति । राजाधिकारेण इव सर्वमेव वाचककरद्रव्यं अपहरति । संस्कृतिविद्वेष एव पुरोगामिनः वाङ्मयस्य लक्षणं सुप्रतिष्ठितम् । अध्यात्मशास्त्रं वृधरण्डागीतं भवेत् । इतिहाससंशोधनं तु सुखनिद्राभागिनां मृतकलेवराणां निष्फलोत्खननम् । धर्मस्तु महाघातकं अफेनसंमोहनम् । पुराणग्रन्था फाल्गुनमासोचितं बालक प्रलपितम् । अथवा सर्वथा त्याज्यः अवस्करराशिः । वर्गकलह एव परं तत्त्वज्ञानम् । अश्लील एव चाटूक्तिः । अनियन्त्रितग्राम्याव्यक्तिनिन्दा वीर्यशालित्वंम् । केवलं एकांङ्गि अनिष्टदर्शनं वास्तववादित्वम् ।

एतादृश्यां मनःस्थित्यांम् अभिनववयस्कानां, निष्फला अयुक्ता हि भवति तेषां संस्कृतसाहित्यप्रणयानुबन्धस्य अपेक्षा । तथापि न अद्यापि सर्व एव वैदिकसमाजः सर्वथा संस्कृतपराङ्मुखः । वेणुग्रामनिमन्त्रितम् एतत् संस्कृतसाहित्यसंमेलनं तत्सत्यमेव उदाहरति ।

अस्तु । यथाललितवाङ्मयम् अखिलवाङ्मयस्य एको विशेषो विभागः भवति, तथैव वाङमयस्य अपि अखिल साहित्यस्य विशेषो विभागः । साहित्यं तु विस्तृततया व्याख्यातुम् अर्हति । तत् तथा । साहित्यं नाम संस्कृतिदर्शकः तद्दर्शनसहायको वा सर्वः अपि वाक्समुच्चयः । संस्कृतिः तु व्यक्तिघटित समाजस्य संकीर्णानां परिपाकः । अत एव संस्कृत—साहित्य इति समस्तपदेन वैदिक परंपरागतस्य आर्यभारतीय समाजस्य यथार्थवृत्तिसमुदायदर्शकाः सर्वप्रकारकाः वाङ्मयप्रबन्धाः ज्ञातव्या इति मे मतिः । अत्र समस्तपदे संस्कृत इति गीर्वाणस्य पर्यायभूतः पारिभाषिकः शब्दः गीर्वाणवागविशेष दर्शकः एव । न तु उपरिदर्शितसंस्कृतशब्दस्य तस्य कोऽपि अनुबन्धः । वर्षसहस्रमितपरम्परागतवैदिकसमाजस्य विचारसंपत्तिः गीर्वाणभाषाया एव संगृहीता भवति । विविधप्राकृतभाषापरिणत्या

अपि न कदापि संस्कृतभाषाधाराप्रवाहः खण्डितः उच्छिन्नो वा । परकीय राज्यनियन्त्रणेन ।किमुत श्रेष्ठविद्यापीठैः अपि गलहस्तितम् इव भवतु संस्कृताध्ययनम् । तथापि मातृभाषामाध्यमं यदि कालगत्या विद्यापीठशिक्षणे प्रभविष्यति, न कदापि भयं संस्कृतिलोपस्य । यथा परिपक्वं वृक्षफलं प्रतिकणोपकणं तन्मूलरसेन अभिरञ्जितम् आवृतं संभृतं च भवति तथाहि सर्वा एव प्राकृतभाषाभिव्यक्ता ।विचार संपत्तिः संस्कृतसमाश्रिता एव भवति । अनिर्वाह्यं एतद् भाषाजीवनशास्त्रप्रमेयम् ।

सर्वासां प्राकृतदेशभाषाणाम् आत्मा एव गीर्वाणवाग्विनिष्ठा आर्य संस्कृतिः । नास्ति एका अपि प्राकृतदेशभाषा, यस्याम् अर्थप्रतिपादनस्य उपकारकाः न्यायाः, सिद्धान्ताः, दृष्टांन्ताः, अलंकाराः उदाहरणानि, परिभाषा विचार सरणिः—तात्पर्येण न एतेषां किमपि यद् न गीर्वाणभाषोध्दृतं भवति यदा यदा हि भारतवर्षे विद्यायाः पुनरुज्जीवनं संजातं, तदा तदा बाह्यांग भस्मविसर्जनेन गीर्वाणभाषावगुण्ठितं अन्तस्थम् आर्यज्ञानसंस्कृतितेजः एव आविर्भूतं दृष्टम्।अत एव महाप्रयत्नः कृतः पुरा संस्कृतग्रंथानां प्राकृत भाषांतरे आर्यसंस्कृति हितैषिभिःआर्यांग्लविद्वज्जनैः।एवं हि वेदोपनिषद्भारत-भागवत-रामायण पुराणादिग्रन्थैः सूत्रभाष्यवार्तिकैः प्राकृतभाषारूपेण अवतारधारणं कृतम् । सन्ति अद्यापि अनेके शास्त्रदर्शनभाष्यटीकादिसंस्कृतग्रन्थाः ये तथैव भाषान्तरम् अपेक्षन्ते आशास्महे यत् तदपि अवशिष्टं प्राकृतोपकारकं संस्कृत्युद्धारकार्यम् अचिरेणैव निर्वाहितं भवेत् ।

अधुना गीर्वाण भाषायाः संजीवनं कैश्चित् महानुभावैः देशभक्तैरपि अवगण्यते तिरस्क्रियते च । तेषां अभिप्राये स न केवलं मृतकलेवरसमुत्थानमिव निष्फलः प्रयत्नः । परंतु राष्ट्रप्रगतिविघातकी सा दुष्टा प्रतिवृत्ति रपि न मम कदापि सम्मतः एतादृशः विपरीतः अभिप्रायः ।

एतद्विषये पुण्यपत्तनस्थगीर्वाणवाग्वर्धिन्याः सभायाः चतुर्थवार्षिकसम्मेलनप्रसंगे समीचीनम् एव कथितम् अध्यक्षमहाशयैः हरदत्तशर्मभिः —

केऽपि सन्ति मुखराः ये भाषामिमां मृतभाषेति भणन्तः प्रकाशयन्ति

स्वापाण्डित्यप्रकर्षं स्ववदनस्य विवरत्वं, दर्शयान्ति च पूज्यभाषायामस्यां स्वानादरम्। परन्तु यदि कौशिकोऽहनि मुद्रितनेत्रः तर्हि किं भास्वतः अनुदयः अन्धतमसः अस्तित्वं वा सिद्ध्यति ? का नाम भाषा मृता ? यस्या नवनिसाहित्यरचनास्थगनं, यस्याः व्यावहारिकसत्तालोपः, यस्यामध्येतृणामभावश्च। अस्ति हि एतादृशं मृतत्वं पाश्चात्यभाषाणां 'ग्रीक' 'लैटिना' दीनाम्। न किंचिन्नूतनं विरच्यते एतासु भाषासु। न वा कुत्रापि आभिर्लोकव्यवहारः। न च विहाय विश्वविद्यालयादिषु द्वित्रान् छात्रान् कश्चिदध्येतृवर्गो दृष्टिगोचरः। एतद्विपरीतं च दरीदृश्यतेऽस्याम् अस्मद्गीर्वाणवाण्याम्। संस्कृतसंप्रदायन्हासे समुपस्थितेऽपि नवीनकाव्यनाटकादिसृष्टिरद्यापि जायते।

अत्राप्रकृतमप्येतत्प्रस्तूयते किंचित्—अद्य खलु राष्ट्रभाषानिर्माणव्यतिकरे समुत्पन्ने, आंग्लभाषा स्यात, उर्दू भाषा भवेत्, हिन्दी भाषा भवतु—इत्यादयः सन्ति बहवो वादाः। किन्तु यदि नाम काचिदपि भाषा राष्ट्रभाषापदवीमारोढुं शक्नोति तर्हि देववाण्येव।

मम मते अपि एतद् अवश्यं स्वीकरणीयं भवति यद्, गीर्वाणभाषा सर्वथा न मृता। परंतु परमगुप्तचैतन्यबलेन वरिवर्तिनी स्यात्। आर्यसंस्कृतिमहाद्रुमसंजीवनसमर्थः स एव एको रसः। सर्वासामपि मातृवियुक्तानां देशभाषाणां मातामही भूत्वा, लुप्तस्तन्या अपि अपत्यवत्सलतया अदृश्यदुग्धपानेन ताः अद्यापि परिपालयति। गीर्वाणभाषाश्रयेण विना न एका अपि देशभाषा स्थातुं शक्नोति। तथापि स्वयमेव अनेकविधानि नूतनसंसारगृहकर्माणि पारयितुम् न शक्नोति तपस्विनी। दौहित्ररूपः अद्यतनानाम् आर्याणां समाजः गर्विाणभाषाकरधरः सन् अपि तस्याः गलितरदनायाः क्लिष्टार्थकलितानि मुखस्फाटनगलितानि प्रौढदीर्घवचांसि न समर्थः अभिज्ञातुम्। एतद्विषये न प्रत्यवायः शब्दगणस्य। बहवः संस्कृतशब्दाः आधुनिकानामपि चिरपरिचिता एव। अन्येऽपि कोशसंशोधनसुलभाः।

परं प्रथमं तावत् व्याकरणकाठिन्यं महाभयदर्शनं परिपन्थि भवति। अनन्तरं प्रौढपरिचितानाम् अपि मार्गे पदसन्धिप्रकारः दुर्लङ्घ्यपर्वत इव अथवा

गहनान्धकारविवरमिव समुत्तिष्ठति ।एतद् उपाधिद्वयं यथाशक्ति परिहर्तव्यम् इति मे सुनिश्चिता मतिः । यदि गीर्वाणभाषायाः संजीवनं व्यवहारक्षमत्वं च इष्यते प्रासादिकपदवाक्यरचनाप्रकारः सर्वथा असान्धिः अनुष्ठातव्यो भवति । अनेक नूतनाविषयविभ्रान्तचित्तानाम्, उद्योगपराङ्मुखानां, प्राचीन वाङ्मयादिविषये समुदासीनवृत्तीनाम् , आधुनिकानां गीर्वाणभाषासंमुखत्वं संपादयितव्यं चेत् भाषाप्रबन्धः कदलीफलदलवत् लीलया आवरणदूरीकरणक्षमः भवितुम् अर्हति। न पुनः नारिकेलफलवत् गहनप्रवेशः । दिव्यज्ञानसुधा अपि लोहपत्रबद्धमुखे भाजने संगृहीता अकिंचित्करा एव भवेत् । घटसर्पगृहीतगलः दैवहीनः अमृतेन किं करिष्यति ? । परंतु न शक्नोमि समाश्वसितुं यत् मत्सूचिताः संस्कृतसुकरीकरणे उपाया अद्यापि पण्डितैः सोत्साहं स्वीकृता आदृता वा । दैवदुर्विपाकेन सर्वथा गतानुगतिकत्वं प्रभवति

गीर्वाणभाषायाः सुलभीकरणविषये किंचिद् मतभेदः प्रवर्तते । परंतु अहं न समाहितः गीर्वाणसुलभीकरणविरोधिना युक्तिवादेन । किं केवलं शब्दसन्धिभङ्गेन वाङ्मयरससमाधिभङ्गो भवेत् ? । किं समाससंक्षेपेण अर्थ-संक्षेपः संभवति ? शतक्रोशमितो लोहमार्गः मूलतः लघुः लोहखण्डैः संघ-टितोऽपि असन्धिरेव । ननु महापण्डितानां महापण्डितार्थे यद् गीर्वाणप्रबन्ध-लेखनं भवेत् तत्र काठिन्यं भूषणं भवतु नाम । परंतु सामान्यजनसमूहेन यदि गीर्वाणभाषाव्यवहारः परस्परम् इष्यते, तद कापि कठिना रीतिः मन्मते सर्वथा अस्थाने भवति । ग्रन्थप्रबन्धभाषा व्यवहारभाषापेक्षया अवश्य-मेव परिच्छिन्ना किंचित् कठिना भवितुम् अर्हति । नाहं पाण्डित्यस्य अकारण-शत्रुः । तथापि पाण्डित्यस्य अतिशयोक्तिः न कर्तव्या गीर्वाणप्रसारैषिभिः । विवाहमङ्गलकालस्य विशेषप्रसङ्गे स्त्रीणां यत् अलंकारधारणं विहितं, न तत् गृहाभ्यन्तरे स्वयंपाकनिष्पादनसमये । अर्थशास्त्रीयचलनपद्धत्या अपि हैमं रजतात्मकं ताम्रलक्षणं इत्यादि प्रकारेण वैविध्यं संभवति तत्तत्प्रसङ्गे प्रभवति च, तथैव गीर्वाणभाषायाः व्यवहारे हेमौपम्यं कठिनरीतिनिष्ठं प्रबन्धचलनम् अन्ते अचलनशीलमेव भवेत् । संस्कृतश्रीवैभवं जडकठिनभाषाकवचसंलग्नं भूमिगतं गुप्तविवरगतम् इव धनं नित्यनैमित्तिकसंसारकार्यार्थे अनिर्वाहकं भवेत् ।

वैदर्भीरीत्या: उल्लेख: अपि केवले सन्धिसमासविषये अप्रस्तुत: असमर्थनीय: भवति । अस्या: वैदर्भीनामसाहित्यवाङ्मयरीत्या: लक्षणं ! श्रूयताम्—

माधुर्यव्यञ्जकै: वर्णै: रचना ललितात्मिका
अवृत्ति: अल्पवृत्तिर्वा वैदर्भी रीति: इष्यते ॥

वृत्तिर्नाम समासरचना । तत् किं मत्सूचितं समासापसरणं वैदर्भीरीतिं दूषयति ? अस्ति किंचित् प्रत्यन्तरमपि । किं नाम पाण्डित्यवैदग्ध्ययो: लक्षणं ? कथयतु कविवर्य: भवभूति: । 'यत्प्रौढत्वमुदारता च वचसां यच्चार्थतो गौरव तच्चेदस्ति तत: तदत्र गमकं पाण्डित्यवैदग्ध्ययो: ?' वाङ्मयविद्याविषये पाण्डित्यवैदग्ध्ययो: परत: नास्ति किंचिद् अधिकं अभिलषणीयम् । तथापि एतत्सबन्धे न उल्लेखितं कविवर्येण शब्दानां संधिजडीकरणं समासलांगूलविस्तारणं वा । तथा हि मिथ्यापाण्डित्यभ्रमोत्पादकान् प्राय: विस्मृतान् अपि धातुनामादिकानां प्रयोगान् शुष्कव्याकरणनिमित्तेन उपयोजयन्ति केचित् लेखका: प्रबन्धप्रसङ्गे । अहं तु सत्यपाण्डित्यं सत्यवैदग्ध्यं स्पृहयाम्येव, तथापि प्रासादिकं प्रसादगुणयुक्तं एव ।

अन्ते निवेदयामि यद् नगरे नगरे गीर्वाणवाक्वर्धिन्य: सभा: अवश्यं निर्मितिम् अर्हन्ति न स प्रयत्न: निष्फलपाण्डित्यप्रदर्शनार्थे । परंतु नित्यं निकटपरिचय: स्नेहं वर्धयति । स्नेहात् प्रेम संजायते । प्रेम हि शरीरसंबन्धम् उपनयते । शरीरसंबन्धात् कौटुंम्बिकत्वस्य अधिकार: अर्जितो भवति । तेन अखिल कुटुम्बसंपत्तिलाभावसर: अवश्यक्रमप्राप्त: एव । अत्र प्रस्तुतविषये कुटुम्बसंपत्ति: नाम गीर्वाणभाषान्तर्गतं आर्यसंस्कृतिभाण्डारम् । यथा कुल्यामुखेन समुद्रप्रवेश: एवं सुलभगीर्वाणभाषाप्रचारेण पूर्वार्जितं संस्कृतिधनं आधुनिकानां हस्तगतं भवेत् । आंग्लभाषाशिक्षितानां आधुनिकानां तु यै: विविधै: क्रीडाप्रकारै: कालापव्यय: भवति तेषु गीर्वाणभाषापरिचयो नाम एकोधिक: क्रीडाप्रकार: यदि समाविष्टो भवेत्, व्यावहारिकसंस्कृतभाषाया: संजविनं अवश्यं भावि इति मे मति: ।

पं. के. एस्. कृष्णमूर्तिशास्त्री

अयं "त्रिशिरः पुरीय" (Trichinaholy) "काट्टुपुत्तूर" अभिधग्रामवास्तव्यः माहाकुलश्रीविंकटसुब्बरामापरनामक "स्वाम्यार्य" तनुजन्मा शर्मणा "गणपतिरामकृष्णः"। **कृष्णमूर्तिशास्त्री** पंचचत्वारिंशद्वर्षीयः श्रीमच्चिदम्बरपुरहीरायमाणमहामहोपाध्यायश्रीमद्दण्डपाणिनामयज्वराजस्य साक्षादसाक्षाच्च छात्रतामुपगतः शब्दशास्त्रे। अधिगतब्रह्मविद्यः "करुंगुल" (Karungula, Firuenelvelly Dt.) वास्तव्येभ्यः श्रीयुतकृष्णशास्त्रिमहाशयेभ्यः महामहोपाध्यायेभ्यः, महीशूर (Mysore) नवसालपुर (Puducottah) अनंतशयना (Trivandrum) दि संस्थानेषु संमानितः महीशूरसंस्थानसमधिगतविद्वद्बिरुदः "चित् पुरी" (Chittoor) स्थवेदशास्त्र पाठशालायां स्तोकं कालम् उपव्याकरणाध्यक्षचरः, संप्रति "रामेश्वरदेवस्थान संस्कृतकलालये मधुरापुरीस्थे (Madura) मार्कीं पंचदशसंवत्सरान् वोढा व्याकरणाचार्यपदव्याः अनितरसाधारण्या सरण्या पाठप्रवचनेन समुद्धर्ता छात्राणां सदस्सु च वाक्यार्थचर्चादिषु कुतूहलमतितरामाबिभ्राणः बाल्यादारभ्यैव कवयिता स्वेनैव निर्मितेन सरसतरगीतरत्नकदम्बेन हरिकथाकालक्षेपस्य तत्र तत्र निर्वर्तनेन परां प्रसिद्धिमुपलभ्य श्रीमच्छृङ्गगिरिकुम्भघोणादि मठाधिपतिभिः महामान्यैः आचार्यवरिष्ठैर्बिरुददानपुरस्सरमनुगृहीतः विशिष्य धर्मप्रचारधुरंधरः "साहित्यभूषण, व्याकरणस्थापक, सत्कथाकण्ठीरव, संस्कृतप्रचारधुरीण, व्याकरणविद्वान् शिरोमणिश्च अयं मधुरवाण्यामसाधारणप्रणयी भारतभाग्यविपर्ययश्रीनिवासप्रसादनादिसुन्दरसुललितकाव्यलेखको मधुरवाणीप्रियपाठकानां परिचितश्च। प्रथमसंस्कृतसाहित्यसम्मेलने वाणीकर्णाभरणं नाम सुन्दरतरं काव्यं परीक्ष्यनिबन्धेषु प्राहिणोत्। काव्यमेतदतिसरसमिति निवेदनमनावश्यकम्। महिशूरमहाराजसं कृतमहाविद्यालयतः प्रकाश्यमानायां संस्कृतत्रैमासिकपत्रिकायां तद् वाणीकर्णाभरणं प्रकाशयितुमारब्धमित्यतो मधुरवाण्याम् न प्रकाश्यते इति निवेदयामः। प्रायः प्रत्यङ्कमपि महाभागस्यास्य लेखाः प्रकाश्येरन्निति निवेद्य संक्षिप्तपरिचयं निरूप्य विरमामो विस्तरात्।

सहसम्पादकः



श्रीमान् दानवीरः संस्कृतप्रणयी सार्धलक्षरौप्यमुद्राणां
प्रदाता शङ्करसंस्कृतविद्यालयप्रतिष्ठापकः
श्रीशङ्करश्रेष्ठिमहाभागः, यादवगिरिः



व्याकरणस्थापक, साहित्यभूषण, संस्कृतप्रचार
धुरीणेत्यादिबिरुदावलिसमलङ्कृतः, मधुरा
क्षेत्रस्थरामेश्वरदेवस्थानसंस्कृतमहाविद्यालय
व्याकरणमुख्याध्यापकः,
पं. क. एस् कृष्णमूर्तिशास्त्रिमहाभागः
मधुरा.



जयकर्नाटकसम्पादकः संस्कृतभाषासारल्य

सम्पादक दशमनिर्णयोपस्थापकः

धारवाडप्रान्तसन्मान्यप्रतिनिधिः

श्रीमान् बेळगांवीरामचन्द्ररायः, बी. ए.

धारवाड.

श्रीगीताजयन्तीतिथिविचारः

(ले. श्री. ऐनापुरबादरायणाचार्यः)

भारतीययुद्ध (कारव-पाण्डवयुद्ध) स्य आरम्भादिने हिंसात्मक-सङ्ग्रामं कर्तुमनिच्छन्तामिव युद्धान्निवृत्त्युन्मुखमिव स्थितमर्जुनं निमित्तीकृत्य भगवता श्रीकृष्णेन सज्जनोद्धाराय इष्टानिष्टप्राप्ति-परिहारसाधनभूतमुपदेशं 'गीता' इति 'भगवद्गीता इति' श्रीमद्भगवद्गीतेति च वर्णयन्ति सर्वे भारतीयाः । तस्माद् युद्धप्रारम्भदिनं गीताजयन्तीति प्रतिपादयितुं नास्त्यावश्यकता ।

भारतयुद्धं चतुस्सहस्रवत्सरेभ्यः प्रागिति केचन, पञ्चसहस्रवर्षेभ्यः । पुरा इत्यपरे, सार्धत्रिसहस्रहायनेभ्यः पूर्वमिति कतिपये-बभूवेति कथयन्ति। परमधुना तादृशकालविचारो नास्माकमपेक्षितः । गीताजयन्तीविचारस्यैव करणीयत्वाद् युद्धम् कस्मिन् मास कस्यां वा तिथौ प्रारब्धमिति प्रस्तुत-लेखस्य विषयः । युद्धं तु अष्टादशदिनपर्यन्तं प्रवृत्तम् । तथा भीष्माचार्यो दशदिनानि, द्रोणाचार्यः पञ्चवासरान् ,कर्णो दिनद्वयम् चरमदिने शल्यःअर्ध-दिनं तदुत्तरं दुर्योधनश्च सेनाधिपत्यमवहन्निनितीत्यत्र न कस्यापि विप्रतिपतिः तथा मासविषये न केषामपि विवादः। परं युद्धारम्भदिनम् आधुनिका विमर्शन-पटवः मार्गशीर्षशुक्ले एकादशीति वित्रदन्ते, बहवः त्रयोदशीति । तत्र, मतमास्माकीनं प्राचीनप्रमाणापष्टम्भपुरस्कृतं विदुषां पुरतः स्थापयितुमभिल-षामः । साम्प्रतम् यान्यवलम्ब्यास्माकं लेखोऽयं प्रवृत्तः, तानि पद्यानि 'भारतसारसङ्ग्रहनामकेव्यासोक्ते ग्रन्थे स्थितानि प्रथमं समुदाहियन्ते ।

'हेमन्ते प्रथमे मासे शुक्लपक्षे त्रयोदशी ॥
प्रवृत्तं भारतं युद्धं नक्षत्रं यमदैवतम् ॥६६॥
फाल्गुणेन हतो भीष्मः कृष्णपक्षे च सप्तमी ॥६७॥
अष्टम्यां चैव सौभद्रो नवम्यां च जयद्रथः ॥
दशम्यां भगदत्तश्च महायुद्धे निपातित ॥६८॥

एकादश्यामर्धरात्रे हतो वीरो घटोत्कचः ।
ततः प्रभातसमये विराटद्रुपदौ हतौ ॥६९॥
द्वादश्यां चैव मध्यान्हे द्रोणाचार्यो रणे हतः ।
त्रयोदश्यां च पूर्वाण्हे वृषसेनो हतो युधि ।
चतुर्दश्यां च सायान्हे कर्णो वैकर्तनो हतः ॥७०॥
अमायां तु हतः शल्यो मद्रराजो बली तथा ॥७४॥
अमायां मूर्ध्नि भागे तु राजा दुर्योधनो हतः ॥७५॥ इति

एतैः स्फुटतरैः प्रमाणैः भारतीययुद्धारम्भदिनम् अर्थाद् गीताजयन्ती त्रयोदशीतिथिरेवेति स्पष्टं प्रतीयते ।

उपरिनिर्दिष्टेन वाक्येन दशदिनपर्यन्तं युद्ध्वा सप्तम्यां निपतितो भीष्मः, अमायां दुर्योधनः पतितः तस्मिन्नेव दिने युद्धं समाप्तमिति ज्ञायते । कृष्णाष्टमीमारभ्य अमापर्यन्तम् अष्टदिनानि भवन्ति । अमीषु अष्टदिनेषु तिथिक्षयो नाभूदिति भारतसारसङ्ग्रहगतादिनानुक्रमणिकया महाभारतग्रन्थे अध्यायसमाप्तिवर्णनवाक्येन च विज्ञायते । यदि युद्धकाले विश्वघस्रपक्षः स्यात्, तर्हि कृष्णपक्षस्य प्रथमसप्तदिनेष्वेव तिथिद्वयक्षयेण भाव्यम् । तच्च असम्भावितमेव । एतद्विषयसम्बन्धीनि यानि भारते समुपलभ्यन्ते वाक्यानि, तानि एकवाक्यतया योजयितुं न शक्यानीति विदुषां सम्मतमेव । अतः उपरिनिर्दिष्टप्रमाणानुसारेण त्रयोदशीतिथिरेव युद्धारम्भदिनम्, सैव गीताजयन्तीति पक्ष एव समञ्जस इति प्रमाणशरणैरवश्यमादरणीयमिति दिक् ।

अस्मदीयायां पद्मिनी-कादम्बर्याम्

“ पद्मिनी—नाथ—वर्णनम् ”

(ले. श्री. ल. आठलेकरः)

विरिञ्चि विरचितप्रपञ्चेऽस्मिन्नखण्ड-ब्रह्माण्डे विश्ववसुधासूर्यमणीयमानः, निखिलप्रत्यर्थिप्राणहरणपरायणः, यम इव समवर्ती, भार्गवराम

इव निखिलराजन्यकहृदन्तरे नक्तन्दिवमतितरां शल्यायमानः, भास्वानिव निजतेजस्तिरस्कृतसमस्तराजतेजाः, प्रयत्नेषु भगीरथायमानः धर्मे युधिष्ठिरायमाणः, ज्ञाने व्यासायमानः, गुण-दोषाऽऽकलने हंसायमानमनाः, पराक्रमे स्कन्दायमानः, प्रतिज्ञायां भीष्मायमाणः, दाने कर्णायमानः, सपत्नगणार्णवक्षयोदञ्चदुग्रवडवावैश्वानरायमाणः, पावित्र्ये गङ्गायमानः, शान्तौ सुधांशूयमानः, वैराग्ये शुकायमानः, तेजसा वीतिहोत्रायमाणः विवादे धिषणायमानः रामासु रामायमाणः रूपेण मीनाकेतनायमानः, रणे अर्जुनायमानः, नीत्यां शुक्रायमाणः शत्रुषु कृतान्तायमानः, स्थैर्येण हिमाचलायमानः, गाम्भीर्ये रत्नाकरायमाणः, शक्तौ पवमानायमानः, अर्थिषु मेघायमानः, सङ्केतनिलयस्सर्वविद्यानाम्, आस्थानमहामण्डपो भारत्याः, आराम–निलयो निखिलकलाकलापस्य, मूर्धाऽभिषिक्तो महामतिमताम्, लीलाललितकेलिनिकेतनं कमलालयायाः, सुधांशुर्मित्रचकोरकनयनानाम् मध्याह्नचण्डांशुःप्रत्यर्थिदिवाभीतानाम्, रत्नाकरः प्रत्ननूत्नगुणरत्नानाम्, समस्ताश्चर्याणां परं विलासमन्दिरम्, विधाता महाप्रबन्धानाम्, अचरमो नवरसास्वादसुचतुरधियाम्, स्रष्टा महामखानाम्, भोक्ता नवनवलोकोत्तरविलासानाम्, प्रथमो महायज्वनाम्, अर्जुन इव धर्माऽनुगः, श्रीकृष्ण इव बलाऽधिष्ठितः श्रीराम इव गुरुवचनपरिपालनपरायणः, चम्पू-प्रबन्ध इव सङ्कलिताऽनेकालङ्कार--ध्वनि--प्रकारः, धर्मसिन्धुप्रबन्ध इवाऽऽकलितनानाव्रत--प्रपञ्चः, भवभूतिवाक्प्रवाह इव स्वसौन्दर्येण सर्वानधरीकुर्वाणः, चतुरानन इव राजहंसाऽधिष्ठितः, प्रभाकर इव च्छायासनाथः, अर्थशास्त्रे चाणक्यायमानः, ऐश्वर्येण राजराजमपि तिरस्कुर्वाणः, दृढतरभक्त्या ध्रुवायमाणो निखिलराजन्यकमूर्धमणिप्रभाभासुरपादपद्मः पद्मिनीनाथो नाम समभूद्भूपः ॥

" पद्मिनी--कादम्बर्याम् "

पद्मिनी-नाथस्य राज्ञो राज्य-वर्णनाम् ।

यस्मिंश्च महीक्षिति जितजगति प्रशासति क्षोणीमण्डलं सर्वत्राऽपि प्रसृता परमा पवित्रता ।

यत्र च खलयोगस्सूर्याचन्द्रमसोः, राजयक्ष्मा चन्द्रमसि, शूलित्वं भगवतःशङ्करस्य, गदित्वं श्रीनारायणस्य, अधोगतिरम्भसाम्, वामगति-रङ्गानाम्, दुर्योधनवृत्तान्तो भारते, कलिलीलाविलसितं नलचरिते, हिंसाश्रवणं मीमांसाशास्त्रे, अर्धचन्द्रदर्शनमष्टम्याम्, व्याधापराधाकर्णनं महाभारतप्रसङ्गतः, क्रौञ्चवधवार्ता स्कन्द-पुराणे, योगविभागो दर्शनेषु, रामासक्तिः वाल्मीकिमहर्षिवाचां प्रवाहतः; (प्रभावतो वा) सङ्करोऽलंकार-शास्त्रे, कलङ्कस्सुधांशोः, दुर्दिनं वर्षास्वेव, औद्धत्यं सागराम्भसि, चाञ्चल्यं क्षणप्रभामण्डले, अग्निपुराणे वान्हि-विलसितम्, चिरप्रवासः पुष्पवतोः, दुर्गाऽभिगमनं महानवम्यां, सर्गाऽवसानं महा-काव्ये, विवादश्शास्त्रेषु, काठिन्यमश्मनि, लोभातिशयो भगवत्तीर्थप्रसादादाने, सिंहातिक्रमः सहस्रांशोः, दण्डग्रहणं सन्न्यासदीक्षायां, द्विजिह्वत्वं भुजङ्गमानाम्, तिर्यग्गतिः पतत्रिणां, पाशकग्रहणमक्षक्रीडायां, वियोगिनी छन्दश्शास्त्रे, प्रभूतविषयोपभोगो भूपतीनां, महिषवधवार्ता सप्तशत्याम्, कुहनाभिक्षुदर्शनं भारतकथायां, गृध्र--शृगालवृत्तं शान्तिपर्वणि, छन्दः पद्ये, रजोदर्शनं योषित्सु, कूटोन्नतिर्महीध्र-राजराजौ, घातचक्रं ज्योतिश्शास्त्रे, निगडस्थितिर्मत्तमतङ्गजानाम्, तमो-विलसितं निशीथिनीषु, सन्धिविग्रहदर्शनं शब्दशास्त्रे, वारुणीप्रियत्वं प्रचेतसः, शतकोटिप्रयोगस्सङ्ख्यायाम्, अवाक्स्थितिर्यमस्य, समासशास्त्रे द्वन्द्वदर्शनम्, मित्रभेदः पञ्चतन्त्रे, महासङ्ग्रामवृत्तान्तो भारते, वनवासक्लेश श्रवणं रामायणकथायाम्, मृद्भक्षणप्रवृत्तिर्भागवते, सूर्याचन्द्रमसोः वारुणी-सम्पर्कः, वक्रोक्तिस्साहित्यशास्त्रे, परागः पुष्पेषु, लुब्धकयोगोऽरण्यान्याम्, बलिनिग्रहो वामनपुराणे, निग्रहस्थानं न्यायशास्त्रे, व्याधदर्शनं नभोमण्डले, कुटिलता योषितां कच-हस्तेषु, विप्रलम्भो दिवस-क्षणदयोः; वर्णव्यत्यासः पृषोदरादौ समभवत्।

पद्मिनी-कादम्बर्याम्।

—राज-वर्णनम—

यदीयं च जगत्त्रयविसारि यशोमण्डलं दिगङ्गनानां सर्वाङ्गेषु जगाहे भूषणनिर्विशेषताम्।

किं भूयसा ?;. नागवधूस्वर्वधूमण्डलीनामप्यङ्गेषु सर्वतो मण्डनायमानं बभूव । दरीदृश्यतेऽधुनाऽपि मध्येनभः प्रतिदिनं सङ्घीभूतं यदीयं प्रौढं यशो हिमांशुच्छलेन । आलोक्यते च प्रतिदिनं प्रेक्षावद्भिर्यदीयः प्रौढप्रतापः सहस्रकिरणव्यपदेशेन प्रतप्यमानो विहायस्तले ।

नूनं वञ्चितस्सागरेण प्राणानपि तृणाय मत्वा भृशं सुधाकृते प्रयतमानो गीर्वाणगणः, यदेतदीयं शतशरत्सुधांशुधवलं यशस्समूलमपहृत्य मुधा सुधांशुं वितीर्णवता ।

दृश्यन्ते हि प्रकामं प्रत्यहं पेपीयमानास्तपस्विनश्चकोरपतत्रिणस्सुधाधिया तमेव कुहनासुधाकरम् । हा ! हन्त !! कुतस्तिरश्चां ग्राह्याग्राह्य विचारणा ? आस्तां वामाचारस्तेषाम् । परं निपुणं प्रेक्षावन्तस्सुमनसः कथं भ्रमेण नितरामाकुलीभूताः पिबन्ति नक्तन्दिवं पीयूषमनीषया तमेव मुधा सुधांशुम् ? ।

यश्च सकृद्भाषित्वेन भगवतः श्रीरामस्य, कादम्बरीप्रियत्वेन भगवतसङ्कर्षणस्य, विभूतिविभूषितवपुषा भगवतः शङ्करस्य, सर्वत्र मृदुकर निक्षेपेण बालसहस्रांशोः, बहुनेत्रत्वेन श्रीमतः पाकशासनस्य, नितरां रामाऽऽसक्ततया भगवतो वासुदेवस्य, कुशासनपरिग्रहेण तत्रभवतां भगवतां महर्षीणां, कुशासनपरित्यागेन महात्मनो युधिष्ठिरस्य, प्रजापतित्वेन विधातुः, कमलापरिग्रहणेन श्रीविष्णोः, क्षमाशीलत्वेन सर्वसहायाः, नूतन-सृष्टि-रचनया राजर्षेर्विश्वामित्र य, सुवृत्ततया च भगवतः पार्वणसुधांशोरित्येवमहर्दिवमनुकरोति विश्वेषां महात्मनाम् ।

यश्चैककराक्रान्तसमस्तवसुन्धरः प्रकामं समुपजहास सहस्रकराऽऽक्रान्तविश्ववसुधं भगवन्तं भास्वन्तम् । यो मानुषेणैव शरीरेण सलीलमङ्गीकृतनिखिल क्षोणिमण्डलो ह्रेपयति स्म भगवन्तं क्रोडस्वरूपाऽडम्बरेण तां भुवं बिभ्राणं नारायणम् । प्रत्यर्थिक्षत्रियभयस्मरणमात्रेणैव वितीर्णमरणः आसन्नविंशतिवारं दृसक्षत्रगणक्षयकृते प्रयतमानं नितरां ह्रेपयामास जगदेकवीरमपि रैणुकेयं श्री-

परशुरामम् । सभायां याचनापराय पुरन्दराय मणिकुण्डलमर्पितवतः कर्णादपि याचनामन्तरेणैव वितीर्य वदान्यतायाः परमां काष्ठां समवजगाहे । एकेनैव वदनेन समधीतसर्वस्वाध्यायस्तदर्थं चत्वारि वदनानि संबिभ्रते चतुराननायोपजहास । एकेनैव जन्मना सकलं सनातनं वैदिक धर्ममविद्यमानास्तसमयमयं संस्थाप्य तदर्थं दशावतारान् बिभ्रतो महाविष्णोः प्रभविष्णोरपि चकारोपहासम् । यश्च स्वकटाक्षक्षेपेण क्षणाद्भस्मीकृतपुरत्रयं प्रकामं प्रहसति स्म तज्जयार्थं प्रपञ्चिताडम्बरं स्यन्दनीकृतसमस्तवसुधं, नियन्त्रीकृतसरस्वतीवल्लभं शरासनीकृत महामेरुमहीधरं, रथाङ्गीकृतपुष्पवन्तं, पत्रीकृतकमलाकामुकं भगवन्तं गिरिजा रमणम् ।

पद्मिन्यां नगरीवर्णनम् ।

आसीच्चास्य भूभृतो दर्शनीयदेशीयाऽतिरमणीयोत्तुङ्गतरप्रभूतप्रासादा, सुदीप्रैर्विद्युद्दीपैर्भगवतस्सहस्रभानोर्दिवसंनाथस्याऽपि दिनदीपदशां दिशन्ती, अभ्रङ्कषप्रासादशिखरतयाऽतिचिरप्रवाससंत्रस्तयोस्सूर्याचन्द्रमसोरपि प्रभूतं विश्रान्तिसुखं वितन्वती, निखिलब्रह्माण्डमण्डलरचनापरायणस्य, नारायणनाभिपुण्डरीकसमुद्भूतस्य विश्वकर्मणो निर्माणकौशलसीमाऽवनीव भ्राजमाना, यादवसमितिरिव सन्दर्शितोग्रसेना, शैवागमरचनेव श्रीशङ्कराऽधिष्ठिता, महर्षिमण्डलीव शाण्डिल्याऽधिष्ठिता, अगस्त्यसनाथा च, व्याकरणशास्त्रमिव बृहन्मञ्जूषाविराजिता, प्रदीपोद्योतोद्भासिता च, कुमारसम्भवकथेव प्रकटितबहुकुमारलीला, नीलकण्ठाऽधिष्ठिता च, ब्रह्मयज्ञपद्धतिरिव नानाऽगम-सम्पन्ना मुनिनिकरसमधिष्ठिता च, हस्तिनावतीव निसर्गमनोहरा धार्तराष्ट्राऽधिष्ठिता च, शब्दशास्त्रसरणिरिव प्रकटितप्रभूतधातुप्रकारा प्रथममध्यमोत्तमपुरुषैःसमधिष्ठिता च, प्रौढमनोरमेव दीक्षिताऽधिष्ठिता, पाञ्चालीवाऽनवरतं पञ्चजनसंसेव्यमाना, कादम्बरीकथेव संदृश्यमानमहाश्वेतपुण्डरीका, अहल्याकथेव संदृश्यमानसहस्रनेत्रा, अमरकोशरचनेव चातुर्वर्ण्यसमधिष्ठिता, श्रीरामचन्द्रचरितमि भरताऽधिष्ठिता,

गोमान्तकराजधानीव स्थाने स्थाने संदृश्यमानादभ्रदेवस्थाना, अत्यासन्न-विवाहवेलेव ससंभ्रमसंप्राप्तवरपुरुषा, यज्ञमण्डपभूमिरिव द्विजानां श्रुतिमनोहरैर्निर्घोषैरुद्घोषिता, रक्षस्सभमिव कविसनाथा, श्रीविष्णुसहस्रनामसरणिरिव नानाऽभिख्योपबृंहिता, सकलजनसमाक्रान्ताऽपि सुतरां विविक्ता, मातङ्गऽधिष्ठिताऽपि शुद्धाऽऽचार-परायणद्विजगणैस्संसेव्यमाना, बहुशालायुताऽपि चतुश्शालविराजमाना, सर्वजनसुखलब्धप्रवेशाऽपि पृथग्जनाऽलब्धप्रवेशा, धूमकेतुसमाक्रान्तापि सर्वमङ्गलाऽधिष्ठिता, सम्प्राप्तमध्याह्नसमयाऽपि निशान्त समाक्रान्ता, अनेकपाऽधिष्ठिताऽपि द्विपाऽधिष्ठिता, सभ्याऽधिष्ठिताऽपि बहु दूष्यसमाक्रान्ता, संदृश्यमानसहस्रपत्रनिचयाऽपि शतपत्रैर्विराजमाना, संक्रन्दनसभेव गन्धर्वशताऽधिष्ठिता, नाकलोक इव सर्वत्र-संदृश्यमान-सुमनोगणा 'नन्दिनी' नाम नगरी नगरीतिमनोरमा रमारमणनिवास-भूरिव प्रत्यक्षीभूतश्रीविलासा ।

भगवतो दाशरथेः श्रीरामचन्द्रस्य ब्रह्मविदविरक्तभक्तिमत्सार्वभौमः प्रशान्तात्मा श्रीमद्वसिष्ठ इव, श्रीवासुदेवस्य भगवतो ब्रह्मिष्ठस्सान्दीपनिरिव, तत्रभवतो युधिष्ठिरस्य राज्ञो महर्षिमण्डलमूर्धमणिर्धौम्य इव, देवेन्द्रस्य सर्वज्ञचक्रवर्ती, सरस्वतीविलासमुकुरः आङ्गिरस इव, भगवतो व्यासस्य श्रीमन्नारायणचरणपरिचरणपरायणो नारद इव, तेजसा जातवेदसो द्विरुक्तिः, ज्ञानेन श्रीमद्दत्तात्रेयस्य द्विर्भावः, शान्त्या भगवतः कैलासनाथस्य पुनरुक्तिः, तीव्रतपसा तत्रभवतो विश्वामित्रमहर्षेर्द्वित्वम्, अन्तेवासि गणप-स्वशः, निखिलज्ञानदानवदान्यः, अम्नायस्मृति-शास्त्रदर्शनपुराणेतिहासानां पारदृश्वा, आचारेण तु साक्षात्सनातनतम-वैदिकधर्मस्य पुनरुक्तिवदाभासः, रामासक्त-चित्तोऽपि नितरां पवित्रः, क्षितिपतेरस्यासीद्गुरुर्गुरुसंसारभार-हरणपरायणः ।

बेळगांवनगरे
संस्कृत साहित्यमहोत्सवः

बेळगांवनगरेऽस्मिन् गीर्वाणवाणीसेवापरायणा तत्प्रसारणैकप्रवणा प्रियपाठकगणजेगीयमानगुणगणा विद्वदन्तरङ्गसम्प्रीणननिपुणा मधुरवाणी नाम्नी संस्कृतपत्रिका सुनियतवेलायां प्रकाश्यमाना विभ्राजते इति तु विदितमेव विश्वेषां विद्याविभूषितानाम् । एषा किल पत्रिका पञ्चमं वर्षमुल्लङ्घ्य षष्ठे पदं निहितवतीति हेतुना महोत्सवाचरणाय बद्धपरिकरा समभूत् । एवमस्मिन्नेव नगरे गीर्वाणवाणीप्रसारणायैव जन्म गृहीतवती संस्कृतप्रणयिभिरादरात् प्रचाल्यमाना गीर्वाणवाग्वर्धिनी नाम्नी सभापि नामानुरुपं कार्यमाचरन्ती समतीत्य पञ्चमं वर्षं षष्ठे वत्सरे पदमार्पयदिति प्रमोदातिशयेन महोत्सवाचरणाय बद्धादरा समभूत् । ततश्च शतशो नागरिकाः प्रमुखा गीर्वाणवाणीप्रणयिनः सम्मिलिता महोत्साहशालिनः प्रसङ्गेऽस्मिन् मङ्गलमये सुप्रसिद्धान् विद्वद्वरान् सम्मेल्य अपूर्वं संस्कृतसाहित्यसम्मेलनमेव विधातुं बद्धङ्कणा अभूवन् । विनिश्चित्य चेत्थं मार्गशीर्षशुक्लप्रतिपदि शनिवासरे (नवंबरीय ३० तमे तारके) मधुरवाणीगीर्वाणवाग्वर्धिन्योरुत्सवसमारम्भौ तथा मार्गशीर्षशुक्ल द्वितीयायां रविवासरे दिशांबरप्रथमतारके संस्कृतसाहित्यसम्मेलनं च कार्यमिति व्यवास्थापयन् । तदनुरूपमेव दिनद्वयेऽपि संस्कृतसाहित्यमहोत्सवो बहुविजृंभितः प्रावर्तत । तथाहि—

मार्गशीर्षशुक्लप्रतिपदि शनिवासरे ता. ३०।११।४० सुमङ्गललतापल्लवशोभितं सुविशालं शिवानन्दनाटकगृहं संस्कृतप्रणयिनरनारीजनसम्मर्दसङ्कुलं नितरां व्यभ्राजतातिमनोहरम् ।

पुणे मुम्बई सातारा कोल्हापूर सावंतवाडी इचलकरंजी वांई रत्नागिरी धारवाड हुब्बळि गदग बागलकोट विजापूर पंढरपूर कित्तूर सवदत्ती बैलहोंगल गोकाक चिक्कोडी प्रभृतिनगरेभ्यः शताधिकाः प्रतिनिधयः समागच्छन् । प्रथमतो जमखंडीनगरकृतवसतिः ग. रा. साबडे बी ए महाभागो वैदिकं मंगलसूक्तमपठत् । ततः ‘ श्रीमान् ‘ सडेकरमहाभागः ‘ कल्लोळकर-

कविकृतं 'सुस्वरं 'स्वागतपरं पद्यमगायत । ततः श्रीमान् संस्कृतसाहित्यरत्नं मधुरवाणीसम्पादकः पं. श्रीगलगलीरामाचार्यः सर्वेभ्यः समागतेभ्यः प्रतिनिधिभ्यः सभास्तारभ्यः स्वागतं विधाय प्राचीनकर्णाटककविपुंगवारचितं संस्कृतसाहित्यसेवनमवर्णयत् (। एतदीयं स्वागतभाषणमन्यत्रास्मिन्नेवांके प्रकाशितमवलोकनीयं 'प्रियपाठकमहाभागैः ।) ततो 'मधुरवाणीसहसम्पादकः संस्कृतसाहित्यभूषणं बुर्लीश्रीनिवासाचार्यः समारंभद्वयार्थे द्वे अध्यक्षपदे समलंकर्तुमुभावपि पं- क्षमादेवी-हरकारेमहाभागावभ्यार्थयत् । ततश्चानुमोदितावुभावपि अध्यक्षपदमलमकुरुताम् । उभयोरप्यध्यक्षयोरतिसरसे सुललितपदालंकृते विविधविषयोपबृंहिते भाषणे 'समभवताम् । (उभे अपि अध्यक्षभाषणे पृथङ्मुद्रिते समवलोक्येताम्) ततः पुण्यपुरस्थ श्रीसर—परशुरामभाऊमहाविद्यालये संस्कृतप्राध्यापकः के. ना. वाटवे महाभागः " गीर्वाणवाग्वर्धिनीमधुरवाण्यौ समुद्दिश्यातिसरसमभाषत । श्रीमान् धारवाडकर्णाटकमहाविद्यालय शास्त्रप्राध्यापको वेदान्ततीर्थ श्रीशिवणगीविठ्ठलाचार्यः सुललितललितैः प्रणयप्रमोदसंभृतैः सुरुचिरतरैः शब्दैर्मधुरवाणीमभ्यनन्दत् । एतयोर्विनोदप्रचुरां सरलां सरसां निरालोचनां सहजां च सुधास्यन्दिनीं वाग्वैखरींमुपश्रुत्य मुग्धा एवाऽभवन्सर्वे सभिकाः संस्कृते प्रवृद्धप्रणयाः । एवमादिकार्यक्रमेण 'प्रथमदिवसीयमहोत्सवसमारंभः समाप्तो राष्ट्रगीतेन ।

द्वितीयदिने साहित्यसम्मेलनोत्सव समारम्भः

पूर्वस्मिन् दिने दिवैव तत्रापि मध्यान्हसमये समुदितां आविरञ्चिसर्गारम्भं कदापि केनापि अदृष्टपूर्वामश्रुतपूर्वां च सा. चन्द्रिकां च विलोक्य नूनं विस्मयाकुलचेताः ' आः मयि सकलभूमण्डलव्यापितेजसि तपति सति, चन्द्रिका वा भवतु साहित्यचन्द्रिका वा स्यात्, राहित्यचन्द्रिका वा भूयात् कथं वा आत्मनः अस्तित्वं सभायां वाङ्मयामृतवर्षित्वं च निदर्शयितुं प्राभवद्'

इति कोपेनेव संरक्तमण्डलः अननुभूतपूर्वेदृशपरिभवखेदं विस्मर्तुमिव वारुणीमाश्रितोऽपि अशान्तमनाः भगवान् भास्करः असहिष्णुतया अस्ताचलात्पाश्चिमाम्बुधौ भृगुपतनमकार्षीत् । निशायां 'नीचदशापन्नत्रिदशभारत्याः स्वास्थ्यसम्पादनाय वागमृतवर्षिणी सा. चन्द्रिका यदि वसुधातले प्रद्योतते, तर्हि सन्तोष्टव्ये अभिनन्दनीयेऽस्मिन् प्रसङ्गे कुतो वा मया विमनायितव्यम्' इति सुविचारेण प्रशान्तचेताः चन्द्रिकादर्शकुतूहलरसाप्लुतमानसः पुनः प्रभाते तेजोमण्डलभासुरः भगवान् भानुमान् सुरसरस्वत्याः महोत्सवे आत्मनः सहकारितां दर्शयितुमिव संस्कृतसाहित्यभक्तान् जडमयहेमन्तसमीरशिशिरताबाधापनोदाय कोष्णकरैरामृशन्नवर्धयतोत्साहभरम् । दिवाऽपि चन्द्रिकावाङ्मयामृतपानाय व्यालोलचेतसः सुज्ञचकोराः पिपीलिकाप्रवेशायाऽपि निरवकाशमकुर्वन् विशालमपि सभागगनाङ्गणम् । वाचस्पतिसमुपस्थितिमालोक्य संस्कृतभाषाप्रणयितया प्रथममेवात्मन्यङ्कुरितां विबुधमानितां दृढीभावमनयन्सुमनसः समास्ताराः । महाराष्ट्रसाहित्यसम्राट्पदमधितिष्ठतां वपुषि नराणां बुद्धिबलेन सिंहानां साहित्ये अभीष्टार्थसम्पादनेन चिन्तामणीनां प्रतिभाभामिर्नाकोलिकरणां **नरसिंह चिन्तामणि केळकर**महाभागानां तथा कर्नाटकगतवैभवस्मृतिदायिनां कर्णाटककुलपुरोहितानां **आलूरवेंकटरावमहाशयानां** च सान्निध्येन द्विगुणिता अभूत् परिषदः शोभा । सदस्सागरे व्यभ्राजन्त श्रीके० ना० वाटवेमहोदयः, श्रीपाटणकरशास्त्रिमहाशयः श्रीशिवणगीशास्त्रिमहाभागः श्रीमलगीवेंकटरमणार्यमहामनाः श्रीहूलीबृहन्मठस्वामिनः, श्रीहुक्केरिसदाशिवशास्त्रिणः, गोकर्णशास्त्रिणः श्रीधर्माधिकारिशास्त्रिणः श्रीसाधलेशास्त्रिणः श्रीपाच्छापूरशास्त्रिणः श्रीजोसीगुराचार्यश्चेत्यादीनि समुज्ज्वलतमानि विद्वद्रत्नानि । श्रीमान् सुप्रथितः बेळवीमहोदयः कर्णाटकसिंहः श्रीदेशपांडेगंगाधररायः, भूतपूर्वार्थमन्त्री श्रीलठ्ठेमहाभागः, भूतपूर्वमोहमयीशासनमण्डलाधिकारिणौ श्रीनारायणराव जोशी, भीमराव पोतदार महाभागौ शिक्षणविभागसमास्तारः श्रीबलवन्तरावदातारमहाशयश्चेत्येवमादयो लोकनायकाः तथा लिंगराजमहाविद्यालयनामछात्रानन्दिमठाध्यक्षः नन्दीमठमहाभागः प्रो. मुतनालकरमहाभागः प्रो. करन्दीकरद-

स्पती एवमादयः प्राध्यापकाश्च आत्मनः समुपस्थित्या संस्कृतप्रणयं प्रदर्शयन्तः प्रावर्धयन्त परिषदः सुषमाम् ।

प्रथमं श्रीसडेकरमहाशयेन सुस्वरेण स्वागतपद्ये गीयमाने रागानुबद्धचित्तवृत्तिरालिखित इवादृश्यत सर्वतः सभिकजनः । गम्भीराकर्षकस्वरवत्तया सुग्रीवा अपि कर्णाटकदेवीकर्णाभरणतया, अनाथायाः सुरभारत्याः शरणतया च '**वाली**' इति अन्वर्थितोपाख्याः एम्. पी. महोदयाः सदस्यस्वागतपरं कर्णाटकस्य सुरवाणीप्राक्तनसेवावर्णनोपबृंहितं काव्यमयं गभीराशयं नवस्फूर्तिप्रदं सरसमोजस्वि, च भाषणमवाचयन् । तादिदं भाषणं मस्मिन्नेवाङ्के प्रकटिमन्यत्र । तदनु मधुरवाणीसहसम्पादकः श्रीबुर्लीश्रीनिवासाचार्यः गुणवर्णनपरैर्वाक्यैः सुमसूचयदध्यक्षपदमलङ्कर्तुं साहित्यचन्द्रिकां क्षमादेवीम् । तदनु श्रीशिवगणीशास्त्रिणः डॉ० बाक्रेमहाभागाः अन्ये चान्यनगरतः समागताः सूरयः सानन्दमन्वमोदन्त । अध्यक्षपदमलङ्कृतवत्यां क्षमादेव्यां हर्षभरसूचकः सभिकानां करतलध्वनिः सुरलोकमवगाह्य तत्क्षणादेव देवकामिनिमानसमपाहरत् । तन्निदर्शतयाः सुपर्वसारसाक्षीसमाविष्टाः शतशः समागताः सुरभारतीप्रणयिन्यः पौरभामिन्यो वर्चोविशेषेण विभ्राजमानाः सभामपि समुदभासयन् प्रमोदविस्मयोत्फुल्लवदनाः । ततश्चाध्यक्षमहाभागा विविधविचारपरिप्लुतं नूतनपथोपदर्शकं सुगमं प्रत्यक्षरं क्षरत्सुरभाषाप्रेमरसं भाषणमश्रावयत्सभ्यान् गुणसम्पदिभ्यान् । यदाकर्ण्य नवविचारसाम्राज्ये व्यहरन् कियन्तमेव समयं श्रोतारः । अनन्तरम् आधुनिको संस्कृतप्रगच्छुङ्खलप्रवृत्तिनिराकरिष्णु विद्वत्ताप्रत्यायकं सकलहृदयाल्हादकं संस्कृतस्य सुलभीयरसपरिप्लुतं तदुत्कर्षावहपथोपदेशपरं तत्प्रसारोपायपरिबृंहितं संस्कृतस्य सुलभीकरणै कलक्ष्यं तन्महतीप्रख्यापकं निबन्धमनुवाच्य लोकोद्धारबद्धादरा अपि सहसा न. चिं. केळकर महाभागाः । ततश्च महिलाप्रमोदपारावारे न्यमज्जयन् लोकान् । यदवलोक्य विद्यालयबालिकाः शाकुन्तलनाटकस्य भागमेकं साभिनयं प्रादर्शयन् । यदवलोक्य रसिकाः सभिकाः कमप्यपूर्वमानन्दमनुभवन्तः क्षणं व्यस्मरन्नात्मानमेव । एवमवसितः मधुरप्रसङ्गेण आमध्यान्हमर्धः कार्यक्रमः ।

पुनश्च तस्मिन्नेव दिने अपराण्हे घंटा त्रयवादनवेलायां पुनः प्राक्रमत कार्यक्रमः। प्रथमं संस्कृतभाषा राष्ट्रभाषा भवितुमर्हति न वा ? इत्येनं विषयमधिकृत्य प्रवृत्ता विदुषामनेकेषां पक्षप्रतिपक्षोपन्यासपद्धतिः नितान्तं हृदयमहार्षीत्सावधानं शृण्यतां प्रेक्षकाणाम्। अन्ते च संस्कृतं राष्ट्रभाषा भवितुमर्हत्येवेति पक्षः साधु प्रतिबिम्बितः सुज्ञश्रोतृजनहृदयफलके। अथो सम्मेलनार्थं समागतेषु नैकेषु प्रबन्धेषु सातारावास्तव्याः श्रीकुलकर्णी महाशयाः, शहापूरनिलयाः श्रीसाधलेशास्त्रिणश्च स्वस्वनिबन्धंमन्ववाचयतां सरसतरम्। तदनु तर्कतीर्थ श्रीनीलकण्ठशिवाचार्यैर्विचितमवश्यमेव दृश्यं सङ्गीतमिश्रं तदन्तेवासिनौ साधुतरमभिनीयचिरं प्रेक्षकाणां निबन्धश्रवणजनितां सान्द्रां सन्द्राव्य आनन्दयतामतितराम्। सरसकोमलपदरञ्जिता वचनवैखरी, सहृदयहृदयङ्गमा सङ्गीतसरणिः हठादेव समावर्जयत् सहसा सभिकानां चेतांसि। ततश्च सर्वतः संस्कृतभाषापोषकाणां भिन्नभिन्ननगरेभ्यः समागतैः विद्वद्भिः सयुक्तिकं विशदोपन्यासैरुपस्थापितानां प्रस्तावानां निर्णयः समजनि सानन्दकरतलं समिकैर्विरोधांशमङ्गीकृतः। तदनु प्रा. के. ना. वाटवेमहाशयः स्वागतमण्डलेन विहितं सत्कारं सानन्दं सकृतज्ञभावमभिनन्द्य संस्कृतसम्मेलनस्य पुण्यपुरे आगामिवर्षीयाधिवेशनायादादामन्त्रणम्। ततश्च पं. पाटणकरशास्त्रिभिः विनोदमय्या वाचाऽभ्यमन्यन्त सादरम्। सकरतलारावं स्वीकृतं परिषदा तत। ततः श्रीआद्य अनन्ताचार्या अपि स्वागतमण्डलकृतमातिथ्यमुपवर्ण्य सर्वातिथिप्रातिनिध्येन कृतज्ञतां व्यनङ्क्षुः। अनन्तरं सभाध्यक्षाणाम् अर्थैः गुरु, पदैःलघु समारोपभाषणं समारोपयत्प्रणयाङ्कुरं संस्कृतभाषावल्लरीमरुस्थलायमानेऽपि जनानां चेतसि। ततः मधुरवाणीसहसम्पादकाः श्रीबुर्लीश्रीनिवासाचार्याः अध्यक्षमहोदयानाम् मान्यतमानां श्रीकेळकर आल्द्वर, पाटणकर, वाटवे, प्रभृतीनां परस्थलीयानामतिथीनामागमनमित्त तथा नाटकगृहाधिकारिणां, स्वयंसेवकानां प्रेक्षकाणां च उपकारस्मरणपूर्वकं सधन्यवादं कृतज्ञतामाविरकुर्वन्। अन्ते च राष्ट्रगीतेन समं सभा विराममयासीत् सभिकजनधन्यवादशतम दितीति शम्।

सम्पादकालोकः

रसिकवाचकानां करकमले सम्मेलनाङ्कमिमं ददतां नश्चेतः प्रमोदतेतमाम् । सरसलेखसमलङ्कृतोऽयं प्रसृमरपरिमलोल्लसत्कुसुमकमनीयमुपवनमिव कमप्यानन्दमनुभावयेदेव सहृदयहृदयानीति बाढं विश्वसिमः । तत्र श्रीसाहित्यसम्राट्केळकरमहाभागस्य निबन्धो रसानुबन्धी संस्कृतभारत्यां दृढयति प्रेमबन्धं वाचकानाम् । प्रा. के. ना. वाटवेमहाशयस्य लेखो नवीनमेव तत्त्वमाविष्कृत्य समुत्तेजयति विवेचनशक्तिम् । श्रीमलगीवेंकटरमणाचार्याणां सरसपदविन्यासो गभीराशयः प्रबन्धः सुरवाण्याः सर्वभाषोपजीव्यत्वं साधुसमर्थयति । बालकवेः गलगलीपण्ढरीनाथशर्मणो विद्यार्थिनोऽप्रौढस्यापि प्रौढपदक्रमसुन्दरा श्लेषभूयिष्ठा प्रासोल्लासिनी च लघुकथा हठादेवाकर्षति मानसं भावुकानाम् । श्रीआठलेकरमहोदयस्य पाश्चिनीकादम्बरीस्थाः केचिदंशाः बाणकादम्बरीमेव संस्मार्य अद्यापि विद्योतमानं सुरवाणीप्रौढिमानं निदर्शयन्तः चेतश्चमत्कुर्वन्ति विचक्षणानां वाचकानाम् । श्रीहुक्केरिगोविन्दशर्मणो विद्यार्थिनो लघुतममपि भाषणं गीर्वाणभारत्याः प्राक्तनवैभवं प्रत्याययति । किञ्च देवालयस्य शिखरमिव साहित्यचन्द्रिकायाः श्रीक्षमादेव्याः साहित्यवाचस्पति श्रीगुण्डेरावमहाभागानां तथा संस्कृते नवीनामेव लेखनकलापद्धतिमाविष्कुर्वतः । स्वागताध्यक्षस्य श्री. एम्. पी. वालीमहाभागस्य रसपोषण मनुत्साहशोषणम् औदासीन्यप्लोषणं सहृदयतोषणं भाषणं च नितान्तमेव सुषमां पुष्णन्ति सम्मेलनाङ्कस्याऽस्य । तमिमं सर्वाङ्गहृदयङ्गमं सम्मेलनाङ्कं वाचकदेवेभ्यः पृथगेव उपहारीकर्तुं बलवती मनीषा आसीन्मधुरवाण्याः । परं विरलवाचकतया प्रकृत्या च अकिञ्चना मधुरवाणी तथा कर्तुं नापारयदिति विषीदति । तथाऽपि आगामिनि वत्सरे सहस्राधिक ग्राहकानुग्रहबलाद् देशभाषापत्रिका इव बृहदाकारं सरसविषयमेदुरं बाह्याङ्गसुन्दरं विशिष्टाङ्कमेकमुपायनीकर्तुमुत्कण्ठतेतरां

वाचकेभ्यः । तदभिलाषपूरणेन सुरवाणीपोषणमात्मनस्तोषणं सर्वथा उदारवाचकानेवान्वायतते । साम्प्रतं विंशत्यधिकशतपृष्ठोपपुष्ट सम्मेलनाङ्कात्मना परिणतमङ्कत्रयमर्पयन्ती मधुरवाणी गृहीताव्रकाशा आत्मनः प्रसाराय देशान्तरप्रवासमुररीकर्तुं निर्बध्नाति नितरां सम्पादकद्वयम् । तदिमं वाचका अनुमन्येरन्नेति ग्राहकसङ्ख्याधिक्याय शक्तिमतिक्रम्य प्रयतेरन्नेवेति च बलवद्भिश्वसिति सेयं पुनः मरीच (मार्च) मासे वाचकानुपस्थास्यत्येव सङ्ख्यावतोऽप्यसङ्ख्यान् वाचकधुरीणानानन्दयितुम् ।

' संस्कृतं ' पत्रसम्पादकेषु विज्ञप्तिः

अयि सम्पादकहाभागाः तत्रभवतां भवतामनितरसाधारणं संस्कृतप्रणयं, तदेकमूलं क्रान्तिकरम् अगणितप्रयासमनालोचितधनह्रासं संस्कृतप्रसारैकोद्देश्यं साहसमन्वीक्ष्य कस्याऽपि संस्कृतप्रणयिनो मस्तकमवनमति स्वयमेवोपस्प्रष्टुं भवतां पादमूलं भक्तिभरेण स्वयमेवाऽञ्जलिरूपतां बिभर्ति करद्वयम् । परम् एकतः श्रीमता ' संस्कृतं पत्रं सरसतरलेखैरानन्दयति वाचकान् , अपरतश्चोद्वेजयति निष्प्रयोजनेन प्रतिपक्षिप्रत्याक्षेपरूक्षाक्षरलेखमालया किमनेन अभीष्टतमः संस्कृत प्रसारः शक्यसम्भावनः ? । किं वा उपजीव्यवाचकजनकोमलमनःप्रसादनं सुकरासादनम ? । आत्मनि दोषेषु विस्फुरत्स्वपि अस्मासु तथ्यं अतथ्यं वा दोषमारोपयन्तां नाम परे । यदि तथ्यः स्यात् तर्हि सानन्दं सकार्तज्ञ्यं च तमपनोदयितुं प्रयतामहे । अतथ्यश्चेत् शान्तेन चेतसा सहामहै । किं वा निरर्थकेन परदोषाविष्करणेन । न तेन आत्मदोषाः गुणरूपतां दधते । अस्माभिरनभिज्ञातानां दोषाणां दर्शने यदि सौहार्देन वा पुरोभागितया वा परे साहाय्यमाचरेयुस्तर्हि जनैरपहसनीयतादृशदोषपरिमार्जने मार्गमुपदिशेयुस्तर्हि सन्तोष्टव्येऽस्मिन् कुतो वा क्रोधेन कालुष्यमापादनीयं चेतसि ? नैकविषयव्याकुलतया वा प्रमादशीलतया वा सहजदोषतया वा पत्रसम्पादनकलायाः, ज्ञानन्यूनतया वा पदे पदे स्खलतां सम्पादकानां सहनवृत्तिरत्यावश्यकी सैव क्षेमकरी जनसहानुभूतिप्रसविनीच ।

जनसहानुभूत्यधीनं हि पत्रिकाणां जीवनं, विशेषतः संस्कृत पत्रिकाणाम्। एवं स्थिते ' प्रकोपाय न शान्तये ' इति वृत्तिः कुतो वा समाश्रयणीया सुज्ञेन। यदि परै निष्कारणमेव दोषा आरोप्यन्ते, तथाऽपि ' प्रथमं वन्दे ' इति वा ' गजो गच्छति ' इति वा इति न्यायेन दूरत एव नमस्करणीयास्ते। यदि सकारणं दर्शयेयुर्दोषान् तर्हि कृतज्ञतया सपादस्पर्शमभिवन्दनीया अभिनन्दनीयास्ते। तादृशप्रसङ्गे कोपपारवश्येन शाट्यास्फालनं विवेकफलतया न परिगण्यते। परैरसत्पथेऽवलम्बिते विवेकिभिरपि स एव मार्गः किं समाश्रयणीयः ?। तर्हि को वा भेदो विवेकिनामविवेकिभ्यः। आस्तामियं प्रसक्तानुप्रसक्ता सामान्यचिन्ता। परं श्रीमद्भिः वादप्रतिवादाभिनिवेशः सपदि परित्यज्यतामिति सविनयं प्रार्थयामः। प्रत्याक्षेपाय वृथा निरधिकारं व्ययीक्रियमाणं वाचकैः प्रेमधनेन विक्रीतं स्थलं कालं वा तेषां तोषायैव सरसलेखैरुपयुज्य अधमर्णतापाकरणतत्परतैव सम्पादकानां समुचितः श्रेयस्करश्च पन्था इत्यस्माकमल्पीयानाशयः। यदि केचन अन्यभाषाप्रेम्णा वा संस्कृतभाषायाः सद्य एव अशक्यताबुध्या वा राष्ट्रभाषात्वं नाङ्गीकुर्वन्ति संस्कृतप्रणयिनस्तेऽपि अनुनयेनैव आवर्जनीयाः न तु शापाक्षरैरुद्वेजनीयाः कथञ्चिदपि। अन्तःकलहो हि नितान्तं रुणद्धि समीप्सितं कार्यम्। चिरादपि यदन्तः क्वथ्यमानमासीत् तदिदानीं बहिरुदीर्णम्। इतः परं नियोगपर्यनुयोगानर्हाः भवन्त एव प्रमाणम्।

विरला एव संस्कृतपत्रिकाः। यदि ता अपि स्वीयमुद्दिष्टं संस्कृतप्रसारं दूरतः परिहाय कलहायैव पत्रिकामुपयुञ्जीरन् तर्हि संस्कृतदौर्भाग्यावसानसमयः नाद्याप्यनुप्राप्तः नाधुनाऽपि नष्टं वाचकानां दुरदृष्टमिति च प्रकटितसंस्कृतप्रणयी चेखिद्यते चेतः। वेद-पुराणाद्याविष्काराादिना शान्तिं विदध्यादिति तमेव नाथामहे भगवानेव सर्वथा सुमतिप्रदानेन शान्तिं विदध्यादिति तमेव नाथामहे सभक्तिभरम्।

हन्त !! अन्तर्हिता ज्योतिष्मती

वर्षद्वयात्पूर्वं वाराणसीक्षेत्रे समुदिता समुद्बोधक—जागृतिजनकलेख-प्रकाशैः समुद्भासमाना अचिरादेव महतीं ख्यातिमासादितवती **ज्योतिष्मती** नाम संस्कृतपत्रिका स्वातन्त्र्यलेखनप्रकाशे राजकीयाधिकारिभिः कृतं कञ्चन निर्बन्धमवलोक्य क्रोधातिरेकवशाद्विलुप्तविवेका बाल्ये एव प्रायोपवेशव्रतं स्वीकृतवतीति वृत्तान्तमुपाश्रित्य वज्रनिदीर्णमेवासीदस्मदीयं हृदयम्। वत्सा ज्योतिष्मती अचिरादेव संस्कृतप्रपञ्चमात्मनो विसृमरेण तेजसा प्रकाश्य तमो निस्सारयेदिति द्रढीयानासीन्नः प्रत्ययः। परम् अङ्कुरावस्थायामेव विच्छिन्नो रसालस्तरुः। अत्यल्पेऽपि संस्कृतपत्रिकाप्रपञ्चे यदि एकाऽपि पत्रिका केनाऽपि वा कारणेन अन्तर्धानमुपेयात् तर्हि महती हानिः सञ्जायते। यदि अनिवार्यैः कारणैर्विपत्तिरापतेत्तर्हि सर्वं सह्यं तूष्णीमेव। परम् अल्पीयांसं हेतुं पुरस्कृत्य उद्दिष्टकार्यत्यागो नैव किल पौरुषोपचायको भवति, प्रत्युत कर्तव्यच्युतिमेव प्रख्यापयति। किंच संस्कृतपत्रिकाणामयमेव मुख्योद्देशो यत् धर्मसञ्जीविन्याः संस्कृतभाषाया राष्ट्रभाषात्वसम्पादनमेव न तु स्वातन्त्र्यादिर्गहनो विषयः। तत्कृते सहस्रशो बद्धपरिकराः सन्ति देशभाषापत्रिकाः। अनेन न वयं स्वातन्त्र्याभिमानविधुरा इति मन्तव्यम्। किन्तु प्रज्वलत्येवानिशमस्मास्वपि स्वातन्त्र्याभिमानानिलः। परं धर्मविरोधिनं संस्कृतभाषाप्रसारप्रत्यूहायमानं च स्वातन्त्र्यं न वयं काङ्क्षामहे। इयदेव न, संस्कृतभाषारक्षणकृते जगदपि न गणयामः। 'संस्कृते रक्षिते सर्वं रक्षितं भवति ध्रुवम्' इत्येव बलीयनस्माकं विस्रम्भः। राजकीयाधिकारिषु प्रकुप्य पत्रिकास्थगनं नाम 'तैलकारे कोपेन शुष्का रोटिका भक्षिता इति न्यायमनुकरोति। अतः ज्योतिष्मतीसम्पादकैः पुनर्विचार्य राजकीयनिर्बन्धं परिपाल्यापि संस्कृत—संस्कृतिरक्षणाय ज्योतिष्मती' प्रकाश्यतामिति सविनयमावेदयामः।

किञ्चिदावेदनम्

संस्कृतसाहित्यसम्मेलने परीक्षणार्थं बहवो निबन्धाः प्रेषिताः मनीषिभिः।

तेषु ये ये परीक्षकसम्मत्या परिशीलिताः साधुत्वेन निर्णेष्यन्ते तेषां लेखकाः तत्तद्योग्यतानुसारं सुवर्ण रजतपदक प्रशस्तिपत्राणां प्रदानेन पुरस्क्रियेरन् मासद्वयादर्वागेव । तेषां नामानि ' संयुक्तकर्णाटक ' नाम्नि कर्णाटकपत्रे महाराष्ट्रे ' केसरी पत्रे च प्रकटीक्रियेरन् । निबन्धाश्च समीचीना मधुरवाण्यां क्रमशः प्रकाश्येरन् । प्रकटितनिजनिबन्धवाचने यदि बलवत्तरं कुतूहलम्, यदि च सुरवाण्यां निरतिशयः निर्व्याजः अन्तकरणस्पर्शी प्रेमा, तर्हि अवश्यं मधुरवाणीग्राहकत्वमङ्गीकृत्य तद् विशदीकरणीयः नितान्तमभिनन्दनीयः । नः चेत्परिमिताङ्कानां व्ययेन तदलाभाद्व्याकुलीभावप्रसङ्गः । अतस्त्वर्यतां निबन्धं प्रकाशितमनुवाचयितुमुत्कण्ठितैस्तदितरैश्च संस्कृतप्रणयिभिः ग्राहकपदमध्यारोढुम् । पुरस्तनेषु अङ्केषु श्री गोविन्दकृष्णमोडकमहाभागानां श्रीगोकर्णशास्त्रिणां, श्रीदिगम्बर महादेव कुलकर्णिमहाशयानां, श्रीधर्माधिकारिशास्त्रिणां श्रीसाधलेशास्त्रिणां च निबन्धाः क्रमशः प्रकाशयिष्यन्ते । तेऽपि कृतज्ञतया मधुरवाणीमनुगृण्हीयुः साहाय्यदानेनेति विश्वसिमः । कुतोऽपि वा कारणात् संस्कृत-रत्नाकरस्य अङ्का नियमेन न प्राप्यन्तेऽस्माभिः । तदधुना तत्सम्पादकाः विज्ञाप्यन्ते नियतकाले अङ्कप्रेषणेनानुग्राह्या मधुरवाणी । सदा व्यवसायबन्धुदर्शने कुतूहलिनी खलु बालस्वभावेयम् ।

सं. सा. सम्मेलने निर्णीतप्रस्तावानुसारं तत्तत्स्थलीयपाठशालानिरीक्षणाय नवीनशालाप्रस्थापनकर्मणि जनानुकूल्यसम्पादनाय श्रीमतां संस्थानाधीश्वराणांच विज्ञापनाय च तत्र तत्र सञ्चरिष्यतः मधुरवाणीसम्पादक सहकारिसम्पादकौ । अतः तत्तत्स्थलीयैः महाजनैः सर्वथा साहाय्यं विधायितामस्मिन् कर्मणि श्रेयोऽभीष्टसिद्ध्ये इति साग्रहमभ्यर्थयामः ।

' संस्कृतं ' साप्ताहिकपत्रस्य इदानींतनमेव अल्पमूल्यं यदि स्थिरं स्यात् तर्हि तावन्मूल्यकाः संस्कृतमासिकादिपत्रिका विलयमापद्येरन्नल्पमूल्यस्य संस्कृतस्यैव ग्रहणादितरनिराकरणाच्चेति भिया सदयान्तःकरुणाः संस्कृतसम्पादकाः स्वीयपत्रस्य मूल्यमवर्धयन्ताधुनैव । परम् अल्पमूल्ये स्थितेऽपि ग्राहकाभिवृद्धेः संशये पुनर्मूल्यवर्धनं न श्रेयस्करं मन्यमाहे । किंचिदमपरमा-

चक्ष्महे यद्, गुणैकपक्षपातिनो वाचका नाकलयन्ति मूल्याल्पताऽनल्पता-विचिकित्सामिति सर्वानुभव सिद्धोऽयं विषयः । अस्थाने भीतिरियं संस्कृत-सम्पादकानाम् । अतः पूर्वमूल्येनैव संस्कृतवृद्धिर्विधीयतामिति सविनयं विज्ञप्यते ।

ले. कविभूषणं मळगी वेंकटेशाचार्यः बागलकोट

सानंदं सुरभारतीप्रणयिभि र्वंशीपुरें स्थापितः
बाक्रेत्वालिमुखैः प्रयत्नशतकैः सोत्साहमुल्लासितः ।
यो वाचस्पतिपूर्वकैः सुमनसां वृंदैः भृशं श्लाघितः
पुष्टश्चंद्रिकया स जीवतु चिरं साहित्यकल्पद्रुमः ॥ १ ॥

सधन्यवादमभिनन्दनम्

सर्वैः नितरां प्रशंसितस्य संस्कृतसाहित्यसम्मेलनस्य यशस्विताकृते येषां शरीरतः श्रमस्वेदधारा प्रावहद् नदी, यैः दूरीकृतश्च उच्चनीचभावः, अभिमान-धनैरपि समृद्धसम्पदा सम्पन्नैरपि भगवता वामनेनेव याचनावृत्तिरवालम्बि, येषां करावलम्बनं विना स. सा. सभेयं नैवात्मानमाविष्कर्तुं प्रभवति स्म ते किल संस्कृतप्रणयिनः सततमुत्साहशालिनः सदा सत्कार्यैकप्रवणाः, सरलस्वभावाः सत्यामपि सामग्र्याम् अभिमानलेशेनाऽपि अस्पृष्टाः गुणपक्षपातिनः अन्यैर्मान्यतमैर्गुणैः सम्पन्नाः श्री. डॉ. सवणूर, श्री. एम्. पी. वाली, श्री. प्रा. भट, श्री. डॉ. बॉक्रे, श्री. वैद्यरत्नवाटवे, श्री. नारायणराव दातार, श्री. बलवन्तराव दातार, श्री. शामराव बीडी, श्री. पुरोहित, श्री. श्रीनिवासराव पोतदार, श्री. डी. व्ही. केतकर, श्री. वेंकटरावमुतालीक देसाई, श्री. सात्विक, श्री. अण्णाचार्य भुक्कबाग, श्री. साधलेशास्त्री, श्री. अनंतराव चिक्कोडी, श्री. अरविन्दराव जोशी, श्री. कृष्णराव जोशी, श्री. देवळे, श्री. वेणीमाधवा-

चार्यप्रभृतयो महानुभावाः कैर्वचोभिरभिनन्दनीया इति न वयं जानीमः । कदाऽप्यविस्मर्तव्यमुपकारभरमस्मासु निहितवद्भ्यः निरपेक्षं परोपकारशीलेभ्य एभ्यो महाभागेभ्यः अधमर्णतापनोदाय किमन्यद्दातुमीश्महेऽकिञ्चना वयं शुभाशंसनसनाथान् धन्यवादानन्तरा । सर्वथा सर्वदा श्रेयो विदध्याद् भगवानिति सततमाशास्महे ।

कालेजगे !

भावत्कं सखि ! चारुभालतिलकं यातं क्व कालेजगे !
कान्ते ! ते क्व नु कङ्कणे करयुगात्सौभाग्यमित्रे गते ।
धम्मिल्ले मुनिमानदः सुमभरः कुत्र प्रयातोऽचिरात्
सर्वाऽऽभूषणभूषणं क्व सहजा लज्जा वयस्ये ! गता ॥ १ ॥

सौ. उमादेवी मगनलालशास्त्री अंकोलवाडीस्था

' संस्कृतं ' पत्रे प्रकटितस्य पद्यस्यास्य उत्तरम्

अपि अशिक्षिते सारसाक्षि !

पातिव्रत्यगुणाय चारु तिलकं प्रागेव दत्तं मया
मद्दयात्यभरार्तकान्तनयने द्रागर्पिताः कं–कणाः ।
धम्मिल्लः शिथिलीकृतः सुखविरोधिन्या च नीत्या समं
मत्स्वैराचरणैर्जुगुप्सितमनो वेश्यासु लज्जा गता ॥ १ ॥

मृणालिनीदेवी

प्रथम संस्कृतसाहित्यसम्मेलनार्थे शुभसन्देशाः

मधुरवाण्याः पत्रिकायाः तथा गीर्वाणवाग्वर्धिन्याः सभायाः अर्थे प्रथम-

संस्कृतसाहित्यसम्मेलनार्थे च सुप्रसिद्धानां विद्वद्वराणाम् सकाशात् शताधिकाः सन्देशाः प्रधानमंत्रिकरतलमलमकुर्वन्। तत्र तेषु केषांचित् महाभागानामेव नामनिर्देशं वयमिह कुर्महे **यतः स्थलसंकोच भिया च।** सर्वेषां शुभसन्देशप्रेषकाणामाशिषां बलेनैव सर्वविधः कार्यक्रमसमारंभो महत्या यशस्वितया परिपारितः परेषामनुकरणीयश्च संवृत्त इति दृढीयान्नो विश्वास इति च बाढमाचक्ष्महे.।

श्रीमत्परमहंसपरिव्राजकाचार्येत्यादिबिरुदावालिसमलंकृताः श्रीकरवीरपीठाधीश्वराः श्रीश्रीमज्जगद्गुरुश्रीशङ्कराचार्यमहाभागाः, स्तथा सुप्रसिद्धा अतिवरिष्ठन्यायाधीशपदमलंकृतवंतो बॅ. एम्. आर्. जयकरमहाभागाः, मुंबईप्रान्तसर्वाधिकारि (गवर्नर) समालोचनासदस्याः (सल्लागार) जे. मदन आय्. सी. एस्. महाभागाः, अखिलकर्णाटकसाहित्यपरिषदुपाध्यक्षाः श्रीकण्ठय्यामहाभागाः, सुप्रसिद्धकीर्तयः श्री. डी. व्ही. गुण्डप्पमहाशयाः, श्री. सी. के. वेंकटरामय्यमहोदयाः, स्वतंत्रकर्णाटकसंपादकाः पं. श्रीशिवमूर्तिशास्त्रिणः, पुण्यपत्तनस्थन्यायाधीशपदमलंकुर्वाणा एन्. एस्. लौकूरमहाभागाः, सरसकवितानिर्माणलब्धनैपुण्या एम्. ए. पदवीविभूषिता लौकूरन्यायाधीशदुहितरः सौ. वनमालादेवीमहाभागाः, धुळेनगरवास्तव्या महामहोपाध्यायपदभाजः श्रीधरशास्त्रिपाठकमहाभागाः, गीर्वाणवाणीचरणपरिचरण प्रवणाः वैराजक्षेत्रवासिनो विद्याभूषण श्री. रंगाचार्यरड्डीमहाभागाः, सुप्रसिद्धश्रीकेसरीपत्रसंपादकाः श्री. ज. स. करंदीकरमहाभागाः, पुण्यपत्तनस्थगीर्वाणवाग्वर्धिनीसभाध्यक्षाः विद्याभूषण श्री. रानडेपुरुषोतमशास्त्रिणस्तथायुर्वेदविद्याचार्यपदविभूषिता नानलपुरुषोत्तमशास्त्रिणः, महिशूरमहाराजचामराजेंद्रसंस्कृतमहाविद्यालयाध्यक्षाः श्री. एच्.बी.कृष्णमूर्तिमहाभागाः,भाण्डारकरइन्स्ट्यूटरिसर्चाधिकारिणः प्रोफेसर खसुटणकरमहाभागाः,रा.सा.गोविंदराव सरदेसाईमहोदयाः, (रियासतकार) कोल्हापूर श्री.क्षात्रजगद्गुरवो महाभागाः, धारवाडनगरे प्रवर्त्स्यमान पंचविंशकर्णाटकसाहित्य सम्मेलनाध्यक्षपदमलंकरिष्णवः यादवगिरि श्रीशंकर संस्कृतमहाविद्यालयप्रधानाध्यापका व्याकरणतीर्थश्रीचन्द्रशेखरशास्त्रिणः, औधीयस्वाध्यायमण्डलप्रधान-

पुरुषाः पुरुषार्थादिसम्पादकाः, पं.—श्री—दा—सातवळेकरमहाभागाः, तुंगभद्रीयप्रेमायतनप्रवर्तकाः पं-श्रीतारानाथ महोदयाः, वाराणासीयहिंदुविश्वविद्यालयप्राध्यापक श्री. रँग्लर नारळीकरदम्पतीमहाभागौ, प्रोफेसर वे. का. राजवाडे महाशयाः, धारवाडनगरस्थ कर्णाटकमहाविद्यालयसंस्कृतप्राध्यापक श्री. भट-प्रो. जाहगीरदारप्रभृतयो महाभागास्तेते चान्ये महाभागाश्च ।

परमपूज्य स्याद्वादकेसरीस्वस्तिश्री १०८ पायसागर जैनमहामुनयः प्रियशिष्यकाव्यतीर्थब्रह्म वाऽरिआत्मारामशास्त्रिद्वारा : प्रियसंदशमनुप्रेष्य सं. सा. सम्मेलनयशास्वितामन्वचिन्तयन् ।

स्थलसंकोचेन अप्रकाशितनामानः अप्यत्र बहवो महाभागाः सं. सा. सम्मेलनस्य मनसा शुभं ध्यायन्तो महदुपकारमन्वतिष्ठन्निति तेभ्यः सर्वेभ्यो महाभागेभ्यः कृतज्ञताप्रदर्शनपुरस्सरं सहस्रशो धन्यवादान् प्रयच्छामश्च । नाम्नामप्रकाशनमुद्दिश्य तत्तेषां महोदयानां सविधे क्षमामभ्यर्थ्य विरमामो विस्तरात् ।

सं. सा. सेम्मलन प्रधानमंत्री बेळगांव

समस्याः संस्कृतभाषायाः

संस्कृतभाषा भारतीयसंस्कृतेः अधिष्ठानं अस्ति । हिंदुत्वं व्याख्यातुं प्रवृत्तः आधुनिकाविद्याविभूषितः विद्वान् कश्चित् "Hinduism is an anthropological process" इति कथितवान् । भारतीयजीवनप्रणालिका अलौकिकवैविध्यवैभवमयी वर्तते । सगुणपूजनम्, निर्गुणपरमात्मचिन्तनम् ; अव्यक्तोपासना, निसर्गपूजा; प्रपंचनिराकरणम् , नास्तिकवादः; वैराग्यम् , नृत्यगीतचित्रशिल्पकाव्यसाहित्यादिजीवनावश्यककलानां परिपोषणम्; एवं मानवजीवनान्तर्हितानां स्थूलत्वेन परस्परप्रातिकूलतया दृश्यमाणानां प्रवृत्तीनां रमणीयसमीकरणप्रयत्नः आर्यसंस्कृतिविस्तरे दृश्यते । मानवजीवनविज्ञानमन्दिरे अद्भुतः प्रयोगः खलु अयम् । अस्य प्रयोगस्य यशस्वितायाः

कारणं किम । अस्मत्संस्कृतेः विशालता, उदारता, सहिष्णुता, सर्वग्राहकता, सात्त्विकता, अन्तर्मुखता, अन्तर्दृष्टिः–इमान्येव तानिकारणानि इति मे मतिः। एतद्वैशिष्ट्यं अस्माभिः आधुनिकैरपि रक्षनीयं वर्धनीयं च । यादवीय-कलहनिमग्नः आत्मघातप्रवृत्तः मनोः वंशविस्तारः यदि तस्मात्प्रयत्नात् परावर्त-नीयः स्यात तर्हि भारतीयसंस्कृतेः पुरातन-सनातनसंदेशः, आत्मनिष्ठा अन्तर्मुखता नाम अक्षय्यस्थालीस्वरूपदानं बुभुक्षितजगते अवश्यं देयम् ।

अमृतस्य निधानस्वरूपा अस्मद्भाषा संस्कृता । एतावतीं अभ्युन्नतिं प्राप्तवती वाणी लुप्तप्राया कुतो बभूव । उच्चवर्णीयानां पण्डितानां च सम्प्रदाय-निष्ठा एव अस्याः अवनतेः कारणम् । सर्वजनसंजीवनी गीर्वाण वाणी अल्प-संख्याकानेव आश्रित्य, संकुचितस्वरूपा बभूव । इदानींतनकालस्य बीजमन्त्रः सर्वोदयः, सर्वसंग्रहः, सकलमानवकुलोद्धारणम् । जाति-मत-भाषा-प्रदेशभेदाः नावलम्बनीयाः । सकलविधमानवनिर्मितान् अन्तरायान् व्यतीत्य मानवसंस्कृति-मन्दिरनिर्माणाय सर्वैरपि उद्युक्तैः भवितव्यम् । अस्य महायशस्य यशः सिद्धये सस्कृतभाषोज्जीवनं अत्यंत आवश्यकम् ।

यथा स्वर्गंगा परमशिवशीर्षारूढाऽपि भगीरथस्य तपोबलात् भूमिं अवततार, पातालं चापि प्रविवेश, तथा गीर्वाणी वाण्यपि मानवव्यवहारस्य बहुविधव्यापारेषु अवतीर्यमाणा तथा दैनंदिनजीवने प्रतिक्षणं अनुभूयमानप्र-बलसंस्काररूपा भवतु । एतदुद्देशसिद्धये संस्कृतभाषायाः बहुजनसमाजस्य आकलनयोग्यत्वं भवितव्यम् । अतिकठिनपदप्रयोगवर्जनं, अतिदीर्घसमस्त-पदगुंफनवर्जनं, सुलभवाक्यरचनाभ्यासंगः एते नियमाः तत्परतया आचरणीयाः-। भरतखंडस्य विविधप्रान्तेषु अद्यापि प्रचलितानां संस्कृतशब्दानां कोशो रचनीयः । Basie English अर्थात् 'मौलिक आंग्लभाषा' याः अनु सन्धानप्रयत्नः यथा क्रियते तथैव संस्कृतभाषायाः अपि कर्तव्यः। गीर्वाण-भाषायाः सूक्ष्मार्थविपुलतायाः योगार्थबहुलतायाः निराकरणं नास्य उपक्रमस्य हेतुः । किन्तु सर्वजनप्रयोजित बहुजनविदितशब्दानां संग्रहः संस्कृतस्य उज्जीवनाय साधनमेव भविष्यति–नात्रसंशयः । श्रीयुत केळकरमहाभागैः

कारणं किम् । अस्मत्संस्कृतेः विशालता, उदारता, स ी श्रीशङ्करा कृतमहा-
सात्त्विकता, अन्तर्मुखता, अन्तर्दृष्टिः—इमान्येव तानिकार अन्नवस्त्रादिभिः परिपो
एतद्वैशिष्ट्यं अस्माभिः आधुनिकैरपि रक्षनीयं वर्धनं ति । अन्येऽपि लक्ष्मीकृपा-
कलहनिमग्नः आत्मघातप्रवृत्तः मनोः वंशविस्तारः यदि स्तर्हि अनुपदमेव संस्कृत-
नीयः स्यात तर्हि भारतीयसंस्कृतेः पुरातन-सनात पि संशयलेशावसर इत्यलं
अन्तर्मुखता नाम अक्षय्यस्थालीस्वरूपदानं बुभुक्षितजगते

अमृतस्य निधानस्वरूपा अस्मद्भाषा संस्कृता ।
प्राप्तवती वाणी लुप्तप्राया कुतो बभूव । उच्चवर्णीयानां प मानुरूपं कार्यमाचरन्ती
निष्ठा एव अस्याः अवनतेः कारणम् । सर्वजनसंजीवनी तीयवार्षिकोत्सवं विधाय
संख्याकानेव आश्रित्य, संकुचितस्वरूपा बभूव । इदा णयामासेति प्रमोमुद्यामहे
सर्वोदयः, सर्वसंग्रहः, सकलमानवकुलोद्धारणम् । ज चस्पतिः श्रीमान् सर.
नावलम्बनीयाः । सकलविधमानवनिर्मितान् अन्तरायान् ाटवे एम्—ए. महाभागः
मन्दिरनिर्माणाय सर्वैरपि उद्युक्तैः भवितव्यम् । अस्य म १ मार्गशीर्षतः १८६२
संस्कृतभाषोज्जीवनं अत्यंत आवश्यकम् । का उपन्यासाः समभू-
यथा स्वर्गंगा परमशिवशीर्षारूढाऽपि भगीरथ पं. श्रीनथूरामशास्त्रि-
अवतत पातालं चापि प्रविवेश, तथा गीर्वाणी श्री मोहोलकरशङ्करशास्त्रि-
बहुविध ेष अवतीर्यमाणा तथा दैनंदिनजीव त्वादार्हौ इति सर्वानेतान्
बलसं ीरामचन्द्र । एतद्द्देशमित्र संस
ाभिनन्दामः । सभेयमाचन्द्रतारक गीर्वाणवाग्देवीसेवामनिशमनन्तरायमाचर-
तादित्याशास्महे ।

सुरभारतीपोषिणी

निजांप्रान्तीये उदयगिरिग्रामे सनातनधर्मसंस्थया सुरभारतीपोषिणी पाठशाला तथा प्रतिपक्षमेतन्नाम्नी एव गीर्वाणवाणीप्रचारणधिया काचन सभाऽपि शालायां प्रवर्त्यते इति श्रुत्वा हन्त तुष्यामो वयम् । एतयो-रुभयोरपि संस्थयोरभिवृद्धिमाशास्महे ।
